CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2

शाकुन्तलं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra
ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gr

10.2

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-Mo

Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, J

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

१००

शाकुन्तल-रहस्यम्

(अभिज्ञानशाकुन्तल-प्रश्नोत्तरी)

लेखक

श्री त्रिलोकीनाथ द्विवेदी

चौखम्बा सुरभारती प्रकाशन

वाराणसी

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

प्रकाशक—

चौखम्बा सुरभारती प्रकाशन

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ३३३४३१

सर्वाधिकार सुरक्षित

संस्करण १९९६

मूल्य ३०-००

अन्य प्राप्तिस्थान—

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., जवाहरनगर, बंगलो रोड

पो० बा० नं० २११३

दिल्ली ११०००७

दूरभाष : २३६३९१

*

प्रधान वितरक—

चौखम्बा विद्याभवन

क (बनारस स्टेट बैंक भवन के पीछे),

बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ३२०४०४

मुद्रक—

भोजो मुद्रणालय

वाराणसी

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalg

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राप्त
नामक
प्रश्न
ती

अनुक्रमणिका

समालोचनात्मको भागः

प्रश्नाः		पृष्ठम्
१	महाकवेः कालिदासस्य जीवनपरिचयं कृतित्वञ्च संक्षेपेण समुपवर्ण्यताम् ।	१
२	अभिज्ञानशाकुन्तलम् इति नामकरणस्य समीक्षणं क्रियताम् ।	६
३	'काव्येषु नाटकं रम्यम' इत्युक्तिः युक्तियुक्तं समीक्षणीया ।	९
४	अभिज्ञानशाकुन्तलमादाय 'उपमा कालिदासस्य' इत्युक्तिः विवेचनीया ।	११
५	'अभिज्ञानशाकुन्तलस्य सामाजिकं विधानम्' इति विषयमादाय नातिविस्तरो निबन्धो लेख्यः ।	१४
६	कालिदासस्य प्रकृतिचित्रणं समुपवर्ण्यताम् ।	१८
७	अभिज्ञानशाकुन्तले अङ्गिरसपरिपाको विवेचनीयः ।	२२
८	अभिज्ञानशाकुन्तले अङ्गरसाः विवेचनीयाः ।	२६
९	नाट्यशास्त्रदृष्ट्या अभिज्ञानशाकुन्तलस्य समीक्षणं क्रियताम् ।	२९
१०	काव्यकलादृष्ट्या अभिज्ञानशाकुन्तलस्य समीक्षण क्रियताम् ।	३३
११	अभिज्ञानशाकुन्तलनाटकस्य कथानकस्य स्रोतो मूलाधारं वा युक्तियुक्तं समुपवर्ण्यताम् ।	३८
१२	अभिज्ञानशाकुन्तले कालिदासस्य मौलिकोद्भावनानां मूलकथानके परिवर्तनानाञ्च विवेचनं क्रियताम् ।	४१
१३	अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्ट्यं प्रतिपाद्यताम् ।	४४
१४	अभिज्ञानशाकुन्तलनायकस्य दुष्यन्तस्य चरित्र-चित्रणं क्रियताम् ।	४७
१५	शाकुन्तलायाश्चरित्रचित्रणं क्रियताम् ।	५२
१६	अभिज्ञानशाकुन्तलस्य प्रथमाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।	५५
१७	अभिज्ञानशाकुन्तलस्य द्वितीयाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।	५७
१८	अभिज्ञानशाकुन्तलस्य तृतीयाङ्कस्य कथानकं संक्षेपेण समुपवर्ण्यताम् ।	५९
१९	अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।	६१
२०	अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य कथासारांशो लेख्यः ।	६३
२१	अभिज्ञानशाकुन्तलस्य षष्ठाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।	६४
२२	अभिज्ञानशाकुन्तलस्य सप्तमाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।	६६

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalg

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ श्रीः ॥

शाकुन्तल-रहस्यम्

(अभिज्ञानशाकुन्तल-प्रश्नोत्तरीयम्)

समालोचनात्मको भागः

प्रश्नः—महाकवेः कालिदासस्य जीवनपरिचयं कृतित्वञ्च संक्षेपेण समुपवर्ण्यताम् ?

उत्तरम्—**परिचयः**—कविताकामिनीविलासो महाकविः कालिदासः कुत्र कदा च जनिमलभदिति विवादास्पदमेवास्ति। वैदिककालमहाकाव्यकालसङ्क्रमणसमये प्रादुर्भूतेनानेन महाकविना न कुत्रापि स्वपरिचय उपवर्णितः। अतः सर्वे विचारकाः विद्वांसः स्वस्वविचारानुसारमेव कालिदासस्य तत्तद्देशीयत्वं तत्तत्कालीनत्वञ्च संसाधयन्ति।

अस्य जन्मस्थानविषये मतत्रयं प्रचलति :—

१—कालिदासो बङ्गदेशीयः

२—कालिदासः कश्मीरदेशीयः

३—कालिदासः उज्जयिनीस्थ इति।

एषु त्रिष्वपि मतेषु प्रथमं मतं तु प्रायस्तर्कविहीनमस्ति अस्य विषये कानिचित् पुष्टानि प्रमाणानि न सन्ति यैः दृढतया बङ्गदेशीयत्वं संसाधयेत्। द्वितीयं मतं तु प्रबलतरं तर्कसङ्गतञ्चास्ति। अस्य काव्येषु सरसता प्रसादसाम्राज्यं च सर्वथाऽस्य कश्मीरीत्वसाधने प्रमाणमस्ति। यथोक्तं विक्रमाङ्कदेवचरिते—

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः॥

इति। तृतीयमतसाधने तु स्वयमेव महाकविना मेघदूते प्रदर्शितः उज्जयिनीं प्रति पक्षपात एव प्रमाणमस्ति। मेघदूते रामगिरितोऽलकाम्प्रति मेघस्य प्रस्थानं कारयित्वा मार्गस्य वक्रत्वेऽपि उज्जयिनीगमनस्यावश्यमेव प्रति[illegible]त्वात्—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

पन्था यदपि भवतः प्रस्थितस्योत्तराशां
ोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः ।

मह श: उज्जयिन्याः प्रत्येकेनापि कणेन परिचितोऽस्ति । तत्रत्या वेत्रवती नदी, य लोमिभिः सभ्रूभङ्गं नायिकामुखमिव—

'सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि' ।

शिप्रा च या खलु स्वकीयैस्तरङ्गवातैः प्रार्थाचाटुकारप्रियतमेव रमयति मनांसि कामिनाम्—

'शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः' ।

महाकवेः कालिदासस्य मनसि किमप्यद्भुतमेव चिह्नमङ्कयति । तत्रत्य पर्वतकन्दरस्थं शिलावेश्म अपि नैव विस्मरति कविः यत् तत्रत्यानां कामिना मुद्दामानि यौवनानि अङ्गरागादिलेपेन प्रथयति—

'उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।'

उज्जयिनी कामिनीकमनीयलोचनरमणमेव लोचनसाफल्यमिति महाकवे सिद्धान्तः—

'लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।'

एतेन महाकवेः उज्जयिनीं प्रति पक्षपातः स्पष्ट एवास्ति । अतएव केचि इदं प्रतिपादयन्ति यत् जन्मना भवतु कालिदासः कश्मीरदेशीयः किन्तु कर्म तु अयमुज्जयिनीस्थ एव । उज्जयिन्यस्य कर्मभूमिरासीदिति निश्चप्रचमस्ति महाकवेर्मनसि महाकालेश्वरभक्तिः प्रथयति अस्योज्जयिन्यां दीर्घकालि निवासम् । मन्ये कविना महाकालेश्वरस्य सायंकालिक्यां पूजायामेवोपस्थित भाव्यमिति । यथा स यस्मिन् कस्मिन्नपि काले उज्जयिनीं समागतं मेघं सा कालं यावत् तत्र स्थितिं रात्रिनिवासं च शिक्षयति—

अप्यन्यस्मिन् जलधरमहाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ॥

इति । मेघदूते रामगिरितोऽलकां यावत् यथा भौगोलिकी स्थितिः प्रतिपा ताऽस्ति तथा उज्जयिनीकश्मीराभ्यां कवेः कोऽपि घनिष्ठतरः सम्बन्धः वि यति, येनास्योत्पत्तिः शिक्षादीक्षादिकञ्च सर्वं बाल्यकालिक कर्म कश्मीरे किन्तु ग्रन्थानां रचना तूज्जयिन्यामेव रसभावविशारदस्य राज्ञो विक्रमादित संरक्षणे थाऽभिज्ञानशाकुन्तलभूमिकायां स्वयमेव तेनोक्तमस्ति—

भावविशेषदीक्षागुरोः विक्रमादित्यस्याभिरूपभयिष्ठा परिष

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2.

अस्यां च कालिदासग्रथितवस्तुना नवेनाभिज्ञानशाकुन्तलनामधे[illegible] नाटकेनोपस्थातव्यमस्माभिः। तेन हि प्रतिपात्रमाधीयतां यत्नः।' इति।

कालिदासनामधारिणोऽन्ये—संस्कृतसाहित्ये कालिदासना[illegible]रिणोऽनेके कवयो दृश्यन्ते। यथैकः श्लोकः प्रचलति—

एकोऽपि जीयते हन्त कालिदासो न केनचित्।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु॥

एतेषु त्रिष्वपि कालिदासेषु रघुवंशादीनां सर्वेषां ग्रन्थानां रचयिता एक एव कालिदासः उज्जयिनीनिवासी विक्रमादित्यसभासदिति नास्ति सन्देहः सर्वेष्वपि वर्णनसाम्यात् भावसाम्याच्च।

किंवदन्ती—अस्य महाकवेः विषये किंवदन्त्येका प्रचलति यत्—"पूर्वमयमासीन्महामूर्खः। स्वपत्न्या विदुष्या विद्योत्तमया तिरस्कृतः सन् गृहाद् बहिर्गतः, देव्याराधनाबलाच्च लब्धवैदुष्यसम्पत्तिः गृहमागतः। 'अनावृतं कपाटं द्वारं देहि' इति स्ववचनस्योत्तररूपेण 'अस्ति कश्चिद् वाग्विशेषः' इति स्वपत्नीवाक्यं श्रुत्वा 'अस्ति' इति पदेन कुमारसम्भवस्य, 'कश्चित्' इत्यनेन मेघदूतस्य 'वाग्' इत्यनेन च रघुवंशमहाकाव्यस्य निर्माणमकरोत्" इति।

कृते नैतद् युक्तियुक्तं प्रतीयते। यतो ह्यस्मिन् विषये एकः प्रश्नो जागर्ति—येन महाकविना 'अस्तिकश्चिद्वाग्विशेषः' इति वाक्यस्य 'अस्ति' 'कश्चित्' 'वाग्' इति पदत्रयमादाय काव्यत्रयस्य निर्माणं कृतम् तेनैव 'विशेष' इति विशिष्टं पदं कथमवशिष्टं परित्यक्तम्? कथन्न तदवलम्ब्यापि विशिष्टं किमपि महाकाव्यं कृतम्? इति।

किञ्च यदि देव्याराधनया कालिदासो लब्धज्ञानसम्पत्तिः स्यात् तदा तेन स्वकीयेषु काव्येषु देव्याराधनाऽवश्यमेव वर्णितं स्यात्, न चास्ति कुत्रापि, अपितु शिवोपासनायाः सर्वत्र निर्देशोऽस्ति।

अपरश्च 'अस्ति कश्चिद्वाग्विशेषः' इति वाक्ये कश्चिदिति पदं मध्यस्थमस्ति, किन्तु कश्चिदित्यादाय कृतं मेघदूतं कालिदासस्यान्तिमरचनेति प्रतीयते भाषा-शैली-रसपरिपाकादीनां सर्वोत्कृष्टत्वात्।

अतः कालिदासविषयिणी किंवदन्ती किंवदन्त्येवास्ति, न सा कथमपि विचारसहतां यातीति सुस्थम्।

कालिदासस्य समयः—महाकवेः कालिदासस्य समय[illegible]येऽपि बहूनि मतमतान्तराणि दृश्यन्ते। तेषु मतत्रयं विशेषतः प्रचलितम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

१—षष्ठ शताब्दी
—चतुर्थं शताब्दी
२—ई० पू० प्रथम शताब्दी । इति ।

एते त्रयाणामपि मतानामाधारोऽस्ति—कालिदासस्य विक्रमादित्येन स सम्बन्धः । कोऽसौ विक्रमादित्यः कालिदासस्याश्रयदाता ? इति विचारणावस भारतीयेतिहासे विक्रमोपाधिधारिणोऽनेके सन्ति राजानः । तेषां समयोऽपि पृथक्पृथगेवास्ति । अतो विक्रमादित्येषु भेदात्, कालिदाससमयेऽपि वैमत स्वाभाविकमिति ।

प्रथमं मतम् (षष्ठ शताब्दी)—केचिदितिहासकाराः कालिदासस्य समय षष्ठशताब्दीति स्वीकुर्वन्ति । एवं वादिष्वग्रेगण्याः सन्ति—डा० हार्नली फर्गसनादयः । ते कथयन्ति यत् यशो धर्मन् यद्वा यशोवर्मन् इति नामक नृपविशेषो हूणान् पराजित्य विक्रमादित्योपाधिं प्राप्तवान् । अस्मिन् विजयो पलक्ष्ये ६०० वर्षं पूर्वत एव तेन विक्रमसंवत् प्रचालित इति । अस्य समकालीनं महाकविः कालिदास इति रघुवंशमहाकाव्ये रघुदिग्विजयेन ज्ञायते, यतो हि रघुदिग्विजयसीमा यशोधर्मणो राज्यसीमेवाऽस्ति । अतो रघुदिग्विजयेन यशो धर्मणो विजयं राज्यसीमा च वर्णितोऽस्ति कविना । एवञ्च विक्रमोपाधिधार यशोधर्मा एव कालिदासस्याश्रयदाता षष्ठशताब्दी च कालिदासस्य समय इति

किन्त्वस्मिन् मते विप्रतिपत्तिरायाति—विक्रमसंवतः स्थापना षष्ठशताब्द जातेति न युक्तम्, ततोऽपि पूर्वतः प्राचीनकाले मालवसंवतः प्रचारस्य द नात् । किञ्च ४७३ ई० वर्षे वत्सभट्टिना लिखिते कुमारगुप्तप्रशस्तौ ऋतुसंह रस्य श्लोको दृश्यते । यदि कालिदासः षष्ठशताब्दीकः स्यात्तदा ४७३ ई० व जाते कुमारगुप्तप्रशस्तिलेखे कालिदासकृतस्य ऋतुसंहारस्य श्लोकः कथं स्यात्

द्वितीयं मतम् (चतुर्थशताब्दी)—महाकवेः कालिदासस्य रचनाविमर्श तात्कालिकवैभवदृष्ट्या, उत्तरमेघे स्वर्णबालुकायां मौक्तिकगोपनक्रीडया कालिदासस्य समयो भारतीयेतिहासस्य स्वर्णयुगः इति केचिदितिहासका वदन्ति । स्वर्णयुगस्तु गुप्तकाल एवेति निश्चितम् । एवं गुप्तकाले कालिदा जात इति ।

गुप्तकालेऽपि चन्द्रगुप्तसमये कालिदासो जातः स्कन्दगुप्तसमये वेति विवा ऽस्ति । केचिदस्य स्कन्दगुप्तसमकालीनत्वं संसाधयन्ति अपरे तु चन्द्रगुप्त कालीनत्वं । गुप्तवंशे च द्वौ चन्द्रगुप्तौ दृश्येते—चन्द्रगुप्तः प्रथमः, च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुप्तो द्वितीयश्चेति । स्कन्दगुप्तसमये कालिदासस्य स्थितिं संसा प्राप्तं विदुषां मतानुसारं रघुणा कृतो हूणपराजयः स्कन्दगुप्तेन कृतस्य हूणपराजयस्योपलक्षणमिति—

विनीताध्वश्रमास्तस्य सिन्धुतीर विचेष्ट नैः ।
दुधुवुर्वाजिनः स्कन्धाल्लग्नकुङ्कुमकेसरान् ॥

मेघदूतेऽपि मेघद्वारा पुष्पासारैः स्कन्दस्य स्नपनम्—

'तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः । इति स्कन्दगुप्तप्रशस्तिर्वे ति प्रतीयते ।

स्कन्दगुप्तस्य समयस्तु ४५५ ई० तः पूर्वमिति स एव समयः कालिदासस्येति सिद्धयन्ति ।

अपरे तु शकान् पराजित्य भारते सुखसमृद्धिं स्थापयितुः विक्रमोपाधिधारिणः चन्द्रगुप्तद्वितीयस्य शासनकाले महाकविः कालिदास आसीदिति कथयन्ति । चन्द्रगुप्तद्वितीयस्य शासनकालः ३७५ इ० तः ४१३ ई० इतिहासकारैः निश्चितोऽस्ति । अतोऽस्मिन्नेव काले महाकविः कालिदासोऽपि स्वजन्मना भारतभुवं समलङ्कार्षीदिति ।

इदमपि मतं हृदि न संघटते । यतो हि ई० पू० प्रथमशताब्द्यामेव भारते शकानामाक्रमणस्येतिहासकारैः सिद्धत्वात् । एतेषां विजेता उज्जैननरेशो विक्रमादित्य इत्यपि सिद्धम् । स एव वस्तुतः शकारातिः । तेनैव च विक्रमसंवतः प्रचार इति । स च नाम्नैव विक्रमादित्यो न त्वौपाधिक इति ।

तृतीयं मतम् (ई० पू० प्रथमशताब्दी)—भारतीयपरम्परावादिनः आचार्यास्तु ई० पू० प्रथमशताब्द्यामेव कालिदासस्य समयनिर्धारणं कुर्वन्ति । ते कथयन्ति यत्—विद्यादानदयादिगुणशीलेन ई० पू० प्रथमशताब्दीभवेन उज्जयिनीनरेशेन गर्दभिल्लपुत्रेण श्रीविक्रमादित्येन मालवगणाधिपतिना शकाः पराजिताः । अतोऽयमेव वस्तुतः शकारातिः । अस्यैव सभारत्नभूतो महाकविः कालिदास इति । अस्यैव च सङ्केतोऽभिज्ञानशाकुन्तले प्रस्तावनायां महाकविना कृतोऽस्ति—'इयं हि रसभावविशेषदीक्षागुरोः विक्रमादित्यस्याभिरूपभूयिष्ठा परिषद्' इत्यादि । अस्य समयस्तु ५७ ई० पू० इति कालिदासस्यापि स एव समयः ।

इदमेव मतं न्यायसङ्गतं युक्तियुक्तञ्चास्ति । १—ई० पू० प्रथमशताब्दीभवे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अश्वघोषे कालिदासप्रभावः सुस्पष्टः। २—गुणाढ्यकृतबृहत्कथायामुज्जयिनी-नरेशस्य विक्रमादित्यस्य वर्णनमस्ति। ३—रघुवंशमहाकाव्ये पाण्ड्यनरेशानां वर्णनमस्ति—

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्मिन् रघोः पाण्ड्याः प्रतापं न विषेहिरे॥

इति। चतुर्थशताब्दीतः पूर्वमेव पाण्ड्यानां समाप्तिः इतिहास प्रसिद्धाः।

एवं प्रभूततराणां प्रमाणानां सत्वात् ई० पू० प्रथमशताब्दी कालिदासस्य समय इत्येव पक्षो ज्यायान्।

कालिदासस्य रचनाः—महाकविना कालिदासेनाधोलिखिताः ग्रन्थाः विरचिताः—

१—रघुवंशमहाकाव्यम्।
२—कुमारसम्भवम्।
३—ऋतुसंहारः।
४—मेघदूतम्।
५—विक्रमोर्वशीयम्।
६—मालविकाग्निमित्रम्।
७—अभिज्ञानशाकुन्तलम्।

एषु रघुवंशकुमारसम्भवे महाकाव्ये, ऋतुसंहारं मेघदूतञ्चेति खण्डकाव्ये, शेषाणि त्रीणि नाटकानीति। भाषादृष्ट्या वर्णनदृष्ट्या च ऋतुसंहारः कालिदासस्य प्रथमरचना, मेघदूतञ्चान्तिमा रचनेति ज्ञायते।

(२) प्रश्नः—'अभिज्ञानशाकुन्तलम्' इति नामकरणस्य समीक्षा क्रियताम्?

उत्तरम्—'लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्' इति काव्यस्वरूपं ध्या-ध्यायम्, प्रसिद्धेन लोकस्रष्ट्रा प्रजापतिना काव्यजगन्निर्माणपरायणस्य कवेः तुलनां चाभिज्ञजनसम्पादितां दर्शं दर्शं प्रत्यक्षमस्ति काव्यविषय-स्वरूप-नाम-करणादिविषये कवेः स्वातन्त्र्यमिति। एवमेव च 'निरङ्कुशाः कवयः' इत्यभि-नोक्तयोऽपि सङ्गच्छन्ते। कविः सर्वथा स्वमनोऽनुकूलं काव्यनिर्माणं करोतीति निश्चितम्। यथा 'दशमेऽहनि पिता नाम कुर्यात्' इति धर्मशास्त्रीयवचनानुसारं पिता एव स्वकृतेः नामकरणे सर्वथा स्वतन्त्रो भवति तथैव कविरपि स्वकाव्य-रूपसन्तानस्य ... समर्थः स्वतन्त्रश्चेति। किन्तु पिता पुत्रपुत्र्योः नामक

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाम्नः सार्थकत्वं विचारयति तथा च ममेयं सन्ततिः एतत्स्थानं प्राप्नोत्विति ध्यायं ध्यायमेव यथा सन्ततेरुन्नतिं स्वकल्पनया वाञ्छति तथैव नामकरणमपि करोति। यथा विद्याभिनिवेशी सुधीन्द्रः, विद्यापतिः, वाक्पतिः, यद्वा प्रज्ञा, ज्ञानवतीत्यादि। प्रभुत्वाभिनिवेशी—नरेन्द्रः, वीरबहादुरः यद्वा दुर्गा दुर्गावतीत्यादि। एवमेव कविरपि काव्यस्येति।

काव्ये किमपि प्रसिद्धमैतिहासिकं, काल्पनिकं वा कथानकं भवति। तत्र घटिताः काव्यप्राणयिताः काश्चिद् घटनाः भवन्ति, प्रधाननायको भवति नायिका च। एभिरेव तत्त्वैः नाट्यकविः नाटकस्य नामकरणं करोति। उदाहरणार्थं यथा—उत्तररामचरितम्, महावीरचरितम् इति ऐतिहासिकं कथानकानुकूलं नामकरणम्। वेणीसंहारनाटकम्, नागानन्दम्, कुन्दमाला, प्रतिमानाटकम्, मृच्छकटिकम् इत्यादि समस्याप्रधानानि, घटनाप्रधानानि वा नाटकानीति घटनानुकूलं नामकरणम्। अनर्घराघवम्, हनुमन्नाटकम्, चन्द्रकला, प्रियदर्शिका इति प्रधाननायकं नायिकां वाऽऽदाय नामकरणम् मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मालतीमाधवमित्यादि नायकनायिकोभयमाश्रित्य नामकरणम्, कुत्रचिद्द्वयोः सम्मिश्रणेन यथा—स्वप्नवासवदत्तम्, मुद्राराक्षसम्—इत्यादि।

उत्तररामचरिते रामस्य चरितं चित्रितमस्ति तथैव महावीरचरिते महावीरस्येति तत्र कथानकस्य प्राधान्यमिति। वेणीसंहारे समस्याऽस्ति परिभवोद्दीपितायाः द्रौपद्याः मनसि सान्त्वनामुपस्थापयितुं भीमेन मध्यमपाण्डवेन भीमसेनेन कृता दुर्योधनरक्तेन द्रौपद्याः केशसंयमनस्य प्रतिज्ञा। इयमेव च तस्य नाटकस्यावान्तरा घटनाऽस्ति। नागानन्दे जीमूतवाहनस्योदारतया नागकुमारस्य गरुडात्संरक्षणं जातमिति घटनाऽस्ति। कुन्दमालायां गङ्गातटे सीतया समर्पितां कुन्दमालां दृष्ट्वा तत्समीपे रामेण सीतायाः स्थितिपरिज्ञानं प्रधाननाटनाऽस्ति। एवमेव प्रतिमानाटके मातुलगृहात् अयोध्यां प्रत्यागतेन भरतेन देवकुले मृतेषु स्वपूर्वजेषु दशरथस्यापि प्रतिमां दर्शं दर्शं तन्मरणस्य परिज्ञानं करोतीति। मृच्छकटिके मृत्तिकाशकटेन क्रीडयन् चारुदत्तपुत्रो रोहितसेन प्रतिवेशिपुत्रस्य स्वर्णशकटक्रीडनकं दृष्ट्वा सुवर्णशकटार्थं रोदिति वसन्तसेना च तन्मृच्छकटिकं सुवर्णशकलैः पूरयित्वा सुवर्णशकटे परिवर्तयतीति समस्या घटना वा तत्र गुम्फिताऽस्ति। अनर्घराघवम्, हनुमन्नाटकम्, चारुदत्तमित्यादिषु राघवः (रामः), हनुमान्, चारुदत्तश्च प्रधानपात्राणि सन्ति नायकाः तथैव प्रधाननायिकां चन्द्रकलां प्रियदर्शिकां वाऽऽदाय चन्द्रकला प्रियदर्शि[illegible]। मालवि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

काग्निमित्र–विक्रमोर्वशीय–मालतीमाधवादिषु प्रधाननायकनायिके उभेऽप्याद नामकरणं कृतमस्ति। स्वप्नवासवदत्तेऽपि यद्यपि उदयनेन वासवदत्ता स्वप्न दृष्टेति घटनैव प्रधानं तथापि स्वप्नदर्शनं वासवदत्ताञ्चोभयमप्यादाय स्वप वासवदत्तमिति, मुद्राराक्षसे राक्षसस्य नामाङ्किता मुद्रा यस्याः उपयोगः चा क्येन छद्मना कृत इति घटनां राक्षसञ्चादायमुद्राराक्षसमिति नामकरणं कृ मस्ति।

अभिज्ञानशाकुन्तलमस्त्येकं समस्याप्रधानं घटनाप्रधानं वा नाटकम् तथापि अभिज्ञानमिति समस्यां शकुन्तलां नाटकप्रधाननायिकाञ्चादाय 'अभि ज्ञानशाकुन्तलम्' इति नामकरणं कृतं कविताविलासेन महाकविना कालिदासेन

अस्मिन् नाटके नायिका शकुन्तला नायकेन राज्ञा दुष्यन्तेन गान्धर्वे विवाहविधिना परिणीता। स्वनगरं प्रति परावर्तमानेन तेन—

'एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत्प्रिये मदवरोधनिदेशवर्ती
नेता जनस्तव समीपमुपैष्यतीति॥'

इत्युक्त्वा स्वनामाङ्कितमङ्गुलीयकं स्वयमेव शकुन्तलायाः हस्ते परिध पितम्। नगरं गतः स शकुन्तलायाः अनवधानताफलेन दुर्वाससः शापेन शकुन्तल विस्मृतवान्। आकाशवाचा ज्ञातशकुन्तलापरिणयप्रसङ्गो महर्षिकण्वो य शकुन्तलामृषि परिरक्षितां दुष्यन्तं प्रेषितवान् तदा मार्ग एव शचीतीर्थे तीर्थवन्द परायणायाः शकुन्तलाहायाः हस्तादङ्गुलीयं निपतितं न च ज्ञातं तया। दुष्यन्त तिरस्कृता सा सखिजननिर्देशानुसारं विवाहं स्मारयितुं प्रमाणरूपेण तन्नाम ङ्कितमङ्गुलीयकं प्रदर्शयितुमङ्गुलीं पश्यति तदा शून्यामङ्गुलीं दर्शं दर्शं शून्येव जाता, तदवधीरणां च प्राप्तवती।

मत्स्यगर्भान्निःसृतमङ्गुलीयकं राजनामाङ्कितं दृष्ट्वा राज्ञः समीपमानी राजपुरुषैः। तदवलोक्य ज्ञातशकुन्तलावृत्तान्तेन राज्ञा दुष्यन्तेन कश्यपाश्र शकुन्तलाधिगता।'

इत्यभिज्ञानविषयिणी घटना। अभिज्ञायतेऽनेनेति अभिज्ञानं चिह्नमि व्युत्पत्त्या अभिज्ञानस्य घटना (तद्विस्मरणं वा तेन ज्ञानं वा) प्रधानभू नाटके प्राणायिता चेति।

यद्यपि श[illegible]लापि साक्षात्प्रतिमूर्तिरिवास्ति घटनायाः। नाटके तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपयोगोऽपि जायते। दुष्यन्तेन सखीविषये पृष्टाऽनुसूया तदुत्पत्तिं वर्णयन्ती गुप्तामेकां घटनां विस्फोटयति—विश्वामित्रशारीरिकसम्बन्धेन मेनकायामुत्पन्ना पूर्वं तया सा उज्झिता पश्चाच्च शकुन्तैः परिवृता च कण्वेनाधिगता सती पालितेति। एवं 'शकुन्तैः लालिता शकुन्तला' इति व्युत्पत्तिदिशा शकुन्तला घटनास्वरूपैवास्ति तथापि सम्प्रतीयं प्रधाननायिकाऽस्ति नाटकस्य। 'शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम्' इति व्युत्पत्तिदिशा शकुन्तलाप्रणयप्रसङ्गस्यैवात्र प्रधानत्वाच्च शकुन्तलामप्यादायास्य नाटकस्य नामकरणं जातमिति।

'अभिज्ञायतेऽनेनेत्यभिज्ञानम्' 'शकुन्तैः लालिता शकुन्तला' 'शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम्' अभिज्ञानं च तत् शाकुन्तलम् अभिज्ञानशाकुन्तलम् इति व्युत्पत्तिं दर्शं दर्शं सिद्धमेवाभिज्ञानशाकुन्तलस्य समस्याप्रधानत्वम्, नायिकाप्रधानत्वं च। अतः समस्यां नायिकाञ्चादाय कृतमस्य 'अभिज्ञानशाकुन्तलम्' इति नामकरणं सर्वथा सफलमुचितञ्चास्ति।

महाभारतादिपर्वं अभिज्ञानशाकुन्तलकथानकस्य मूलमिति केचिद् विद्वांसः कथयन्ति। एवंवादिषु म० म० वासुदेवविष्णुमिराशीमहोदयस्य नामोपस्थापयितुं शक्यते। तन्मतानुसारमनन्तकथारत्नसागरभूतं महाभारतमेवास्य कथानकस्य मूलमस्ति।

(३) प्रश्नः—'काव्येषु नाटकं रम्यम्' इत्युक्तिः युक्तियुक्तं समीक्षणीया ?

उत्तरम्—शब्दार्थशरीरकस्य काव्यस्य काव्यत्वाधायकम्, तस्यालौकिकत्वसम्पादकम्, लौकिकविज्ञापनादिमये शब्दार्थे काव्यत्वनिवारकम्, आलोचकलोचनोपलोचनभूतम्, सहृदयहृदयावर्जकम् भवति किमपि विशिष्टं तत्त्वं काव्ये येनाह्लादिताः सहृदयाः अनन्यपरायणमानसीभूताः शब्दप्रधानवेदादिशास्त्रेभ्यः, अर्थतात्पर्यवत्पुराणेतिहासेभ्यश्च शब्दार्थोभयप्राधान्याप्राधान्याद् विलक्षणे सरसतया कान्तासम्मिततयोपदेशपरायणे, वेदव्याकरणन्यायादिकटुकौषधोपशमनीयस्य मोक्षाप्राप्तिरूपरोगस्य सितशर्करावच्छामके काव्ये विगलितवेद्यान्तरमानन्दमनुभवन्ति। यं प्राप्य च सुधामपि मुधा मन्यन्ते रसिकाः—

रसैः कथा यस्य सुधावधीरणी। नैष० १।३

एवञ्च 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणम्।

अतएव च काव्यस्य त्रिवर्गसाधनत्वम्—'त्रिवर्गसाधनं नाट्यम्' यद्वा पुरुषार्थचतुष्टयसम्पादनत्वम्—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव....................... ॥'

किञ्च—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्' ॥

इत्यादि काव्यप्रयोजनत्वेन प्रतिपादितमस्ति काव्यशास्त्रिभिरिति काव्यं सर्वथा ग्राह्यं परमावश्यकं च भवति ।

काव्यं नाम समाजोद्यानपुष्पमिति नापलापार्हमस्ति । यथा पुष्पोद्याने गुञ्जन्तो भ्रमराः पायं पायं पुष्पपरागं मत्ता भवन्ति स्वकीयस्य जीवनस्य सार्थकतां चानुभवन्ति तथैव सामाजिकेन केनचित् कृतम्, समाजस्यैव कृते तद्हृदयहार इव समर्पितम्, रमणीयार्थप्रतिपादकम्, समुचितललितसन्निवेशचारु काव्यं स्वकीयैस्तैस्तैः गुणैः समाजोद्याने बम्भ्रम्यमाणानां भौतिकवादधर्मसन्तप्तानां जनानां हृदये रसपरिसेकं समुपस्थापयन्, साहित्यापरपर्यायतया, साहित्यस्य च सकलशास्त्राणां समवायरूपत्वात्, विविधज्ञानपरिवर्धनाच्च परिमार्जनेन मानवजीवनस्य सार्थकतां प्रतिपादयति । अतएव—'रामादिवद् वर्तितव्यं न रावणादिवत्' इति कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशकारि इत्युच्यते ।

समाजे के के सम्बन्धाः कथं भवन्तीति—पितृ-पुत्रयोः, मातृ-पुत्रयोः, भ्रातृभ्रात्रोः भ्रातृ-भगिनिकयोः, मित्रयोः च सम्बन्धः कथं स्यात् गुरोः शिष्योपरि, शिष्यस्य गुरोरुपरि, परिजनानां प्रभुं प्रति, प्रभोः परिजनान् प्रति, राज्ञः प्रजाः प्रति, प्रजानां राजानं प्रति कथं व्यवहारः स्यादिति सर्वेषां सम्बन्धानां व्यवहाराणां चाकरो भवति काव्यमिति । काव्ये सामाजिकव्यवस्थातिरिक्तं किमपि न भवति । यद्यत् समाजे जायते तस्य तस्य प्रकृष्टं स्पष्टं च प्रतिपादनं काव्ये जायत इति सुष्पष्टमेव काव्यमहत्त्वमिति साहित्यस्य समाजादर्शत्वं प्रतिपादितमस्ति—

'साहित्य समाज का दर्पण है ।'

किञ्च—

'अन्धकार है वहाँ जहाँ आदित्य नहीं है ।
मुर्दा वह देश जहाँ साहित्य नहीं है ।'

इत्यादि वदन्तः सङ्गच्छन्ते ।

काव्यं धृतराजरूपमात्तदण्डं सत् क्वचित् कुमार्गप्रस्थितान् नियमयति, क्व-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चित् विवादं प्रशमयति, सदुपदेशैः क्वचिद् रक्षणाय कल्पते, अविनीतान् विनीतान् करोति, उत्साहयति निरुत्साहान्, द्रढयति भीरुकान्, अखर्वगर्वान्नपि खर्वान् करोति। किं वहुना यद्यत् असत्यम्, अशिवम्, असुन्दरञ्च भवति तत्तत् सर्वं सत्यं शिवं सुन्दरञ्च कल्पते इति 'सत्यं शिवं सुन्दरम्' इति भूत्वा 'रसो वै सः' इति रूपेण ब्रह्मणो रसरूपत्वेन काव्यस्य रसात्मकत्वेन च काव्यमपि ब्रह्मरूपतां व्यापकतां याति परमोपयोगि च मनुते। एवञ्च काव्यं लौकिकवस्त्वपेक्षया विशिष्टं महत्त्वपूर्णञ्च भवति।

तदिदं काव्यं दृश्यं श्रव्यञ्चेति भेदेन द्विधा विभक्तमस्ति काव्यशास्त्रिभिः। चक्षुरिन्द्रियग्राह्यं काव्यं दृश्यम्, श्रोत्रेन्द्रियग्राह्यं श्रव्यमित्युच्यते। अर्थाद् यत्र नटैः रङ्गमञ्चे उपस्थाप्यमानं रूपं दर्शं दर्शं रसमनुभवन्ति रसिकास्तत् दृश्यम्। यत्र तु श्रवणाभ्यां श्रावं श्रावमेव किमपि आह्लादमनुभवन्ति सहृदयास्तत् काव्यं श्रव्यमिति। अस्य नायं भावः यत् दृश्यकाव्ये केवलं चक्षुरिन्द्रियस्योपयोगो जायते तथा च श्रव्ये केवलं श्रोत्रेन्द्रियस्यैव, दृश्ये कथोपकथनगीतादीनां श्रवणार्थं श्रवणेन्द्रियस्य एवञ्च श्रव्ये पुस्तकस्य पठनार्थं चक्षुरिन्द्रियस्याप्युपयोगित्वात्। अपितु 'प्राधान्येन व्यपदेशा भवन्ति' इति सिद्धान्तं ध्यायं ध्यायं यत्र यस्य प्राधान्यं भवति तत्र तत् काव्यत्वमिति।

अनयोः दृश्यश्रव्यभेदयोः दृश्यं काव्यमधिकं रमणीयतरमिति आलोचकाः वदन्ति—'काव्येषु नाटकं रम्यम् इति। अत्र नाटकपदेन दृश्यं काव्यममीष्टमस्ति। यद्यपि नाटकं दृश्यकाव्यस्यान्यतमभेदोऽस्ति। दृश्यस्य रूपकोपरूपकत्वेन रूपकस्य च नाटकप्रकरणादिदशभेदेषु उपरूपकस्य तु नाटिकादि अष्टादशभेदेषु विभक्तत्वात्। तथापि एषु सकलेष्वपि भेदेषु नाटकं प्रधानम्। अतएव 'सर्वे पदाः हस्तिपदे निमग्नाः' इति लोकोक्तिदिशा सकलमपि दृश्यं काव्यमभीष्टं तथापि सामान्येन—'काव्येषु नाटकं रम्यम्' इत्यत्र नाटकमेवोक्तम्। अस्येदं कारणम्—श्रव्यकाव्ये ऐतिहासिकाः घटनाः केवलं श्रूयन्ते दृश्ये (नाटके) धृतरामादिरूपैः नटैः मञ्चे उपस्थापितासु सकलासु घटनासु घटनाः सहृदयमनसि पूर्णरूपेण सङ्घट्टन्ते तथा चैवं सुस्पष्टतां गतासु घटनासु सहृदयमनसि रसपरिपाकोऽपि समुचितरूपेण समधिकं च जायत इति उचितमेवोक्तम्—

'काव्येषु नाटकं रम्यम्' इति।

(४) प्रश्नः—अभिज्ञानशाकुन्तलमादाय 'उपमा कालिदासस्य' इत्युक्तिः विवेचनीया ?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

उत्तरम्—'कविकर्मकाव्यम्' इति काव्यलक्षणानुसारं कविः स्वेच्छानुरूपं काव्यनिर्माणं करोति। यथा प्रसिद्धः प्रजापतिः स्वतन्त्रोऽस्ति जगन्निर्माणायेति स्वेच्छानुरूपमेव कस्यापि निर्माणं करोति तथैव काव्यजगतः प्रजापतिः कविरपि काव्यनिर्माणाय स्वतन्त्रो भवति। अतएव 'निरङ्कुशाः कवयः' इत्यादिवदन्तः सङ्गच्छन्ते।

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥'

इत्यादिकाव्यप्रयोजनं दर्शं दर्शं यशःप्राप्तये कविः सर्वथा सावधानः सन् मदीयमिदं काव्यं काव्यत्वस्य परां कोटिमधिगच्छतु इति कामयमानः सकलकविकाव्येभ्यः स्वकीयस्य काव्यस्य विलक्षणतां प्रतिपादयितुं किमपि विशिष्टमेव तत्त्वं हस्तगतं करोति। यथा कश्चिद् अर्थगौरवम्, कश्चित् पदलालित्यम् स्वीकरोति, यथा—

'.........भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं......॥'

इत्यादि तथैव कविताविलासेन रससिद्धेनापि महाकविना कालिदासेन कवितावनिताऽलङ्कारभूता उपमैवाङ्गीकृता—

'उपमा कालिदासस्य'

इति।) यद्यपि महाकविनाऽनेनोत्प्रेक्षा-रूपक-समासोक्ति-विभावना-विशेषोक्ति-काव्यलिङ्गातिशयोक्ति-अप्रस्तुतप्रशंसाऽर्थान्तरन्यासाद्यलङ्काराणां प्रयोगः प्रशस्तरूपेण कृतोऽस्ति, तथापि अस्योपमायां यथा वैलक्षण्यं सूक्ष्मतत्त्वसन्निवेशश्च दृश्यते न तथाऽन्येष्वलङ्कारेष्विति आलोचनोपलोचनैरालोचकैः कालिदासस्योपमैव प्रशंसिताऽस्ति—'उपमा कालिदासस्येति।'

उपमायां चत्वार पादाः भवन्ति—उपमेयम्, उपमानम्, साधारणधर्मः, वाचकः शब्दश्चेति। उपमेयं प्रकृतं वर्णनीयं भवति, उपमानमप्रकृतम् अवर्णनीयञ्च भवति) प्रकृतस्य वर्णनीयस्य सुस्पष्टतां प्रतिपादयितुमेव अप्रकृतमवर्णनीयमुपमानमुपस्थापयति कविः। उपमानं सर्वथा प्रसिद्धं सर्वजनसंवेद्यञ्च भवति—इति तत्साहाय्येन अप्रसिद्धस्योपमेयस्य प्रतिपादनं करोति कविरिति काव्ये उपमायाः महन्महत्त्वमस्ति। अतएवोपमा सादृश्यमूलकानां सर्वेषामप्यलङ्काराणां जीवातुभूतेति मन्यते। कठिनस्य सूक्ष्मतरस्यापि तत्त्वस्य प्रतिपादने उपमा कवेः परमं साहाय्यं सम्पादयति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महाकवेः कालिदासस्य रचनासु अभिज्ञानशाकुन्तलं श्रेष्ठतरा रचनाऽस्तीति—

'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'

इत्यालोचकोक्तिभिः सिद्धम् । महाकविना कालिदासेन भारतीयायाः संस्कृतेः प्रतिपादनाय सर्वथोपमायाः उपयोगः कृतोऽस्तीति अभिज्ञानशाकुन्तलमपि उपमाविषये पश्चाद्वर्ति नास्ति ।

यद्यप्युपमायाः प्रयोगो नहि केवलं कालिदासेनैव कृतोऽस्ति । सर्वैरेव कविभिः उपमाप्रयोगः कृतोऽस्ति तथापि कालिदासीयोपमायां यथा वैलक्षण्यमस्ति न तथाऽन्येषाम् । कालिदासस्योपमायाः वैशिष्ट्यमस्ति—

१. सजीवस्य सजीवेनोपमा, २. सजीवस्य निर्जीवेनोपमा, ३. निर्जीवस्य सजीवेनोपमा, ४. निर्जीवस्य निर्जीवेनोपमा, ५. अमूर्तस्य मूर्तेनोपमा, ६. मूर्तस्य अमूर्तेनोपमा, ७. अमूर्तस्य अमूर्तेनोपमा, ८. मूर्तस्य मूर्तेनोपमा चेति ।

कालिदासीयोपमा कदाचित् शास्त्रम्, कदाचिच्च दर्शनमपि स्वविषयी करोति । अभिज्ञान शाकुन्तलतः एतेषामुदाहरणं यथा—

सजीवस्य सजीवेनोपमा यथा—मृगानुसारिणो राज्ञो मृगानुसारिणा पिनाकिनोपमाऽतीव सुस्पष्टाऽस्ति—

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥

पतिगृहं गन्तुमुद्यतां शकुन्तलामाशीर्वचसा सभाजयन् महर्षिकण्वः कथयति यत् त्वं स्वभर्तुस्तथैव बहुमता भव यथा ययातेः शर्मिष्ठा प्रियतराऽऽसीत् तथा यथा शर्मिष्ठा सम्राजं पुत्रं पुरुमवाप्तवती तथैव त्वमपि चक्रवर्तिनं पुत्रमवाप्नुहि—

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पुरुमवाप्नुहि ॥

अत्र शर्मिष्ठया शकुन्तलायाः उपमा सजीवस्य सजीवेनोपमायाः प्रकृष्टतरं निदर्शनमस्ति । प्रजा इव प्रजाः तन्त्रयित्वा श्रान्तमनाः विविक्तं निषेवतो राज्ञो दुष्यन्तस्य यूथानि सञ्चार्य शीते गुहास्थाने वर्तमानेन द्विपेन्द्रेणोपमा यथा—

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम् ।
यूथानि सञ्चार्य रविप्रतप्तः शीतं गुहास्थानमिव द्विपेन्द्रः ॥

सजीवस्य निर्जीवेनोपमा यथा—कविः राज्ञो मुखेन धृतवल्कलायाः शकुन्तलायाः कर्कशवृन्तजालबद्धया विकचसरसिजया कमलिन्योपमा कियच्च सत्कारमातनोतीति सहृदयाः विभावयन्तु—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

कठिनमपि मृगाक्ष्याः वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति ।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशं वृन्तजालम् ॥

शकुन्तलाशरीरस्य निर्जीवेन विटपादिनोपमा यथा—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

मालोपमारूपेणास्याः उपमायाः उपयोगो शकुन्तलारूपवर्णने यथा—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

निर्जीवस्य सजीवेनोपमा—कविः सूत्रधारमुखेन निर्जीवस्य गीतस्य मृगेनोपमा प्रतिपादयति—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥

निर्जीवस्य निर्जीवेनोपमा यथा–निर्जीवस्य क्षौमस्य निर्जीवेनेन्दुनोपमा यथा–

"क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतम्"

एवमेव निर्जीवस्य राज्यस्य निर्जीवेनातपत्रेणोपमा यथा—

नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥

एवमेवान्याः अपि उपमा द्रष्टव्याः सन्ति । अनेन चोपमाप्रयोगे अभिज्ञान-शाकुन्तलं किमपि विशिष्टमेव स्थानं बिभर्ति ।

(५) प्रश्नः—'अभिज्ञानशाकुन्तलस्य सामाजिकं विधानम्' इति विषयमादाय नातिविस्तरो निबन्धो लेख्यः ?

उत्तरम्—'काव्यं नाम समाजोद्यानपुष्पम्' इति कविः समाजादेव वस्त्वा-दाय काव्यस्य निर्माणं करोति, तथा च समाजायैव समर्पयतीति काव्यं समा-जस्य हारायितं जायते । ऐतिहासिकेषु काव्येषु इतिहासगृहीतेनापि वस्तुना यद्यपि कविः काव्यनिर्माणं करोति तथापि तात्कालिकस्य युगस्य, समयस्य, वातावरणस्य च प्रभावोऽवश्यमेव जायते । अतएव किमपि काव्यं दृष्ट्वा तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामाजिकस्थितेः ज्ञानं कर्तुं शक्यते । तात्कालिकं सामाजिकं संघटनम्, शासन-व्यवस्था, जातिव्यवस्था, संस्कारादिकं च कथमासीदिति सहजमेव ज्ञायते ।

अभिज्ञानशाकुन्तलस्याध्ययनेन तात्कालिकं समाजविधानमधोलिखित-रूपेण दृश्यते ।

वर्णव्यवस्था—तात्कालिकं सामाजविधाने वर्णव्यवस्थायामाश्रितमासीत् । सकलोऽपि समाज ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेति वर्णचतुष्टये विभक्त आसीत् । तत्समये द्विविधा ब्राह्मणा आसन् । एके ग्रामे निवसन्तो ब्रह्मवृत्तिमाचरन्तिस्म । एवंविधेषु ब्राह्मणेषु राज्ञः पुरोहितोऽस्ति ।

अन्ये एवमासन् ये नगरपरिभवान् विमोक्तुं नगरग्रामादिकं परित्यज्या-रण्येषु निवसन्तिस्म । एतेषां कर्म केवलम्—अध्ययनाध्यापनम्, यजन-याजनम्, दानञ्चेति । प्रतिग्रहग्रहणे तेषां बुद्धिर्नासीदिति नगरवासिभ्यो ब्राह्मणेभ्यस्ते भिन्ना आसन् । एतेषु ब्राह्मणेषु महर्षिकण्वः तच्छिष्याश्चासन् ।

शासनव्यवस्था—अभिज्ञानशाकुन्तले राजतन्त्रस्य सङ्केतो दृश्यते । यद्यपि राजो मन्त्रिपरिषद् भवतिस्म । मन्त्रिषु विभागानां वितरणमासीत् । स्वस्व-विभागस्य पालनं तेषां कर्त्तव्यमासीत् । यथा राजा शकुन्तलासखीनां समक्ष-मात्मानं धर्माधिकारित्वेन प्रस्तौति किन्तु राजा सर्वोपर्यासीत् । तस्यादेश एवान्तिम आसीत् । दण्डाधिकारी तु राजा स्वयमेवासीत् । यदा गृहीत राजमुद्राङ्किताङ्गुलीयको धीवरो राजपुरुषैः गृहीतस्तदा स दण्डार्थं राजश्याल-केन राज्ञः समक्षमेवोपस्थापितः ।

तात्कालिकी शासनव्यवस्थाऽतीवप्रशस्ताऽऽसीत् । न तु अपथं भजतिस्म न च कश्चिदपकृष्टोऽप्यपथमाश्रयतिस्म । यथा कथयति कण्वशिष्यः—

> महाभागः कामं नरपतिरभिन्नस्थितिरसौ
> न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ॥

दण्डविधानं कठिनमासीत् । यदा शकुन्तला भ्रमरेण बाधिता सञ्जाता तदा राजा स्वयमुपस्थितः सन्—

'आः !'

> कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
> अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥

इति कथयति । अनेन ज्ञायते यद् तात्कालिकं दण्डविधानं कठिनतरमासीत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

धार्मिकस्थितिः—तस्मिन् समये सर्वे वर्णाः स्वस्वधर्माचरणे निरता आसन्। धार्मिकक्रियाः ब्राह्मणानामुपरि निर्धारिता आसन्। ब्राह्मणानां यज्ञयागादिक्रियाः केवलं स्वार्थायैव नासन् अपितु—

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥"

इति सिद्धान्ते आश्रिताः आसन्। ब्राह्मणैः अरण्यवासिभिः वा कृतानां धर्म्याणां क्रियाणां फलं अनेकेषु भागेषु विभक्तं सत् अनेकेभ्यः प्राप्यतेस्म, तस्य षष्ठो भागो राज्ञो भवतिस्म। यथा राज्ञः कथनादेव ज्ञायते—

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम्।
तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः॥

संस्काराः—षोडशसंस्कारेषु केवलं विवाहस्यैव वर्णनमभिज्ञानशाकुन्तले दृश्यते। अतएवात्र विवाहस्यैव केवलं प्रतिपादनं क्रियते—

विवाहः—अभिज्ञानशाकुन्तले विवाहसंस्कारविषये अनेके सङ्केताः दृश्यन्ते। तेऽत्र क्रमशः उपस्थाप्यन्ते—

बहुविवाहः—तस्मिन् समये समाजे बहुविवाहप्रथा प्रचलिताऽऽसीदिति ज्ञायते। राज्ञो दुष्यन्तस्याप्यनेकाः पत्न्यः आसन्। यथा शकुन्तलामाश्वासयितुं राजा स्वयमेव कथयति—

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररसना चोर्वी सखी च युवयोरियम्।

सर्वत्र राज्ञः पत्नीषु बहुवचनस्यैव प्रयोगोऽस्ति। यथा अनसूयावचने—

'बहुवल्लभाः खलु राजानः श्रूयन्ते।'

महर्षिणा कण्वेन दुष्यन्तायोपदेशे—

'सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया।'

विदूषकं प्रति राज्ञो वचने—

'चपलोऽयं ब्राह्मणवटुः कदाचिदिमामस्मत्प्रार्थनामन्तःपुरिकाभ्यो निवेदयेत्।'

राजानस्तु कदाचित् विवाहानन्तरं सकृदेव प्रणयं कृत्वा परित्यजन्तिस्म पत्नीं पुनः कदापि तया सह सङ्गमसुखं न सम्पादयन्तिस्मेति अभिज्ञानशाकुन्तलस्य पञ्चमाङ्के हंसवतीवृत्तान्तेन ज्ञायते। यथा—

अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽस्येनां कथम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति हंसवतीगीतिकायाः अक्षरार्थं भावयन् राजा कथयति—

'सकृतकृतप्रणयोऽयं जनः, इत्यक्षरार्थः ।'

गान्धर्वविवाहः—विवाहस्य बहुषु विधिषु तदा गान्धर्वविवाहप्रथा विशेषतो दृश्यते । रहसि सञ्जाते प्रणये गान्धर्वेण विधिना विवाहो जायतेस्म । अस्य विवाहस्य ज्ञानं वरवधूसम्बन्धिनां पश्चाज्जायतेस्म । यथा महर्षिणा कण्वेन दुष्यन्तोपदेशवाक्येन ज्ञायते—

'त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।'

रहसि परिणयसूत्रे बद्धयोस्तयोः पितृभ्यां स्वीकृतिरपि जायतेस्म । यथा राजा कथयति—

गान्धर्वेण विवाहेन बह्व्यो मुनिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः ॥

अस्यां गान्धर्वविवाहप्रक्रियायां कामपत्रस्यापि महत्त्वपूर्णं योगदानं भवतिस्म । यथा शकुन्तलया नलिनीपत्रे नखेनार्पितेन कामपत्रेण दुष्यन्तेन सह विवाहे साफल्यमाप्तमिति ।

सवर्णविवाहः—समानवर्णस्य वरस्य समानवर्णया कन्यया सह विवाहः सवर्णविवाह इत्युच्यते । तात्कालिके समाजे सवर्णविवाहस्य प्रथाऽऽसीत् । ब्राह्मणकन्यया सह क्षत्रियस्य विवाहो न जायतेस्म । यथा शकुन्तला प्रेमपाश-बद्धोऽपि दुष्यन्तः सर्वथा विचारयति यदियमस्माकं विवाहयोग्या वा न वेति । महर्षिणः सा कण्वस्य ब्राह्मणस्य पुत्रीति ध्यायं-ध्यायं विवाहे बाधितो जायते । कदाचित् स—

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।'

इति विचारयति तथा 'कदाचिदियं कुलपतेः सवर्णक्षेत्रसम्भवा भवेत्' इति विचार्य निराशो भवति किन्तु अप्सरःसम्भवैषेति ज्ञात्वा तु पुनः विवाहे निश्चयो जायते । अनेन ज्ञायते तदा सवर्णविवाहस्य अनुलोमविवाहस्य वा प्रथा आसीत् । अनुलोमविवाह ब्राह्मणः सर्ववर्णाभिः कन्याभिः क्षत्रियः क्षत्रियवैश्यशूद्राभिः वैश्यो वैश्यशूद्राभ्याम् शूद्रस्तु केवलं शूद्रयेति विवाहः कर्तुं शक्नोतिस्मेति ।

समाजे नारीणां स्थितिः—कन्याभावे कन्यकाः पितृगृहे निवसन्तिस्म । किन्तु विवाहानन्तरं तासां पतिगृहगमनमावश्यकमासीत् । कन्याधनं परकीयमस्ति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इति सामान्येन सर्वेषां मनसि आसीत् । विवाहानन्तरं पितृगृहे कदाचिदेव कन्या-नामागमनं भवतिस्म । यथा—

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ।।

इत्यनेन ज्ञायते । तात्कालिके समाजे नारीणां काचित् सुदृढा स्थिति-र्नासीत् । विवाहोऽपि सरल आसीत् परित्यागोऽपि । यथा शकुन्तलया सह घटि-तम् । यदि शापवृत्तान्तो निष्काषयेत् तदा राज्ञा तया सह विवाहः कृतः, अरण्य-निवासकाले तया सह शारीरिकः सम्बन्धोऽपि कृत, किन्तु पश्चात् न स्वीकृत-स्तया सह विवाहः । पुरोहितेन कृतं समाधानम्—'इयमस्मद् गृहे तिष्ठतु यद्यस्याः पुत्रः चक्रवर्तिलक्षणोपेतः स्यात् तदा पत्नीत्वेनेमां स्वीकरिष्यति, अन्यथा स्वेच्छानुसारं गमिष्यति ।'

यदि सा पुत्रमुत्पादयिष्यति पुत्रोऽपि चक्रवर्ती स्यात्तदा तत्स्वीकारः समाजे नारीणां दयनीयः स्थितिं प्रतिपादयति ।

दायाधिकारः—बन्धुबान्धवेभ्यः पुत्रपत्नीभ्यः उत्तराधिकाररूपेण प्राप्तं ध-दाय इति कथ्यते । पितुर्धनस्योत्तराधिकारी पुत्रो भवतिस्म पुत्राभावे पत्नी पुत्रपत्न्योरभावे कुटुम्बिनः । प्रेमिकागर्भशिशुरपि दायस्याधिकारी भवतिस्म यथा सन्तानरहितस्य धनवृद्धिनामकस्य वणिजो विषये राज्ञो निर्णयेन ज्ञायते यस्य कोऽपि न भवतिस्म तस्य दायाधिकारी राजा भवतिस्मेति तस्मिन् विषये मन्त्रिनिर्णयेन ज्ञायते ।

एवं तात्कालिकं समाजविधानं सुदृढं समुचितञ्चासीदिति ।

(६) प्रश्नः—कालिदासस्य प्रकृतिचित्रणम् समुपवर्णनीयम् ?

उत्तरम्—लोकोत्तरवर्णनानिपुणकविकर्मभूते काव्ये रमणीयतामाधा-कविसमयत्वेन बहूनि तत्त्वानि सन्ति निर्धारितानि काव्यभावनापरिपक्वहृद-सहृदयैः । प्रकृतिः मानवमात्रस्य चिरसङ्गिनी भवति । मानवः प्रकृते-सुरम्यक्रोडे एवोत्पन्नो जायते तथा च पश्चात् प्रकृतिक्रोडे एव विलीनो जाय-सम्पूर्णे स्थावरजङ्गमात्मके लोके प्रकृतेः व्यापकः प्रभावो दृश्यते । यदि प्रकृ-धृतनटीरूपा विविधरूपेण न परिवर्तेत् तदा मानवजीवनं पूर्णरूपेण असमञ्ज-नीरसं च स्यात् । कल्पनाविषयी क्रियतां यदि सर्वदा वर्षा वर्षैव स्यात्, शिशि-शिशिरं वा यद्वा ग्रीष्मस्योष्मैव स्यात् सर्वदा तदा मानवजीवनेऽप्येकरूप-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नीरसता, किंकर्तव्यविमूढता, जडता वा स्यात्। प्रकृतिः नानारूपेण सर्वदा नवं नवं रूपं धृत्वा कमनीया कामिनीव मोहयति मनांसि मानवानाम्, तथा च नवनवोत्साहस्य कर्त्तव्यपरायणायतायाश्च सञ्चारं करोति। यत्रत्यं प्राकृतिकं वातावरणं यथा प्रशस्तं स्यात् तत्रत्यानां मानवानां वैज्ञानिकक्षेत्रे, सांस्कृतिकक्षेत्रे, आध्यात्मिकक्षेत्रे वा तथैवोन्नतिः भवतीति प्रत्यक्षमेवास्ति।

भारतवर्षमेवैकं तथा देशोऽस्ति यत्र विविधर्तुरूपेण प्रकृतेस्तथा परिवर्तनं जायते। अतएवात्रत्यं दर्शनं सदृढं सुसमृद्धञ्चास्ति। प्रकृतिपरिवर्तनं दर्शनशिक्षणायातीवोपयोग्यस्ति। यथा अभिज्ञानशाकुन्तले एव प्रातःकाले एकतः सूर्यः उदेति, अपरतश्चौषधीनां पतिश्चन्द्रमाऽस्तशिखरं यातीति तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत यत् सर्वेषां सर्वदा समाना दशा न भवति—

> यात्येकतोऽस्तशिखरं पतिरोषधीना-
> माविष्कृतोऽरुणपुरःसरमेकततोऽर्कः।
> तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
> लोको नियम्यत इवात्म दशान्तरेषु॥

दर्शनप्रधानस्य भारतवर्षस्य संस्कृतिरेव दर्शनप्रधानाऽस्तीति काव्यमपि दर्शनप्रभावरहितं न जातम्। अतएव काव्यस्य प्रत्येकास्वपि विधासु कविसमयख्यातिरिव प्रकृतिवर्णनमप्यावश्यकं तत्त्वं सञ्जातमस्ति। एवञ्च महाकाव्येऽवश्यं वर्णनीयेषु विविधविधेषु तत्त्वेषु प्रकृतिवर्णनमप्यन्यतममस्ति। यथा महाकाव्यलक्षणे—

> सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।
> प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः॥

इत्यादि अवश्यं वर्णनीयत्वेन प्रतिपादितानि सन्ति।

प्रकृतिः मानवजीवने रमणीयताधानं करोतीति निश्चितम् इयं प्रकृतिः यदा कर्तुमकर्तुमन्यथाकर्तुं सर्वथा समर्थेन, सर्वं हस्तामलकवत् प्रत्यक्षीकुर्वता कविना महाकविना वा वर्णनविषयीक्रियते तदा द्विगुणितश्चमत्कारो जायते काव्ये। अतएव न्यूनाधिकरूपेण सर्वैरेव कविभिः महाकविभिः वा स्वस्वकाव्येषु प्रकृतिवर्णनं क्रियत एव।

अभिज्ञानशाकुन्तलमपि प्रकृतिवर्णनतोऽस्पृष्टं नास्ति यतो हि कालिदासस्तु प्रकृतेः वरदपुत्रोऽस्ति। प्रकृतेः कणं कणं कविताविलासे कालिदासे तथा च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

कालिदासस्य प्रत्येकमपि क्षणं प्रकृतिक्रोडे एव दृश्यते । यथा तस्य ऋतुसंहा मेघदूतखण्डकाव्यां ज्ञायते । अभिज्ञानशाकुन्तलं कालिदासस्य सर्वोत्कृ रचनाऽस्ति । यथोक्तमस्ति काव्यालोचकैः—

'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् ।' इति ।

अतएवाभिज्ञानशाकुन्तलेऽपि महाकविना कालिदासेन प्रकृतिसाम्राज्यमेवं पस्थापितमस्ति । अभिज्ञानशाकुन्तलस्य प्रारम्भः प्रकृतिक्रोडत (कण्वाश्रमतः एव जायते तथा अन्तोऽपि प्रकृतिक्रोडे (मरीच्याश्रमे) एव जायते । अभिज्ञा शाकुन्तलकथानकं भागत्रये विभक्तुं शक्यते । अभिज्ञानशाकुन्तलस्य रङ्गमञ्च ऽपि प्रथमं कण्वाश्रमे, ततः परं दुष्यन्तस्य राजधान्यां हस्तिनापुरे, पश्चा मरीचेः आश्रमे दृश्यत इति त्रिषु मञ्चेषु मञ्चद्वयमाश्रमे (प्रकृतिक्रोडे) ए दृश्यते ।

अभिज्ञानशाकुन्तलस्य प्रधाननायिका शकुन्तला साक्षाद् धृतनायिका प्रकृतिरिवास्ति तथा च पूर्णरूपेण प्रकृतेः प्रातिनिध्यं करोति । यथा तन्नाम्नै स्पष्टमस्ति 'शकुन्ताः पक्षिणः ...ः लालिता शकुन्तला' इति । अप्सरःसम्भवं तयोज्झिता शकुन्तैः लालिता पश्चात् कण्वेन पोषिता च सती अभिज्ञानशा न्तलस्य प्रधाननायिका सञ्जाता ।

अभिज्ञानशाकुन्तले मानवजीवनेन सह पूर्णं तादात्म्यं स्थापितमस्ति सर्वप्रथमं शकुन्त... सखिभिः सहाश्रमवृक्षकान् परिसिञ्चन्ति दुष्यन्तस्य नय गोचरी भवति । यदेका सखी शकुन्तलां कथयति—

'हला शकुन्तले ! त्वत्तोऽप्याश्रमवृक्षकाः तातकण्वस्य प्रियतरा इति त याभि । येन प्रकृतिपरिपेलवापि त्वमेतेषामालवालपरिपूर्णे नियुक्ता ।' इति

तदाऽस्योत्तररूपेण शकुन्तला यत् कथयति—

'नहि तातनियोग एव, ममापि सहोदरस्नेहः एतेषु' इति । किञ्च यदा अनसूया शकुन्तलां कथयति—

'हला शकुन्तले ! इयं तातकण्वेन त्वमिव स्वहस्तेन संवर्द्धिता माध लता, तत् कथमिमां विस्मृतासि ?'

तदा शकुन्तलोत्तरयति—'तदात्मानमपि विस्मरिष्यामि ।' एवञ्च मेव शकुन्तलाया लतासु भगिनिकास्नेहः वृक्षेषु च सोदर्यभ्रातृस्नेह इति । एव शकुन्तलायाः पतिगृहगमनावसरे वनस्पतिभिः शकुन्तलायै तथाऽऽभूषण प्रदानं कृतं यथा सहोदराः भगिनिकायै कृते कुर्वन्ति यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥

शकुन्तलायाः शरीरमेव नहि केवलं प्रकृतिप्रतिरूपमस्ति—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

अपि तु शकुन्तलायाः सान्निध्येन लतासनाथ इव चूतवृक्षः सञ्जायते । यथा तत्सखी शकुन्तलां कथयति—

'हला ! शकुन्तले ! इहैव तावन्मुहूर्तं तिष्ठ, त्वया युक्तः लतासनाथ इव चूतवृक्षः प्रतिभाति ।'

एवं प्रकृत्या शकुन्तलायाः शकुन्तलया च प्रकृतेः शोभा भवतीति सिद्धम् । आश्रमवृक्षकेषु शकुन्तलायास्तथा प्रेमास्ति यथा तेष्वसिक्तेषु सा जलमपि पातुं न व्यवस्यति तथा च प्रियमण्डनापि स्नेहेन पल्लवानि नादत्ते । कुसुमानां प्रसूतिसमये शकुन्तलायाः एव प्रथममुत्सवो जायते—

'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः' इत्यादि ।

अतएव महर्षिः कण्वः शकुन्तलायाः पतिगृहगमनार्थं वृक्षेभ्योऽनुज्ञां गृह्णाति—

'सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

तरवोऽपि सचेतना इव कोकिलारावेण तामनुज्ञां ददन्ति—

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरात्मनः ॥

प्रकृतेः मानवीकरणं कालिदासीयप्रकृतिचित्रणस्य परमं वैशिष्ट्यमस्ति । सर्वेऽन्ये कवयः प्रकृतेः वर्णनं कुर्वन्ति स्वेषु काव्येषु, किन्तु कालिदासकाव्येषु प्रकृतिः क्रीतदासीव पात्रवदाचरति । एवञ्च कदाचित् तरवोऽनुज्ञायन्ते शकुन्तलां पतिगृहगमनाय । कदाचित् शकुन्तलायाः पतिगृहगमनवेलायां लता अपि अश्रूणि परित्यजन्ति, मृग्यो दर्भकवलमुद्गिरन्ति, मयूर्यो नर्तनं परित्यजन्ति—

उद्गीर्णदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

नहि केवलं लता एवाश्रूणि मुञ्चन्ति अपि तु मृगपोतोऽपि तस्याः पट सज्जते मार्गञ्चावरुणद्धि—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टि परिवर्धित को जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥

प्रकृतेः आलम्बनम्, उद्दीपनं चोभयमपि रूपं कालिदासस्याभिज्ञानशा न्तले दृश्यते। प्रकृतेः आलम्बनरूपमस्ति शकुन्तला, या खलु दुष्यन्तेन प्रथ दर्शने एवान्तःपुरिकाभ्योऽपि प्रियतरा दृष्टा—

शुद्धान्तदुर्लभमिदं वपु आश्रमवासिनो यदि जनस्य।
दूरीकृता खलु गुणैरुद्यानलता वनलताभिः॥

एवं कालिदासदृष्ट्या प्रकृतिक्रोडे विहरन्नेव मनुष्यो जीवनस्य पूर्णमानन्दम भवति। कृत्रिमताया वातावरणे जीवनमपूर्णं नीरसं च जायत इति प्रकृतौ वास्तविकस्य सौन्दर्यस्य दर्शनं जायत इत्यस्यैव प्रतिपादनं 'शुद्धान्तदु इत्यादिना कृतमस्ति।

प्रकृतेरुद्दीपनरूपं तु सर्वत्रैव दृश्यते। यदा पवने सञ्चालिते सति पल्लवे कम्पनं जायते तदा शकुन्तला 'एष वातोरितपल्लवाङ्गुलिभिः व्याहरतीव चूतवृक्षः' इति प्रतिजानाति।

कालिदासप्रकृतिः सर्वथा मङ्गलम् अमङ्गलञ्च पूर्वमेव सूचयति। माधवीलता यदि मुकुलिता जायेत्तदा शकुन्तलायाः सौभाग्यमनुकूलं स्यादि सखीवार्तालापेन ज्ञायते—

"शकु०—असमये खल्वेषा आमूलात् मुकुलिता माधवीलता। उभे—स सत्यं सत्यम्? शकु०—सत्यं किं न प्रेक्षेथे? प्रियं—सखि! तेन हि प्रति ते निवेदयामि। शकु०—किं मे प्रतिप्रियम्? प्रियं—आसन्नपाणिग्रहण त्वम्।......श्रुतं मया तातकण्वस्य मुखात् तवकल्याणसूचकम् एतन्नि मिति।"

अनेन ज्ञायते कालिदासेनाभिज्ञानशाकुन्तले प्रकृतेः सुरम्यं चित्रण कृ स्तीति।

(७) प्रश्नः—अभिज्ञानशाकुन्तले अङ्गिरसपरिपाको विवे नीयः?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तरम्—रमणीयार्थप्रतिपादकशब्दरूपस्य काव्यस्य प्रत्येकास्वपि विधासु रसस्य स्थितिः प्रायो निश्चिताऽस्ति काव्यशास्त्रिभिः। यथा शरीरे आत्मा भवति अन्ये च तदङ्गानि भवन्ति तथैव रसात्मकवाक्ये काव्ये (वाक्यं रसात्मकं काव्यम्) रस आत्मा भवति। रसेष्वपि नवविधेषु एको रसोऽङ्गी अन्ये चाङ्गरूपेण प्रतिपादिता भवन्ति। नाटकानां कृते नाट्यशास्त्रिभिः निश्चितं कृतमस्ति शृङ्गारवीरयोरन्यतरः कश्चिदङ्गी रसो भवेत्। अन्ये च रसा अङ्गरूपेणोपनिबन्धनीया इति—

'एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसा सर्वे.....................॥' इति।

अभिज्ञानशाकुन्तले सम्भोगशृङ्गारो रसोऽङ्गी अस्ति, विप्रलम्भशृङ्गारः, वीरः, अद्भुतः, करुणः, हास्यः, भयानकः, रौद्रः, वात्सल्यश्चेति रसा अङ्गरूपेण कवितावनिताहासेन काव्यकलाविलासेन महाकविना कालिदासेनोपनिबद्धाः सन्ति।

ननु नाट्यशास्त्रीयग्रन्थेषु सामान्येन नाटकेषु शृङ्गारस्याङ्गित्वं निरूपितमस्ति। शृङ्गारस्तु द्विविधः—संयोग (संभोग) शृङ्गारः, वियोग (विप्रलम्भ) शृङ्गारश्चेति भेदात्। अनयोः कोऽपि रसोऽङ्गी भवितुमर्हति। अत्र तु अभिज्ञानशाकुन्तले द्वयमप्यस्ति सम्भोगोऽपि विप्रलम्भोऽपि। तर्हि कथं सम्भोग एवात्राङ्गी विप्रलम्भ एव कथं नाङ्गी जात इति? प्रश्नोऽयमुचितोऽस्ति बहुभिरप्यालोचकैरत्र विप्रलम्भ एवाङ्गित्वेन निरूपितोऽस्ति। किन्तु रसस्याङ्गित्वनियमिकैका व्यवस्था भवति। नाटकस्यान्ते यस्य रसस्य सहृदयमनसि प्रभावो जायते तथा च काव्यस्याधिकतरे भागे यस्य प्राबल्यं भवति स एव रसोऽङ्गी भवतीति सामान्यो नियमः। अस्मिन् नाटके अभिज्ञानशाकुन्तले अन्ते दुष्यन्तशकुन्तलयोः सम्मिलनं जायते, तथा च तृतीयसप्तमाङ्कयोः सम्भोगस्यैव प्राबल्यमस्तीति सम्भोगशृङ्गार एवाङ्गी रसः विप्रलम्भस्तु अङ्गरूप इति।

सम्भोगशृङ्गारः (अङ्गी)—सम्भोगशृङ्गारस्तु श्रवणदर्शनचुम्बनालिङ्गनाद्यनेकविधो भवति। अत्र श्रवणानुरागस्याभिव्यक्तिस्तदा जायते यदा मृगमनुसरन् राजा कण्वाश्रमं प्राप्य वैखानसैः प्रार्थितः सन् विनीतवेषेणाश्रमं प्रविशन् आश्रमवृक्षकान् परिसिञ्चन्तीनां शकुन्तलादीनां वार्तालापे सख्यौ उद्दिश्य शकुन्तलयोक्तम्—'इत इतः प्रियसख्यौ' इति शृणोति। तस्याः प्रथमवाक्येनैव प्रभावितो राजा तस्याः वाणीं प्रशंसयति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

'नहि केवलमाकृतिरेव वागप्यस्याः मधुरा।' इति

वाक्यश्रवणानन्तरं दुष्यन्तमनसि दर्शनानुरागो जायते। आश्रमवृक्षका परिसिञ्चन्तीनां तासां शकुन्तलादीनां रूपं दर्शं दर्शं राजा कथयति—'अहो मधुरमासां दर्शनम्।' तासु शकुन्तलायाः रूपं तु अन्तःपुरिकानामपि नायिकान रूपमतिक्रमत इति तन्मनसि भावना जायते—

शुद्धान्तदुर्लभमिदं वपुः आश्रमवासिनो यदि जनस्य।
दूरीकृता खलु गुणैरुद्यानलता वनलताभिः॥

राजा भूयो भूयः शकुन्तलां पश्यति। कदाचित्तु—

'इदं किलाव्याजमनोहरं वपुः'

इत्याद्युक्त्वा तपःक्षमं तां साधयितुमुद्यतं महर्षिणं कण्वं निन्दयति। कदाचि घृतवल्कलाया अपि तस्याः रूपं प्रशंसयति—

'सरसिजमनुविद्धं शैवलेनापि रम्यम्'

इत्यादिः। शकुन्तलायाः स्वविवाहयोग्यत्वमनुचिन्तयति 'कदाचिदियं कुलपते सवर्णक्षेत्रसम्भवा भवेदि'ति निराशो जायते, पश्चाच्च अप्सरःसम्भवैषेति ज्ञात हर्षप्रकर्षमनुभवन् तस्याः स्वविवाहयोग्यत्वं निर्धारयति—

भव हृदय! साभिलाषं सम्प्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्॥ इति।

शकुन्तलाया अपि स्थितिस्तथैवास्ति। सा कामज्वरेणातीव सन्तप्ताऽस्ति-

समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु॥

सर्वाण्यप्युपचारकर्माणि निष्फलानि सन्ति। अन्तः सखीभ्यां पृष्टा शकुन्तल आत्मन अस्वस्थतायाः कारणत्वेन राजानं कथयति। तदा सखीभ्यामनुमता शकु न्तला कमलिनीपत्रे नखैः कामपत्रं लिखति—

तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रिमपि।
निर्घृण! तपति बलीयस्त्वयि वृत्तमनोरथानि अङ्गानि॥

एवञ्चोभयं प्रति उभयोः अनुरागे प्रकटे सति गान्धर्वेण विवाहविधि परिणयसूत्रे बद्धौ सञ्जाताविति। ततश्च दिनं दिनं तयोः दुष्यन्तशकुन्तलयो प्रणयप्रसङ्गो जायते। राजा शकुन्तलायाः परिचर्यां करोति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम् ।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु यथासुखं ते ।।

पुष्पशय्यायां तया सह सहवासं करोति—

अपराधमिमं ततः सहिष्ये यदि करभोरु तवाङ्गसङ्गमीष्टे ।
कुसुमास्तरणे क्लमापहेऽत्र स्वजनत्वादनुमन्यसेऽवकाशम् ।।

कदाचित् मुखमारुतेन नेत्रपतितं पुष्पपरागमुद्रधूयति । कदाचित् तन्मुखगन्धाघ्राणेनैवसन् तुष्टो जायते, कदाचिच्च—'असन्तोषे पुनः किं करोति ?' इति शकुन्तलया पृष्टः 'इदम्' इत्युक्त्वा यद्यद् वाञ्छति तत्तत् सर्वं करोति । तृतीयाङ्कस्येदं स्थानं सम्भोगश्रृङ्गारस्य पार्यन्तिकं रूपमस्ति ।

यद्यप्यतः परमपि—'अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः' इत्यादि तथा च—

'रहः प्रत्यासत्तिं यदि सुवदना यास्यति पुनः
न कालं हास्यामि प्रकृतिदुरवापा हि विषयाः ।।

इत्यादि कथयति । तथापि तत्सम्भोगपरिणामेन शकुन्तला गर्भवती सञ्जाता, यस्य स्पष्टीकरणं चतुर्थाङ्के आकाशवाचा जायते—

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन् ! अग्निगर्भां शमीमिव ।।

इति । आश्रमं परित्यज्य राजधानीं गच्छन् राजा स्वनामाङ्कितमङ्गुलीयकं शकुन्तलायाः हस्ते—

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत्प्रिये मदवरोधनिदेशवर्ती
नेता जनस्तव समीपमुपैष्यतीति ।।

इत्युक्त्वा स्वयमेव परिधापयति ।

दीर्घकालिक वियोगानन्तरं पुनः सप्तमाङ्के तयोः सम्मेलनं काश्यपस्याश्रमे जायते यदा देवेन्द्रसाहाय्यं कृत्वा प्रत्यागच्छन् राजा तदाश्रमं गतः । सम्मितौ च तौ पुत्रेण भरतेन सह राजधानीमागताविति संभोगश्रृङ्गारस्य साम्राज्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

मस्ति अभिज्ञानशाकुन्तले। अयमेव चाङ्गीति नाटके व्यापकत्वात् सहृदयमनसि समधिकप्रभावोत्पादकत्वाच्चेति।

(८) प्रश्नः—अभिज्ञानशाकुन्तले अङ्गरसाः विवेचनीयाः ?

उत्तरम्—अभिज्ञानशाकुन्तले विप्रलम्भश्रृङ्गारः वीरोऽद्भुतः करुणो हास्यो भयानको रौद्रो वात्सल्यश्चेति अङ्गरसाः सन्ति। एषु—

विप्रलम्भश्रृङ्गारः—तृतीयेऽङ्के एव शकुन्तलाया हस्ते स्वनामाङ्कित-मङ्गुलीयकं परिधाप्य राजा यदा राजधानीं गतस्तत एव विप्रलम्भस्य प्रारम्भो जायते चतुर्थपञ्चमषष्ठाङ्के विप्रलम्भ एव परिपाकतां गतोऽस्ति। चतुर्थ-पञ्चमाङ्कयोस्तु दुर्वाससः शापवशात् शकुन्तलाया वियोगस्य परिज्ञानमेव नासीद् राज्ञः, पश्चाच्चाङ्गुलीयकप्राप्त्यनन्तरं दुष्यन्तमनसि विप्रलम्भस्योद्वेगो जातः। अभिज्ञानशाकुन्तले षष्ठाङ्के एव राज्ञो मनसि विप्रलम्भस्य प्रबलः प्रवाहोऽस्ति।

शकुन्तलावियोगानलदन्दह्यमानमानसेन राज्ञा मधूत्सवः प्रतिषिद्धोऽस्ति—'मा तावदनात्मज्ञे ! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ! दुष्यन्तस्येदं शासनं तरुभिरपि प्रमाणीकृतमस्ति—

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुबकं तत् कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ॥

शकुन्तलावियोगेन दुःखितस्य राज्ञो दशा एकेनैव श्लोकेनातीवप्रशस्तरूपेण वर्णितमस्ति कविना—

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥

शकुन्तलां स्मारं स्मारं राजा समधिकं दुःखमनुभवति।

शकुन्तलापि तथैव पतिवियोगेन धृतैकवेणी शरीरकेशसंस्कारादिकं न करोति। यथा राजा तां दृष्ट्वा कथयति—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वीरो रसः—अभिज्ञानशाकुन्तलस्य द्वितीयेऽङ्के, तृतीयाङ्कस्यान्ते सप्तमाङ्कस्य प्रारम्भे च वीररसस्य परिपाको दृश्यते। द्वितीयाङ्के कण्वशिष्यमुखेन वीररसस्य सजीवं वर्णनं कृतमस्ति कविना—

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते समितिषु सुरा सक्तवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे॥

तृतीयाङ्के राक्षसानां नियमने तस्य वीरता साकारतां याति, यदा कश्चिद् ब्रह्मचारी कथयति—

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि विघ्नान् व्यपोहति॥

सप्तमाङ्के तु राक्षसानां विनाशं कृत्वा देवासुरसङ्ग्रामे इन्द्रस्य साहाय्यं करोति।

अद्भुतो रसः—अभिज्ञानशाकुन्तलस्य सप्तमाङ्कस्य प्रारम्भे यत्र रथमार्गस्य आकाशतो मातलिरथावतरणस्य वर्णनमस्ति तत्र विस्मयस्थायिभावकोऽद्भुतो रसोऽस्ति। यथा—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः।
सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥

करुणो रसः—अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्कः करुणरसात्मकोऽस्ति। यद्यपि करुणस्य स्थायीभावोऽस्ति शोकः। शोकस्तु मरणादिजन्माचित्तवृत्तिविशेषोऽस्ति। अत्र कोऽपि मृतो नास्ति तथापि शकुन्तलायाः पतिगृहगमनवेलायां सर्वमेव वातावरणं शोकाकुलमस्ति। मृग्यो दर्भकवलं न गृह्णन्ति, मयूर्यो नर्तनं नैव कुर्वन्ति, किं बहुना शकुन्तलावियोगेन लता अपि अश्रूणि मुञ्चन्ति पुटकिनीपत्रान्तरितां प्रियां व्याहृतोऽपि चक्रवाको नैव व्याहरति, अपि तु शकुन्तलायामेव दृष्टिं ददाति। यथा अनसूया कथयति—

पुटकिनीपत्रान्तरितां व्याहृतोऽपि न खलु व्याहरति प्रियाम्।
मुख उद्व्यूढमृणालस्त्वयि दृष्टिं ददाति चक्रवाकः॥

शकुन्तलाप्रस्थानेन यदि वनौकसोऽपि, ज्ञानवान्नपि महर्षिकण्वो वैक्लव्यं गतः—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथन्नु तनया विश्लेषदुःखैर्नवैः ।।

हास्यो रसः—अभिज्ञानशाकुन्तलस्य द्वितीयाङ्के यदा विदूषको मृगयां निन्दति, अङ्गभङ्गविकलः सन्—'एतावतापि तथा पीडा नास्ति यथाऽयं गण्डस्योपरि पिटकः संवृत्तः—ममाधन्यतया राज्ञा शकुन्तला नाम तापसकन्या दृष्टा । तां दृष्ट्वा नगरगमनस्य वार्तामपि न करोति' इति कथयति तत्रत्यं सकलं वृत्तान्तं हास्यरसात्मकमस्ति ।

यदा राजा तं साहाय्यार्थं कथयति तदा—'किं मोदकखादिकायाम् ?' इति कथयित्वा हासं करोति । राज्ञा प्रशंसितायां शकुन्तलायाम्—'तर्हि लघु लघु गच्छतु भवान् । यथा कस्यापि इङ्गुदीतैलचिक्कणशीर्षस्य हस्ते मा गमिष्यति ।' तथा च अन्तःपुरिकासु सत्सु तापसकन्यायां तवाभिलाषस्तथैवास्ति —'यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिड्यामभिलाषो भवति' इति कथयति । सर्वमिदं परिहासात्मकमस्तीति एषु स्थलेषु हास्यरसस्य परिपाकः ।

भयानको रसः—अभिज्ञानशाकुन्तले भयानकरसस्तदा दृश्यते यदा प्रथमाङ्के मृगमनुसरन् राजा मृगे सन्निकृष्टे सति तदुपरि बाणसन्धानं कर्तुमिच्छति तदा स ग्रीवाभङ्गं कृत्वा भूयो भूयः स्यन्दनमवलोकयति, शरपतनभयात् पश्चार्द्धेन भूयसा पूर्वकायं प्रविष्टो जायते, अर्धचर्वितमपि दर्भं परित्यजति, उदग्रप्लुतिं च करोति—

ग्रीवाभङ्गाभिरामं मुहरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।

अत्र मृगनिष्ठभयस्याभिव्यक्तेः भयानको रसः ।

रौद्रो रसः—अभिज्ञानशाकुन्तले रौद्ररसस्य समावेशस्तदा दृश्यते यदा चतुर्थाङ्के दुर्वासा शकुन्तलां क्रूरं शपति—

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥

वात्सल्यो रसः—अभिज्ञानशाकुन्तले स्नेहस्थायिभावस्य वात्सल्यरसस्य परिपाकस्तदा दृश्यते यदा सप्तमाङ्के देवेन्द्रसाहाय्यं कृत्वा परावर्तितो राजा दुष्यन्तो मरीच्याश्रमे सिंहशिशुना क्रीडन्तं कुमारं सर्वदमनं (भरतं) दृष्टवान् । तं क्रोडमुत्थाप्य परमं सुखमनुभवन् राजा कथयति—

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रे सुखिता ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद्
यस्यायमङ्गात् कृतिनः प्रसूतः ॥

एवं प्रायः सर्वेऽपि रसा अत्राङ्गत्वेन समुपनिबद्धाः सन्ति ।

(९) प्रश्नः—नाट्यशास्त्रदृष्टचा अभिज्ञानशाकुन्तलस्य समीक्षणं क्रियताम् ?

उत्तरम्—एकस्य तिष्ठति कवेर्गृह एव काव्य-
मन्यस्य गच्छति सुहृद्भवनानि यावत् ।
न्यस्याविदग्धवदनेषु पदानि शश्वत्
कस्यापि सञ्चरति विश्वकुतुहलीव ॥

इति राजशेखरोक्तिदिशा समुचितललितसन्निवेशचारु काव्यं सकलेषु भुवनेषु तदा सञ्चारमाप्नोति यदा तत् आलोचकभावयित्रीभावनानिकषोपलकषितं सत् स्वकीयमुत्कृष्टत्वं ख्यापयेत् । यद्यपि कविताविलासो महाकविः कालिदासः स्वयं नाट्यविधानप्रयोगनिपुणोऽस्ति, यथा नटी कथयति—

'सुविहितप्रयोगतयाऽऽर्यस्य न किमपि परिहास्यते ।'

तथापि यावद् विदुषां परितोषो न स्यात्तदा प्रयोगविज्ञानं विज्ञानं नैव भवति—

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥

इति सूत्रधारोक्त्या सुस्पष्टमस्ति ।

अभिज्ञानशाकुन्तलमेकं नाटकमस्ति । अस्य उत्कृष्टता तदा सेत्स्यति यदा नाट्यशास्त्रदृष्ट्येदमुत्कृष्टं स्यात् । नाटकलक्षणमस्ति—

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् ।
विलासद्धर्यादिगुणवद्युक्तं नानाविभूतिभिः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सुखदुःखसमुद्भूतिर्नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ।।
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ।।
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ।।
चत्वारो पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ।।

एतल्लक्षणानुसारं नाटके मुख्यरूपेण येषां तत्त्वानां समावेशो भवति ते सन्ति—

१—कथानकम्, पञ्चसन्धिसन्निवेशः २—अङ्काः ३—नायकः ४—अङ्गी-रसः ५—पात्राणि ।

कस्यापि नाटकस्य समीक्षणमेमिरेव तत्त्वैः कर्तुं शक्यते । अतः क्रमशः एकैकमादायाभिज्ञानशाकुन्तलस्य समीक्षणं क्रियते—

१. कथानकम्—अभिज्ञानशाकुन्तलस्य कथानकमितिहासप्रसिद्धं महाभारत गृहीतमस्ति । यद्यपि दुर्वाससः शापादिकं मूलकथानके नास्ति तथापि यथा चित्रकारो रेखां कृत्वा पश्चाद् रङ्गैः रञ्जयति चित्रं तु हृद्यं करोति तथैव कविरपि इतिहास प्रसिद्धं कथानकमादाय रसरङ्गैः रञ्जयित्वा सहृदयहृदयास्वाद्यं करोति काव्यम् । कथावस्तुदृष्ट्या अभिज्ञानशाकुन्तलं नाटकमतीवोदात्तमस्ति ।

२. अङ्काः—नाटकं पञ्चाङ्कान्न्यूनं दशाङ्कादधिकं च न भवति । अभिज्ञानशाकुन्तले सप्ताङ्काः सन्ति । एवं नाटकमिदं नातिसंक्षिप्तं नातिविस्तृतञ्चास्ति । यद्यपि अभिज्ञानशाकुन्तलं समस्याप्रधानमेकं नाटकमस्ति । अत्रत्या समस्यास्ति अङ्गुलीयकमभिज्ञानमिति । तत्तु अभिज्ञानभूतमङ्गुलीयकं पञ्चमाङ्कान्ते एव राजपुरुषैः धीवरहस्ते प्राप्तं राज्ञः समक्षमुपस्थापितम् । एवं राज्ञा प्राप्तेऽङ्गुलीयके तत्रैव नाटकस्य समाप्तिरुचिता तथापि षष्ठसप्तमाङ्कयोः कथानकं कविना भारतीयनाट्यशास्त्रदृष्ट्या सुखान्ततां प्रतिपादयितुमेव कृतमस्ति ।

यद्वा मनुष्यो यद्यदकृत्यं करोति तस्य प्रायश्चित्तं पश्चात्तापेन जायते । दुष्यन्तेनाकृत्यं कृतमस्ति शकुन्तलायाः परित्यागः । तस्य शोधनार्थं पश्चात्तापरूपेण पञ्चमषष्ठाङ्कस्यातीवावश्यकताऽऽसीदिति कविना तद्विधानं कृतम् । यथा-यथा दुष्यन्तो रोदिति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अस्मात्परं बत यथाश्रुतिसंभृतानि
को नः कुले निवपनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुसेकमुदकं पितरः पिबन्ति ॥

इति तथा तथा तस्य कालुष्यं पवित्रं जायते यस्य फलरूपेण स पुनः शकुन्तलां पुत्रं भरतं च प्राप्नोतिस्मेति औचित्यदृष्ट्यापि षष्ठसप्तमाङ्कयोः आवश्यकताऽस्ति ।

३. नायकः—प्रख्यातवंशो राजर्षिः धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥

इति नाट्यशास्त्रीयवचनानुसारं नाटकस्य नायकेन प्रख्यातवंशीयेन राजर्षिणा, धीरोदात्तगुणान्वितेन, दिव्येनाऽदिव्येन दिव्यादिव्येन वा भवितव्यम् । अभिज्ञानशाकुन्तलस्य नायको दुष्यन्तोऽस्ति यः खलु प्रख्याते पुरुकुले उत्पन्नोऽस्ति—'जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।' इति तथा च राजर्षिरस्ति, यथा कण्वशिष्यः कथयति—'पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ।' इति ।

अभिज्ञानशाकुन्तलस्य नायको दुष्यन्तो धीरोदात्तोऽस्ति—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥

इति धीरोदात्तनायकस्य सर्वे गुणास्तत्र यथावद् दृश्यन्ते ।

एवं च नायकदृष्ट्याऽपि नाटकमिदं प्रशस्यतरमस्ति ।

४. अङ्गीरसः—'एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।'

इति नाट्यशास्त्रदिशा अभिज्ञानशाकुन्तले शृंगारस्यान्तर पक्षः संयोगशृङ्गारोऽङ्गीरसोऽस्ति । शृङ्गाररसो रसराजोऽस्ति । अस्याङ्गित्वेन नाटकमिदं चमत्कृतमस्ति । अन्ये विप्रलम्भशृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, अद्‌भुतः वात्सल्यश्चेति रसा अङ्गभूताः सन्ति ।

५. पात्राणि—नाटकस्याभिनेयतासौविध्याय पात्राणां न्यूनतोपयुक्ता मताऽस्ति । यथा—

चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः । अस्मिन् अभिज्ञानशाकुन्तले दुष्यन्तः, कण्वः, विदूषकश्चेति त्रीणि पुरुषपात्राणि शकुन्तला, गौतमी, सख्यौ चेति चत्वारि स्त्री पात्राणि प्रमुखानि सन्ति । अतः पात्रन्यूनतया नाटकमिदमभिनेयमस्ति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

६. **सन्धयः**—पञ्चसन्धिसमन्वितत्वं नाटकस्यान्यतमं तत्त्वमस्ति—'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्' इति लक्षणात्। अभिज्ञानशाकुन्तले मुख-प्रतिमुख-गर्भावमर्श-निर्वहणसन्धयः समुचितरूपेणोपनिबद्धाः सन्ति। प्रथमाङ्कतः प्रारभ्य द्वितायाङ्के—'उभौ परिक्रम्योपविष्टौ' इति यावत् मुखसन्धिरस्ति। द्वितीयाङ्के—'सखे ! माधव्य ! अनाप्तचक्षुः फलोऽसि' इत्यतः प्रारभ्य तृतीयाङ्कान्तं यावत् प्रतिमुखसन्धिरस्ति। चतुर्थाङ्कतः प्रारभ्य पञ्चमाङ्के गौतम्युक्ति यावद् गर्भसन्धिरस्ति। पञ्चमाङ्के—'राजा—शकुन्तलां निर्वर्ण्य, आत्मगतम्' इत्यत आरभ्य षष्ठाङ्कान्तं यावत् अवमर्शसन्धिरस्ति। सप्तमाङ्कस्यारम्भतोऽन्तं यावत् निर्वहणसन्धिरस्ति।

केषांञ्चिन्मतानुसारं प्रथमाङ्के मुखसन्धिः, द्वितीयतृतीययोः प्रतिमुखसन्धिः, चतुर्थपञ्चमाङ्कयोः गर्भसन्धिः, पञ्चमाङ्कस्याङ्कावतारे षष्ठाङ्के चावमर्शसन्धिः, सप्तमाङ्के च निर्वहणसन्धिरस्ति।

एतदतिरिक्तं नाट्यावस्थानाम् अर्थप्रकृतीनां च समुचितरूपेण विधानमभिज्ञानशाकुन्तले दृश्यते। यथा—

नाट्यावस्थाः—आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्चेति पञ्चानामपि नाट्यावस्थानां प्रयोगोऽभिज्ञानशाकुन्तले समुचितरूपेण दृश्यते। एषु 'फलसिद्धये औत्सुक्यमारम्भः, फलप्राप्तये प्रयत्नः यत्नः, फलप्राप्तेः सन्दिग्धावस्था प्राप्त्याशा, फलसिद्धौ विघ्नविनाशः फलप्राप्तिनिश्चिन्तता नियताप्तिः, समग्रफलप्राप्तिश्च फलागम इत्युच्यते।

अभिज्ञानशाकुन्तलस्य प्रथमाङ्के 'अपि नाम कुलपतेरसवर्णक्षेत्रसम्भवा भवेत्' इति राजानि शकुन्तलाप्राप्त्यौत्सुक्यात् आरम्भः, द्वितीयाङ्कतस्तृतीयाङ्कान्तं यावदुभाभ्यामपि पक्षाभ्यामुभयोः प्राप्तये प्रयत्नः क्रियत इति यत्नः, चतुर्थेऽङ्के दुर्वाससः शापात् शकुन्तलाप्राप्तये विघ्नस्य सद्भावात् संदिग्धावस्थया प्राप्त्याशा, पञ्चमाङ्कस्याङ्कावतारे अङ्गुरीयकप्राप्त्या शकुन्तलाप्राप्तिनिश्चयात् नियताप्तिः, सप्तमाङ्कान्ते च सपुत्राया शकुन्तलायाः प्राप्त्या फलागम इति पञ्चानामप्यवस्थानां समुचितं विधानमस्ति।

अर्थप्रकृतयः—नाट्यतत्त्वेषु अर्थप्रकृतीनां महन्महत्त्वमस्ति। एताः अर्थप्रकृतयः 'प्रयोजन सिद्धिहेतवः' इत्युच्यन्ते। एता अर्थप्रकृतयः पञ्चसंख्याकाः सन्ति—वीजम्, विन्दुः, पताका, प्रकरी कार्यञ्चेति। अभिज्ञानशाकुन्तले एतासां सन्निवेशो यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रथमाङ्के—'इदानीमेव''सोमतीर्थं गतः' इति वैखानसोक्तिः शाकुन्तलस्य बीजमस्ति। द्वितीयाङ्के—'सखे ! माधव्य ! अनाप्तचक्षुःफलोऽसि' इत्यतः 'सर्वः खलु कान्तमात्मानं पश्यति' इति विदूषकोक्ति यावत् बिन्दुरस्ति। विदूषकवृत्तान्तं पताकाऽस्ति, यतो हि विदूषकः क्वापि फलप्राप्तौ राज्ञः साहाय्यं न करोति। यद्वा शापवृत्तान्तमङ्गुरीयकवृत्तान्तं वा पताकेति। इन्द्रसारथेः मातलेः वृत्तान्तं प्रकर्यस्ति। दुष्यन्तशकुन्तलयोः सप्तमाङ्के पुनर्मिलनं मुख्यं कार्यमस्ति।

एतत्सर्वं दर्शं दर्शं दाढ्र्येन कथयितुं शक्यते यत् नाट्यशास्त्रदृष्ट्या अभिज्ञानशाकुन्तलमेकं प्रशस्तं नाटकमस्तीति।

(१०) प्रश्नः—काव्यकलादृष्ट्या अभिज्ञानशाकुन्तलस्य समीक्षणं क्रियताम्।

अथवा

अभिज्ञानशाकुन्तलनाटकस्य साहित्यिकं मूल्याङ्कनं क्रियताम्।

अथवा

अभिज्ञानशाकुन्तलस्य काव्यगतं वैशिष्ट्यं प्रतिपाद्यताम्।

अथवा

'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'।

इत्युक्तिः सम्यग्विवेचनीया।

अथवा

संस्कृतसाहित्ये अभिज्ञानशाकुन्तलस्य स्थानं विवेचनीयम्।

उत्तरम्—अभिज्ञानशाकुन्तलस्य समीक्षणम्, साहित्यिकं मूल्याङ्कनं वैशिष्ट्यप्रतिपादनं वा अधोलिखितरूपेण कर्तुं शक्यते—

१. शब्दार्थयोजना—रमणीयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति काव्यसामान्यलक्षणम्। रमणीयता च लोकोत्तराह्लादजनकतेति। एवञ्च यत्र यत्र लोकोत्तराह्लादजनकत्वं तत्र तत्र काव्यत्वमिति व्याप्त्या लोकोत्तराह्लादजनकत्वं काव्यजीवातुभूतमिति काव्यनिर्माणपरायणाः कवयः सर्वथा प्रयतन्ते स्वकीये काव्ये आह्लादजनकतामाधातुम्। तदेव काव्यं काव्यं भवति यत् खलु सहृदयहृदये किमपि प्रभावं स्थापयेत्। स्वकीये काव्ये प्रभावोत्पादकतामानेतुं कविः काव्यस्य प्रत्येकस्मिन्नप्यंशे सावधानो भवति। काव्यांशाः सन्ति—काव्यशरीरभूतौ शब्दार्थौ, आत्मभूतो रसः, उत्कर्षाधायकाः गुणा अलङ्काराश्च, अवयवसंस्थानभूताः रीतयः इत्यादि। यथोक्तं काव्यमीमांसायां राजशेखरेण काव्यपुरुषप्रकरणे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

"शब्दार्थौ ते शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, अलङ्का[रा] कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत् ।" इत्यादि ।

लौकिके विज्ञापनादावपि शब्दोऽर्थश्च भवतः । किन्तु रमणीयार्थप्रतिपाद[क]शब्दत्वं रसात्मकं वाक्यत्वं वा काव्यत्वमिति रमणीयस्यार्थस्य प्रतिपाद[न]सामर्थ्यशालिनां शब्दानाम्, शब्दानुकूलकविविवक्षाविषयानुकूलानाञ्चार्था[नां] योजना कविकाव्यकुशलतानिकषायमाणा तिष्ठति । अर्थस्य रमणीयता[यां] सहृदयहृदय एव प्रमाणमस्ति । वाच्यार्थापेक्षया व्यङ्ग्यार्थ एव सहृदजनसं[वेद्य] इति प्रत्यक्षमेवास्ति । इदमेव च काव्यस्य काव्येतरशब्दार्थाद् भेदकमस्ति[।] यथोक्तं वाग्देवतावतारेण मम्मटेन काव्यप्रकाशे—

'रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यम्'

इति यद्वा—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥

अर्थानुकूलशब्दयोजना तथा कविविवक्षानुकूलार्थयोजनैव कस्यापि कवेः महाक[वि]त्वलाभाय भवति—

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥

एवं शब्दार्थयोजनायां महाकविः कालिदासोऽतीवनिपुणोऽस्ति । [त]शब्दार्थयोः सैव स्थितिः कवेरभिमताऽस्ति या परस्परं संपृक्तयाः पार्वतीपरमे[श्वर]योरस्ति । अभिज्ञानशाकुन्तले एवंभूतयोः शब्दार्थयोः प्रशस्यतरः प्रयोगोऽ[स्ति] प्रमाणरूपेणैकं लघुतरं वाक्यमुपस्थाप्यते यत् खलु लताकुञ्जे वर्तमा[नयोः] शकुन्तलादुष्यन्तयोः गौतमीसमागमनसूचकं सखीभ्यामुक्तम्—

'चक्रवाकवधूः ! आमन्त्रयस्व सहचरम्, ननु उपस्थिता रजनी ।'

अत्र चक्रवाकवधू इत्यनेन शकुन्तला सम्बुध्यते सहचरपदेन दुष्यन्तः, [र]पदेन च गौतम्युक्ताऽस्ति । अत्रेदमभिव्यज्यते यत् शकुन्तलादुष्यन्तयोः प्रेम स[]चक्रवाकपक्षियुगलमिवास्ति । दुष्यन्तस्तु क्षणं क्षणं शकुन्तलामेवानु[]कदाचित् साक्षात् कर्मणा कदाचिच्च भावनयेति सहचरपदाभिव्यक्तिः । समागतायां रजन्यां चक्रवाकयोः वियोगो जायते तथैव गौतम्यां समाग[तायां] शकुन्तलादुष्यन्तयोरपि पार्थक्यं भविष्यतीति गौतम्याः प्रतिपादने रज[नी] कियत्समर्थमस्तीति सहृदया विभावयन्तु ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतेषां पदानामभिव्यञ्जना शकुन्तलया झटित्येव गृहीतम्, तथा च दुष्यन्तो लतास्वन्तरित इति। पुनश्च गौतम्या सहोटजं गच्छन्त्या शकुन्तलया यथा राजा सम्बोधितः—

'लतागृह ! सन्तापहर ! आमन्त्रयामि त्वां पुनरपि परिभोगार्थम् ।'

सामान्येऽपि स्थले लघुतरैरपि वाक्यैः श्लोकैः वा एवंभूतशब्दार्थयोजना प्रतिपादिताऽस्ति कविना । यथा—

'धूमोपरुद्धदृष्टेरपि यजमानस्य पावकमुख एवाहुतिर्निपतिता' वत्से सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृता ।'

मनोभावनादशावर्णने कालिदासोऽतीवनिपुणोऽस्ति—

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

अत्र गच्छति, धावति इति क्रियापदम्, असंस्तुतमिति चेतोविशेषणम्, प्रतिवातं नीयमानेन चीनांशुकेनोपमाविधानं चातीवविषयानुकूलमस्ति । अतएव केनचित् कालिदासः प्रशंसितोऽस्ति—

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥

२. रसयोजना—रसोऽस्ति काव्यस्यात्मा । यथोक्तमग्निपुराणे—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।' इति ।

'एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।'

इति नाट्यशास्त्रानुसारमत्राभिज्ञानशाकुन्तले संयोगशृङ्गारोऽङ्गी रसोऽस्ति, अन्ये विप्रलम्भशृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाऽद्भुत-वात्सल्यरसाश्चाङ्गरूपेणोपनिबद्धाः सन्ति ।

महाकविः कालिदासो रससिद्धः कवीश्वरोऽस्ति । अतएव रसपरिपाकेऽनेनातीवसाफल्यमाप्तमस्ति । यस्य रसस्य योजना कविना कृतास्ति स रसः साक्षादिव तत्रोपस्थितोऽस्ति । संयोगशृङ्गारे शृङ्गारोऽपि शृङ्गारिकतामनुभवति ।

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम् ।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु ! यथा सुखं ते ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

पुष्पशय्याया एकभागोपविष्टेन राज्ञा दुष्यन्तेन प्रियासमागमसुखमनुभवता यत्कैङ्कर्यमाचरितं तत्तु श्रीकैङ्कर्यमिव सर्वथा पूरयति मनोरथानि सहृदयानाम्।

वियुक्तयोः तयोः वियोगोऽपि विमनायमानतां याति—

अनेन लीलाभरणेन ते प्रिये ! विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया ॥

इति राज्ञा शकुन्तलानिन्दामुखेन कविः सर्वथा निन्दयति कामिजनमर्जनायानलायमानं वियोगमिति। शकुन्तलावियोगानलेन दन्दह्यमानहृदयो राजा यथा यथा व्याकुलतामनुभवति तथा तथा सहृदयानां हृदयमपि तथा ग्लानिमनुभवति यथा दिवसेन शशाङ्को ग्लपितो जायते—

तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥

शृङ्गारातिरिक्तं करुणो रसोऽभिज्ञानशाकुन्तलेऽतीवप्रबलोऽस्ति। चतुर्थाङ्के करुणरसः साकारतां गतोऽस्ति। आश्रमललामभूता, कण्वस्य द्वितीयोच्छ्वासेव वर्तमाना, प्रकृतिपुत्री शकुन्तला पतिगृहं यातीति। अनेन नहि केवलं महर्षिः कण्व एव—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

इति दुःखितोऽस्ति, अपि तु आश्रमस्य कणं कणमपि दुःखनिमग्नमस्ति। क्वचित् मृगी अर्द्धचर्वितमपि दर्भकवलं शकुन्तलागमनवृत्तान्तेन दुःखिता सती उद्गिरति, मयूराः नर्तनं परित्यजन्ति, लता पाण्डुपत्ररूपेणाश्रुपातं कुर्वन्ति—

उद्गीर्णदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः ॥

मृगपोतो भूयो भूयः शकुन्तलायाः पटान्ते सज्जते, न च तन्मार्गं जहाति—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आश्रमपदे कोऽप्येवं नास्ति यः खलु शकुन्तलावियोगेन दुःखितो नास्ति । यथाऽनसूया कथयति—

'सखि ! आश्रमपदे नास्ति कोऽपि चित्तवान्, यस्त्वया विरह्यमाणो न ताम्यति । प्रेक्षस्व तावत्—

पुटकिनीपत्रान्तरितां व्याहृतोऽपि न खलु व्याहरति प्रियाम् ।
मुख उद्व्यूढमृणालस्त्वयि दृष्टिं ददाति चक्रवाकः ।।

एवमेवान्येऽपि रसाः परिपाकतां गताः सन्ति ।

३. अलङ्कारयोजना—महाकविना कालिदासेनाभिज्ञानशाकुन्तले रसानुगतप्रकृष्टन्यासरूपोऽनुप्रासः, अनुपमा उपमा, अनुत्प्रेक्षावती उत्प्रेक्षा, समासोक्त्यर्थान्तरन्यास काव्यलिङ्ग-विभावनाविशेषोक्ति विरोधाभासरूपक-दीपक तुल्ययोगितादयोऽलङ्काराश्चोपनिबद्धाः सन्ति यैः कालिदासस्य कवितावनिता स्तीवसमलङ्कृताऽस्ति । तथापि अस्योपमा सहृदयहृदये किमपि विशेषं वैशिष्ट्यमुपस्थापयति । यथा—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि ।।

किञ्च—

कठिनमपि मृगाक्ष्याः वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति ।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशं वृन्तजालम् ।।

अर्थान्तरन्यासो यथा—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।

एवमन्येषामप्यलङ्काराणां प्रशस्ता योजनाऽभिज्ञानशाकुन्तले दृश्यते ।

४. गुणयोजना रीतियोजना वा—काव्ये गुणाः शौर्यादिवदुत्कर्षाधायकाः रीतयश्चावयवसंस्थानविशेषत्वेनाभिमताः सन्ति । समासाऽसमासत्वमादाय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रायो गुणानां रीतीनां च समानैव स्थितिरस्ति। यथाऽसमासोऽल्पसमासो वा माधुर्यं गुण इति कथ्यते तथैव वैदर्भी रीतिरपि। कालिदासेनाभिज्ञानशाकुन्तले क्वापि ओजोगुणस्य, शब्दाडम्बरस्य, दीर्घसमासस्य च योजना नैव कृताऽस्तीति सर्वत्र प्रसादस्य माधुर्यस्य च गुणस्य वैदर्भीरीतेश्च साम्राज्यमस्ति। पदशैय्या सर्वत्र सरला, मधुरा, मनोहरा चास्तीति महद्वैशिष्ट्यमस्ति शाकुन्तल-नाटकस्य।

५. प्रकृतिवर्णनम्—अभिज्ञानशाकुन्तले प्रकृतेः आलम्बनमुद्दीपनञ्चेत्युभयमपि रूपं सुस्पष्टतयोपनिबद्धमस्ति। प्रकृतेः आलम्बनरूपेणास्ति शकुन्तला, शकुन्तैः पक्षिभिः लालितेति व्युत्पत्त्या प्रकृतिपुत्रीत्वात्। उद्दीपनरूपमस्ति लता-कुञ्जादिकम्। अभिज्ञानशाकुन्तलीय प्रकृतिवर्णनस्य वैशिष्ट्यमस्ति यदत्र प्रकृतिर्नैव केवलं वर्णिताऽस्ति, अपि तु स्वयं पात्रवदाचरति। यथा—

१—'एष वातेरितपल्लवाङ्गुलिभिः मां व्याहरतीव चूतवृक्षः।'

२—'अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।'

इत्यादि।

६. सौन्दर्यवर्णनम्—नायिकासौन्दर्यवर्णने नाटकमिदं कस्यापि काव्यस्य पश्चाद्वर्ति नास्ति। यथा—

१—अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

२—'सरसिजमनुविद्धं शैवलेनापि रम्यम्' इत्यादि।

३—'अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः' इत्यादि।

एवमेभिर्विशेषणैः नाटकमिदं नहि केवलं कालिदासकाव्येष्वेव—

'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'

प्रशंसितमस्ति अपि तु सम्पूर्णेऽपि संस्कृतसाहित्ये शीर्षस्थानभूतं शिरोरत्नवत् च ख्यातख्यातमस्ति—

'काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला'। इति।

(११) प्रश्नः—अभिज्ञानशाकुन्तलनाटकस्य कथानकस्य स्रोतो मूलाधारं वा युक्तियुक्तं समुपवर्णयत ?

उत्तरम्—'नाटकं ख्यातवृत्तं स्यात्'

इति नाट्यशास्त्रिभिः प्रतिपादितं नाटकलक्षणं दर्शं दर्शमिदं सिद्धं यन्नाटक

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कथानकस्य स्रोतसा (मूलाधारेण) प्रसिद्धेनैतिहासिकेन भवितव्यम् । नीरसं शुष्कमितिहासरेखाचित्रमादाय कविः नवनवोन्मेषशालिन्या प्रतिभातूलिकया स्वमनोऽनुकुलं नानारसरङ्गरञ्जितं कृत्वा समुचितललितसन्निवेशचारुतया रमणीयार्थप्रतिपादकतया च सरसं सर्वथा हृद्यं च विधाय अलौकिकरसरसिकानां काव्यभावनापरिपक्वहृदयानां सहृदयानाञ्च समक्षमुपस्थापयति किमपि नाटकमिति प्रत्यक्षमेवास्ति । अस्त्यभिज्ञानशाकुन्तलमेकं नाटकम् । अतोऽस्यापि कथानकेनैतिहासिकेनावश्यमेव भाव्यमिति ध्यायं ध्यायं किमस्ति स्रोतो मूलाधारं वाऽभिज्ञानशाकुन्तलस्येति स्वाभाविकः प्रश्नः ।

अभिज्ञानशाकुन्तलस्य कथानकमूलस्य कृतायां विवेचनायां ज्ञायते यत् अस्य कथानकस्य मूलं महाभारतं वा स्यात् पद्मपुराणं वा । महाभारतपद्मपुराणयोः अभिज्ञानशाकुन्तलीयकथायाः दर्शनात् । रामायणीयः प्रभावो वा अस्य कथानकस्य मूलमित्यपि केचित् कथयन्ति ।

महाभारतम्—महाभारतादिपर्वं अभिज्ञानशाकुन्तलकथानकस्य मूलमिति केचिद् विद्वांसः कथयन्ति । एवं वादिषु म० म० वासुदेवविष्णुमिराशीमहोदयस्य नामोपस्थापयितुं शक्यते । तन्मतानुसारमनन्तकथारत्नसागरभूतं महाभारतमेवास्यकथानकस्य मूलमस्ति । महाभारतस्यादिपर्वणि ६७ अध्यायतः ७४ अध्यायं यावत् १८ अष्टादशस्वध्यायेषु शकुन्तलोपाख्यानं समुपवर्णितमस्ति । ३०० श्लोकेषु वर्णिते शकुन्तलोपाख्याने शकुन्तला-दुष्यन्तप्रेमोपवर्णनमेवं दरीदृश्यते—

'एकदा चन्द्रवंशी राजा दुष्यन्तो मृगयां मृगमनुसरन् महर्षेः कण्वस्याश्रमं जगाम । आश्रमं गत्वा स कण्वमाह्वयत् किन्तु तमाश्रमे नासीत् महर्षिः कण्वः । स समित्फलाद्युपाहारणाय वनं गत आसीत् । तस्य धर्मपुत्री शकुन्तला दुष्यन्तस्य स्वागतं व्याजहार । राज्ञा पृष्टा सती सा विश्वामित्रात्स्वोत्पत्तिकथानकमखिलं तं श्रावयामास ।

इयं क्षत्रियकन्यकाऽस्तीति ज्ञात्वा राजा तां प्रति स्वकीयमनुरागं प्रकटयामास । मदीय एव पुत्रो राजा भविष्यतीति पणेन शकुन्तला तेन राज्ञा सह स्वकीयं गान्धर्वविवाहं स्वीकृतवती । मदनन्तरं तवैव पुत्रो राजा भविष्यतीति राज्ञा स्वीकृते सति तयोः विवाहो जातः । शकुन्तलया सह सहवासं च कृत्वा राजा स्वनगरं जगाम । गच्छन् स शकुन्तलां समाश्वासितवान् यत् कतिपयैरेव दिवसैः ससैन्योऽहं त्वामतो नेष्यामि । मार्गे गच्छन् राज्ञो मनसि 'मत्कृतं शकुन्तलाविवाहं श्रुत्वा न जाने महर्षिः किं करिष्यतीति' भीतिरप्यासीत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

गते राजनि वनात् प्रतिनिवृत्तो जातो महर्षिः कण्वः। तपोबलेन स ज्ञात्वा स शकुन्तलाविवाहमङ्गीतवान्। शकुन्तला वने एव निवसन्त्यासीत् वर्षत्रयानन्तरं शकुन्तला एकं पुत्रमजीजनत्। षड्वर्षदेशीय एव स त बलवान् पराक्रमी चासीत् यथा व्याघ्रसिंहादीनां हिंसकपशूनाम्, भयङ्करा गजमहिषादीनां च बन्धने समर्थो जात इति, तत्पराक्रमं दर्शं दर्शं महर्षिणा स दमन इति तन्नाम चकार।

एवं नौवर्षं यावत् शकुन्तला आश्रमे एव निवसितवती किन्तु अतः परं त निवासो महर्षिणे न रोचतेस्मेति तपस्विभिः सह सपुत्रा सा ऋषिणा राजा प्रेषिता। राजा स्मरन्नपि तां तिरस्करोतिस्म। 'नाहं त्वां जानामि, नायं म पुत्रः, यत्र त्वं वाञ्छसि याहि' इत्युक्त्वा राज्ञा सा परित्यक्ता जाता।

राज्ञो वचनेन शकुन्तलाऽतीव दुःखिता जाता। शकुन्तलया कृतेऽपि ब प्रयासे राजा तां नैवाङ्गीकृतवान्। निराशा सा यदा ततो गन्तुं प्रवृत्ता तदं आकाशवाणी जाता—'राजन्! शकुन्तला तव धर्मपत्न्यस्ति सर्वदमनश्च पु इति स्वीकुरु एतद्द्वयमपि।' राजा मन्त्रिपुरोहितयोः परामर्शेन तौ स्वीकृ सर्वदमनो 'भरत' इति संज्ञया संज्ञापितः।

पद्मपुराणम्—केचित्तु विद्वांसः पद्मपुराणमेवाभिज्ञानशाकुन्तलस्य कथा कस्य मूलत्वेन प्रतिपादयन्ति। एषु प्रधानोऽस्ति विण्टरनिट्जमहोदयः।

पाणिग्रहणं यावत्पद्मपुराणमपि महाभारतीयशकुन्तलोपाख्यानकथानक नुसरति। केवलमेतदेव विशेषः यत् पद्मपुराणे महाभारतवत् स्वोपत्तिक शकुन्तला स्वयमेव न कथयति, अपितु स्वसख्यनसूयामुखेन। अपरञ्च पद्मपुरा राजधानीं गच्छन् राजा प्रत्यभिज्ञानरूपेण शकुन्तलायै स्वकीयमङ्गुलीयमदात्

परिणयानन्तरं गर्भवती शकुन्तला सप्तमासान् यावदाश्रमेऽतिष्ठत्। तत्पश्चा शारङ्गरवशारद्वतादिभिः ऋषिभिः रक्षिता शकुन्तला कण्वेन राज्ञः पा प्रेषिता। तया सह गौतमी प्रियम्वदा च राजानमागते मार्गे सरस्वतीनद्य स्नानप्रसङ्गे शकुन्तलया प्रत्यभिज्ञानाङ्गुरीयकं प्रियम्वदाहस्ते समर्पितम् प्रियम्वदाहस्ताच्चाङ्गुलीयकं नदीजले निपतितं किन्तु भयवशात् प्रियम्वदय किमपि नोक्तम्। शकुन्तलाऽपि तद्विषये किमपि न पृष्टवती। राजसभाया प्रत्यभिज्ञानाय सत्यामावश्यकतायामङ्गुलीयकार्थं शकुन्तलया प्रियम्वदा पृष्टा प्रियम्वदा अङ्गुलीयकस्य नदीजले पतनं शकुन्तला कर्णे कथितवती। तच्छ्रुत्वा

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शकुन्तला मूर्च्छिता सञ्जाता। राज्ञा परित्यक्ता च सा कश्यपस्याश्रमं गत्वा पुत्रमजीजनत्।

रामायणीयः प्रभावः—केषाञ्चिद् विदुषां मतानुसारं रामायणीयः प्रभाव एवाभिज्ञानशाकुन्तलकथानकमूलमिति। एवंवादिषु प्रधानपदमलङ्करोति वाल्टररुवेनमहोदयः। रामायणे सीता रावणेन हृता जायते। पश्चाच्च लङ्काविजयेन रामेण राजधानीं नीयते पुनश्च लोकापवादेन परित्यक्ता सती वने पुत्रद्वयमसूत्। यौवनमुपगते दारकद्वये मातृपितृपुत्रादीनां सर्वेषां सम्मेलनं जातम्। सीता पृथिवीमनुप्रविष्टा।

इत्येव कथानकमादाय शकुन्तलादुष्यन्तयोः प्रणयो विवाहो वा, पश्चात् राजधानीगमनम्, दुष्यन्तपरित्यक्तायास्तस्याः पुनः वनवासस्तत्र च पुत्रोत्पत्तिः इत्यादि कथा अभिज्ञानशाकुन्तले कालिदासेन गुम्फिता।

विवेचनम्—अभिज्ञानशाकुन्तलस्य कथानकस्य मूलविषये उपस्थिताः पूर्वोक्ताः विप्रतिपत्तीः दर्शं दर्शं त्रिष्वप्येतेषु मतेषु कः खलु पक्षः श्रेयान् इति कृतायां विवेचनायां ज्ञायते तृतीयं मतं तु व्यापकबुद्ध्या कृतमस्ति तत्र नकारस्य स्थानं नास्ति। यतो प्रायः सर्वेषु काव्येषु रामायणीयप्रभावस्यावश्यमेव केनचिद्रूपेण सत्वात्। द्वितीये मते पद्मपुराणस्य पर्यालोचनया ज्ञायते यदयमंशोऽभिज्ञानशाकुन्तलमेवानुसरतीति प्रक्षिप्त इति। अभिज्ञानशाकुन्तलं दृष्ट्वा केनचिदयमंशः पद्मपुराणे नियोजित इति।

वस्तुतो महाभारतमेवाभिज्ञानशाकुन्तलस्य मूलमिति निश्चितम्। यद्यपि महाभारते कथा सर्वथा तथा नास्ति यथा अभिज्ञानशाकुन्तले तथापि औचित्यदृष्ट्या कस्यचिदंशस्य परिवर्तनेन, कस्यचित् त्यागेन, कल्पनया नूतनस्य कस्यचिद्भागस्य संयोजनेन अभिज्ञानशाकुन्तलस्य परिष्कृता कथाऽस्माकं समक्षमस्ति। पद्मपुराण-महाभारतयोः समीक्षणेन च भाषादिदृष्ट्या पद्मपुराणापेक्षया महाभारतस्य पूर्वत्वात् महाभारतमेव पद्मपुराणाभिज्ञानशाकुन्तलयोरुभयोरपि मूलमिति महाभारतस्य शाकुन्तलोपाख्यानं स्रोतो मूलाधारो वा अभिज्ञानशाकुन्तलस्येति सिद्धम्।

(१२) **प्रश्नः**—अभिज्ञानशाकुन्तले कालिदासस्य मौलिकोद्भावनानां मूलकथानके परिवर्तनानाञ्च विवेचनं क्रियताम्।

अथवा

अभिज्ञानशाकुन्तले महाकविकालिदासकृतस्यौचित्यनिर्वाहस्य समीक्षा करणीया?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

उत्तरम्—कविरितिहासतो रेखामात्रं गृह्णाति । यथा मानवरचनायामस्थिपञ्जरं पृथक् तत्त्वम्, मांसादिपरिपूर्णता च पृथक् । एवञ्च सत्यपि अवयवसंस्थाने तत्र लावण्यं किमपि पृथगेव तत्त्वं भवति, तथैवैतिहासिकं कथानकं केवलं रेखामात्रं भवति, कविचित्रकारस्तु तत्र सरसं वस्तु निधाय रङ्गरञ्जितं कृत्वा मांसलतां सम्पाद्य लावण्यमुत्पादयति, तदेव समुचितललितसन्निवेशत्वमिति कथ्यते—

'नहि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभो भवतीति'

इति ध्वन्यालोककारवचनं ध्यायं ध्यायमात्मपदस्य कवित्वस्य महाकवित्वस्य वा लाभायेतिहासमात्रवर्णनातिरिक्तं किमपि पृथक् प्रयत्नमवश्यमेव करणीयं भवति ।

कविः 'सत्यं शिवं सुन्दरम्' इत्यस्य समुपासको भवति । औचित्यं तु कृपणेन धनं यथा परिरक्षति सर्वथा आत्मपणेनापि । यतो हि—

'औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्' इति काव्यनिर्माणे समालोचने च सर्वथाऽतन्द्रस्य क्षेमेन्द्रस्य परमः सिद्धान्तोऽस्ति । यत्सत्यं तदेव शिवम्, तदेव च सुन्दरम् इति महाकवेः परमोपनिषद्भूतं तिष्ठति । इदमेव सुरत्नं क्षेमेन्द्रस्यौचित्यमस्ति । पुराणादिष्वुपन्यस्तं काव्यकथानकमूलं यथा तथानिबद्धमपरिष्कृतं च भवति । यथा नीरक्षीरकुशलो हंसो मृणालतः केवलं क्षीरमेव गृह्णाति नीरं तु परित्यजति तथैव कविरपि मूलतः केवलमुचितमेव गृह्णाति अनुचितं तु त्यजति यद्वा मेघो यथा लावणमपि जलमास्वाद्यं करोति तथैव असुन्दरमपि स्वप्रातिभसम्पत्त्या सुन्दरं कृत्वा 'सत्यं शिवं सुन्दरम्' इति सिद्धान्तं चरितार्थयति स्वकीयमुत्कृष्टं प्रजापतित्वं च ख्यापयति । अतो मूलकथानके परिवर्तनं कवेः परममपेक्षितं भवति तत्र स्वकीयकल्पनोद्भावनत्वञ्चेति ।

अभिज्ञानशाकुन्तलस्य कथानकं महाभारतात् एव गृहीतमस्ति महाकविना कालिदासेन, किन्तु यत्र तत्र किमपि परिवर्तनं कृत्वा तथा सरसं कृतमस्ति यथा अभिज्ञानशाकुन्तलं काव्यपुरुषस्य कवितावनितायाश्च शिरोभूषणायितं तिष्ठति—

'काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला ।' इति ।

अभिज्ञानशाकुन्तले औचित्यनिर्वाहार्थं मूलकथानके कृतानां परिवर्तनानां कानिचिदुदाहरणान्युपस्थाप्यन्ते—

१—मूलकथानके मृगयासक्तो राजा दुष्यन्तः ससैन्यो महर्षेः कण्वस्याश्रमसमीपमागतः । सैनिकान् बहिरेव निरुध्य केवलं राजा एकाकी सन् आश्रमं प्रविष्टः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभिज्ञानशाकुन्तले सैनिकाः पश्चादेव क्वापि गताः। अग्रे अग्रे सारथिमात्रद्वितीयो राजा आश्रममागतः। तत्र च आतिथ्याय कण्वशिष्यैः वैखानसैः आमन्त्रितः सन् आश्रमद्वारे सारथिं परित्यज्याश्रमं प्रविष्ट इति।

२—मूलकथायां सहसाऽऽश्रमं प्रविष्टस्य राज्ञः महर्षिकण्वस्यानुपस्थितौ प्रथमं शकुन्तलादर्शनमेव जातम्। सर्वप्रथमं स्वत एवानयोः साक्षात्कारो वार्तादिकं जातम्।

अभिज्ञानशाकुन्तले आश्रमं प्रविष्टो राजा वृक्षसेचनकं कुर्वन्तीं शकुन्तलां ददर्श। किन्तु तयोः सम्मिलनं तदा जातं यदा शकुन्तला दुष्टेन केनचिद् भ्रमरेण परिबाधिता जाता तथा—

'हला परित्रायेथां परित्रायेथां मामनेन दुष्टमधुकरेणाभिभूयमानाम्' इति शकुन्तलया प्रार्थिताभ्यां सखीभ्याम्—'के आवां परित्राणे? दुष्यन्तं तावत् समाक्रन्दस्व। यतो हि राजरक्षितानि तपोवनानीति' उत्तरमुक्तम्।

३—मूलकथानके क्वापि गते कण्वे शकुन्तला राज्ञः आतिथ्यं करोति। वार्ताप्रसङ्गे च विश्वामित्रतः स्वोत्पत्तिं वर्णयति राज्ञः प्रेमविषयतां च गच्छति—

अभिज्ञानशाकुन्तले समुचितेन रूपेणाश्रमं प्रविष्टस्य राज्ञः शकुन्तलासाक्षात्कारे जाते राज्ञा समुचितेन रूपेण शकुन्तलाविषये पृष्टा सखी तत्सम्भवं वर्णयति।

४—मूलकथानके राज्ञा विवाहिता शकुन्तला वर्षत्रयानन्तरं पुत्रमुत्पादितवती तथा पुत्रोत्पत्तेरपि षड्वर्षानन्तरं (विवाहान्नववर्षानन्तरं) कण्वेन पतिगृहं प्रेषिता।

अभिज्ञानशाकुन्तले प्रवासात्प्रतिनिवृत्तेन आकाशवाचा ज्ञातसकलवृत्तान्तेन कण्वेन तत्कालमेव शकुन्तला पतिगृहं प्रेषिता।

५—मूलकथाऽनुसारं षड्वर्षदेशीयेन पुत्रेण सह शकुन्तला पतिगृहं गता। स्मरन्नपि राजा तां न स्वीकृतवान् तथा आकाशवाण्यनन्तरं स्वीचकारेति।

अभिज्ञानशाकुन्तलानुसारं गर्भिण्येव शकुन्तला दुष्यन्तं प्रेषिता। दुर्वासाशापवशाद् विस्मृतविवाहवृत्तान्तेन राज्ञा तिरस्कृता परित्यक्ता चेति।

पुत्राभावे विलपन् राजा प्राप्तेऽभिज्ञाने स्मृतशकुन्तलावृत्तान्तस्तामन्विषन् मरीच्याश्रमे तां प्राप्तवान्।

एवं महाकविना कालिदासेन कथानके किञ्चित् किञ्चित् परिवर्तनं कृतमस्ति। एतदतिरिक्तः काश्चिन्नवीनाः कल्पना अपि कृताः सन्ति यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

१—मूलकथानके दुर्वासः शापस्य कथा नास्ति, किन्तु कविना स्वमौलिक-कल्पनाऽनुसारमौचित्यसम्पादनार्थं च शापस्य वर्णनं कृतमस्ति ।

२—मूलकथानके शकुन्तलादुष्यन्तयोः प्रथममिलने सख्यौ नास्ताम् । अभि-ज्ञानशाकुन्तले तयोः उपस्थिति सरसतां सम्पादयति ।

३—विदूषकस्योपरि मातलिद्वाराकृतमाक्रमणमपि मूलकथानके नास्ति ।

एवं मूलकथानके परिवर्तनैः स्वकीयाभिः मौलिकाभिः कल्पनाभिश्च औचित्यं सम्पाद्य रससिद्धेन कवीश्वरेण महाकविना कालिदासेनाभिज्ञानशाकुन्त-लीयस्य कथानकस्य चमत्कारो द्विगुणितः, नीतञ्चेदं नाटकं संस्कृतसाहित्य-शिरोमणिस्थानमिति ।

(१३) प्रश्नः— अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्ट्यं प्रतिपाद्यताम् ?

उत्तरम्—कविताविलासेन महाकविना कालिदासेन विरचितम् अभिज्ञान-शाकुन्तलं देशेषु विदेशेषु च समधिकं ख्यातं संस्कृतसाहित्यललामभूतञ्चास्ति। इदं तु निश्चितं यत् काव्यं कविकर्म । यथा कवये रोचते तथा स स्वकीयं काव्य-मपि करोति । अतएव—

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।

इत्यादिवदन्तो महर्षिणो व्यासमहोदयाः सङ्गच्छन्ते । स्वकर्मभूतकाव्ये कुत्रापि कस्यचित्पात्रस्य रूपेण कविः स्वयमेवोपस्थितो भवति तथा च महत्त्वपूर्णानां सिद्धान्तानां विवेचनां करोति । एवञ्च काव्यं काव्यप्रयोजनानां पारं प्रापयति चतुर्वर्गफलप्रदायकत्वेन, त्रिवर्गसाधनत्वेन, कीर्तिप्रीत्यादिप्रतिपादकत्वेन वा ।

काव्यस्य यस्मिन्नंशे कविः स्वयमेवोपस्थितः सन् सिद्धान्तानां प्रतिपादनं करोति स एवांशः तस्य काव्यस्य हृदयं भवति । कविताविलासस्य महाकवेः कालिदासस्य-सर्वस्वभूते । कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् । अभिज्ञान-शाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेणोपस्थितोऽस्ति । केवलमस्मिन् चतुर्थे एवाङ्के महर्षिणः कण्वस्य दर्शनं जायते । अतएव चतुर्थमङ्कं शाकुन्तलस्य हृदयं रमणीयतरं च मत्वा आलोचकैः—

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्कः.................... ।।

इत्येकस्वरेण स्वीकृतमस्ति ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकताऽलौकिकतयोः, प्रकृतिमानवयोः विलक्षणं सम्मिश्रणमस्ति। यद्यपि काव्यवस्तु लौकिकमेव भवति तत्रालौकिकस्य रसस्य धारां प्रवाहयित्वा कविः तत् हृद्यमास्वाद्यं च सम्पादयतीति सर्वत्रैव काव्ये लौकिकताऽलौकिकतयोः सम्मिश्रणं भवत्येव तथापि शाकुन्तले—

'वनौकसोऽपि वयं लौकिकज्ञा एव।'

इति महर्षिणो कण्वस्योद्घोषणा लौकिकताऽलौकिकतयोः सम्मिश्रणेन चतुर्थाङ्कस्य वैशिष्ट्यं द्विगुणयति। शकुन्तलादुष्यन्तयोः प्रणयप्रसङ्गेन—

'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।'

इत्याकाशवाग्दिशा राज्ञा प्रदत्तस्य तेजसः शकुन्तलयोद्वहनात् अरण्यवासिन्याः शकुन्तलायाः पतिगृहं हस्तिनापुरं गमनेन च अरण्यराजप्रासादयोः कमपि विशिष्टं विलक्षणं घनिष्ठतरं च सम्बन्धं प्रतिपादयति चतुर्थोऽङ्कः। अतएवात्र तथैव चमत्कारो जायते यथा 'तरुकोटरसंभवयापि मधुकर्या पुष्करमध्वभिलोपे' जायते।

दुर्वाससः शापः, आकाशवाणी, शकुन्तलायाः पतिगृहगमनम्, वनस्पतिभ्यः शकुन्तलायै आभूषणप्रदानम् कोकिलरावेण शकुन्तलायाः पतिगृहगमनाय वनस्पतीनां स्वीकृतिः, मृगपोतेन शकुन्तलामार्गावरोधः, शकुन्तलायाः प्रस्थानं चेति चतुर्थाङ्कस्य महत्त्वपूर्णाः घटनाः सन्ति।

दुर्वाससः शापस्य घटना यद्यपि मूलकथानके नास्ति तथाप्यौचित्यदृष्टया कविना स्वप्रतिभयाऽस्या घटनायाः समावेशः कृतोऽस्ति। अग्रे दुष्यन्तः शकुन्तलायाः परित्यागं करिष्यति स्वपत्नीत्वेन तां न स्वीकरिष्यतीति निश्चितमेवास्ति। किन्तु एवमेव दुष्यन्तेन शकुन्तलायाः अनादरे विरसतापातः स्यात्, येन निखिलस्यापि काव्यस्य सौन्दर्यमकिञ्चित्करं स्यात्। अतएव अभिज्ञानशाकुन्तलस्य चमत्कारो दुर्वाससः शापघटनायामाश्रितोऽस्तीति शापस्य चतुर्थाङ्के प्रतिपादनात् चतुर्थाङ्कं विशिष्टं स्थानं बिभर्ति।

शकुन्तलादुष्यन्तयोः परस्परं प्रेम सञ्जातम्, तत् प्रेम कथमपि बान्धवकृतं नास्ति। अनेन प्रणयप्रसङ्गेन न तु दुष्यन्तस्यैव बान्धवा अभिज्ञाः सन्ति न तु शकुन्तलाबान्धवा एव। यथा कण्ववचनेन ज्ञायते—

'त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्'

यद्याकाशवाणी न स्यात्तदाऽस्योद्घाटनमेव न स्यात् अनसूया-प्रियम्वदे शकुन्तला-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सख्यौ तदभिज्ञेऽपि—'द्वयोरेव आवयोः हृदये एष वृत्तान्तस्तिष्ठतु' इति तेऽतिगूढ़स्तः । आकाशवाचा—

'दुष्यन्तेनाहितं तेजो दधानं भूतये भुवः ।
अवेहि तनयां ब्रह्मन् अग्निगर्भां शमीमिव ॥'

इति श्रुत्वैव ज्ञातसकलवृत्तान्तः कण्वः शकुन्तलायाः कौतुकप्रस्थानं सम्पादितम् ।

महर्षिणा कण्वेन शकुन्तलायाः पतिगृहगमनायानुज्ञाप्रार्थना—

'सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्' कोकिलारावेण शकुन्तलाया गमनानुज्ञा—

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥

महर्षिणः कण्वस्य सेवार्थं शकुन्तलायै वनस्पतिभ्यः आभूषणप्रदानमपि काचि विशिष्टैव घटनाऽस्ति—

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैः
दत्तान्याभरणानि नः किसलयच्छायापरिस्पर्धिभिः ॥

इति । शकुन्तलायाः कृतकपुत्रेण मृगपोतेन तस्याः मार्गावरोधः—

..........................जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।

इतीदं किमपि विशिष्टं रमणीयं मानवजीवनेन सह प्रकृतितादात्म्यात्मक श्चास्ति । मानवजीवनेन सह प्रकृतितादात्म्यात् अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्कः किमपि विशिष्टमेव चमत्कारं धारयति ।

एतदतिरिक्तं शाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्ट्यप्रतिपादनावसरेऽस्य धार्मिकं सामाजिकम्, सांस्कृतिकञ्च महत्त्वं नैव विस्मरणीयम् । धर्मशास्त्र दृष्ट्याऽभिज्ञानशाकुन्तलीयचतुर्थाङ्कस्य किमपि वैशिष्ट्यं वरीवर्ति ।

'अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ।'

इति धर्मशास्त्रस्य रक्षणार्थमेव आकाशवाचा शकुन्तलाविवाहवार्ता ज्ञात तत्कालमेव कण्वेन शकुन्तलायाः पतिगृहप्रेषणस्य व्यवस्था कृता ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

'ओदकान्तं स्निग्धोऽनुगम्यते'

इत्यस्यापि व्याख्यानं कण्वशिष्यमुखेनोपस्थाप्य शाकुन्तलस्य चतुर्थोऽङ्को धर्मशास्त्रं रक्षति ।

अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य परमं वैशिष्टयमस्ति सामाजिकता । काव्यं नाम समाजोद्यानपुष्पमिति सामाजिकतया काव्यं परां कोटिमधिगच्छति । महर्षिणा कण्वेन दुष्यन्ताय शकुन्तलायै च कृत उपदेशः शाश्वतिकः, समाजे वर्तमानस्य सर्वस्यापि कृते महते उपयोगायास्ति । दुष्यन्तायोपदेशः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतः परं न खलु तद् वाच्यं वधूबन्धुभिः ॥

प्रत्येकस्यापि पुरुषस्य कृते उपयोगी आवश्यकञ्चास्ति । एवञ्च वधूबन्धुभिः कियद् वाच्यमित्यस्यापि सीमानिर्धारणेनोभयोरपि पक्षयोः सामञ्जस्यमुपस्थापितम् ।

शकुन्तलायै उपदेशमुखेन प्रत्येकस्या अपि बध्वाः कृते उपदेशः कियद् यथार्थमुपयुक्तञ्चास्तीति सहृदयाः प्रमाणम्—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

सर्वमिदं व्यावहारिकम्, सामाजिकम्, धार्मिकम्, प्रकृतितादात्म्यात्मकं च तत्त्वं भारतीयां संस्कृतिं पुष्णातीति सांस्कृतिकदृष्टयापि शाकुन्तलस्य चतुर्थोऽङ्को विशिष्ट एवास्ति ।

सर्वं संकलय्य दार्ढ्येन कथितुं शक्यते यत् अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्को निश्चितमेव विशिष्टतरोऽस्ति । अतएवोचितमेवोक्तम्—

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥ इति ॥

(१४) प्रश्नः—अभिज्ञानशाकुन्तलनायकस्य दुष्यन्तस्य चरित्रचित्रणं क्रियताम् ?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

उत्तरम्—कविताविलासेन महाकविना कालिदासेन विरचितस्य, देशेषु विदेशेषु च ख्यातख्यातस्य, 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इत्यादि-प्रशंसाप्रशंसितस्य, संस्कृतसाहित्यललामभूतस्य अभिज्ञानशाकुन्तलस्य नायको राजा दुष्यन्तः—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियम्वदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥

इति नेतृलक्षणसमन्वितस्त्वस्त्येव धीरोदात्त-धीरललित-धीरोद्धत-धीरप्रशान्तेषु चतुर्विधेषु नायकेषु धीरोदात्तनायकोऽस्ति—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥

इति धीरोदात्तलक्षणसमन्वितत्वात् । दुष्यन्ते वर्तमानानां गुणानामेकैकशो विवेचनं क्रियते—

१. महासत्त्वः—दुष्यन्तो महान् पराक्रमी एवं बलशाली राजास्ति । तस्य पराक्रमस्यैव फलमस्ति यत् सम्पूर्णे वसुधातले एकच्छत्रं तस्य निष्कण्टकं राज्यमस्ति—

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः ।
समुद्ररशना चोर्वी.................. ॥

इति । तस्य नाममात्रेणैव दुष्टजनाः दुष्टतां परित्यजन्ति राक्षसा अपि क्वापि पलायन्ते—

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
हुङ्कारेणेव धनुषः स हि विघ्नान् व्यपोहति ॥

स आत्मनं दुर्विनीतानां शासकः कथयति—'...पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।' तस्य पराक्रमः नहि केवलं मानवैरेव अपितु निर्जीवैः लतावृक्षादिभिरप्यङ्गीक्रियते । षष्ठे अङ्के शकुन्तलावियोगखिन्नः स यदा वसन्तोत्सवं परिहरति तदा लतावृक्षादिभिरपि पशुपक्षिभिरपि तच्छासनं प्रमाणीक्रियते—

चूतानां चिरनिर्गताऽपि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरवकं तत् कोरकावस्थया ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ॥

तस्य पराक्रमकीर्तिः स्वर्गेऽपि प्रसृताऽस्ति । अतएव असुरैः बद्धवैरो देवेन्द्रोऽपि तं साहाय्यार्थमाह्वयति । यथा सप्तमे सर्गे स देवेन्द्रसाहाय्यं कृत्वैव तद्रथेन परावृत्तः सन् भगवतो मरीचेराश्रमं प्राप्तः । मातलिस्तत्पराक्रमं प्रशंसन् कथयति—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः पुरुषकेशरिणश्च पुरा नखैः ॥

२. अतिगम्भीरः—अभिज्ञानशाकुन्तलनायको राजा दुष्यन्तोऽतिगम्भीरोऽस्ति । 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' इति कालिदासवचनं स्मारं स्मारं स शकुन्तलासौन्दर्याकृष्टोऽपि विवेकं न परित्यजति तथा कर्त्तव्याकर्त्तव्यं विचारयति । 'इयं मम विवाहयोग्या वा न वा ?' इति सम्यग्विचारयति । कामातुरता तं न बाधते । अतएव स अतिगम्भीरोऽस्तीति कथयितुं शक्यते ।

३. क्षमावान्—शक्तिसामर्थ्यसमन्वितोऽपि सः क्षमाशीलोऽस्ति । कण्वशिष्याणां गौतम्यादीनाञ्च कटुवचनं सर्वथा सहते । कण्वशिष्यः शारङ्गरवस्तं दस्युः कथयति—

'मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ।'

शकुन्तला तु तमनार्यं इति सम्बुद्धयति तथा चान्यदपि कटुवचनं कथयति—
'अनार्य ! आत्मनो हृदयानुमानेन किल सर्वं प्रेक्षसे ? को नाम अन्यो धर्मकञ्चुकव्यपदेशिनस्तृणच्छन्नकूपोपमस्य तव अनुकारी भविष्यति ?'
इतीदं मौनं सन् सहते न च क्रुध्यति कथमपि ।

४. अविकत्थनः—राजा दुष्यन्त आत्मश्लाघी नास्ति । स आत्मप्रशंसां नेच्छति । यदा विदूषकस्तं रूपत्वेन प्रशंसयति—
'ननु भवानेव ममाग्रतो वर्तते' इति तदा स 'सर्वः खलु कान्तमात्मानं पश्यति । अहं तु शकुन्तलामधिकृत्य ब्रवीमि ।' इत्युक्त्वा तत्परिहारं करोति ।
सप्तमेऽङ्के देवेन्द्रेण सत्कृतः स कथयति यत् यथाऽहं देवेन्द्रेण सत्कृतोऽस्मि तस्य सत्कारस्य योग्यो नास्मि—
'मातले ! अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

५. स्थिरः—राजा दुष्यन्तः स्थिरप्रकृतिकोऽस्ति । यदा शकुन्तला ऋषि-रक्षिता सती दुष्यन्तं प्रेषिता तदा एकतस्तु राजा तद्रूपराशिरञ्जितः सन् स्वीकर्तुमिच्छति किन्तु अपरतः 'इयं मया विवाहिता वा न वा ?' इति वि- नैव स्वीकरोति—

व्यपदेशमाविलयितुं समीहसे मां च पातयितुम् ।
कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च ॥

किञ्च—

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यध्यवस्यम् ।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि हातुम् ॥

६. दृढव्रतः—राजा दुष्यन्तो दृढव्रतोऽस्ति । 'अङ्गीकृतं सुकृतिनः परि- यन्ति' इति नियमानुसारं पूर्वमङ्गीकृतं दृढं पालयति । यद्यपि स दुर्वा- शापेन शकुन्तलां परित्यजति किन्तु अङ्गुरीयके प्राप्ते सति अतीवोद्- जायते । शकुन्तलां सर्वथाऽन्विषति । प्राप्तां च तां सत्कृत्य स्वीकरोति, त- राजधानीं नयति । अतएव स दृढव्रत इति नास्ति सन्देहः ।

७. कुशलः प्रजापालकः—राजा दुष्यन्तः कुशलशासकः प्रजापालकश्चा- स स्वसुखनिरभिलाषः सन् लोकहेतोः खिद्यते यथा पादपो मूर्ध्ना तीव्र- सहते किन्तु छायया आश्रितानां तापं शमयति—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवं विधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥

सः प्रजाः पुत्रमिव पालयति—'प्रजाः प्रजाः स्वा इव तन्त्रयित्- इत्यादि । स विमार्गप्रस्थितान् नियमयति, विवादं प्रशमयति, रक्षणाय क- अतनुषु विभवेषु धनं विभक्तं करोति—

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः संविभक्ता-
स्त्वयि तु परिसमाप्तं बन्धुकृत्यं जनानाम् ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
तस्य तस्य कृते राजा दुष्यन्त इति घुष्यताम् ॥

इत्युद्घोषस्तस्य प्रजापालकत्वस्य चरमसीमाऽस्ति ।

८. वात्सल्यभावसमन्वितः—राजा दुष्यन्तो वात्सल्यभावसमन्वितोऽस्ति । मरीचेराश्रमे यदा स बालकं पश्यति तदाऽतीववत्सलः सन् तमङ्कमुत्थापयति प्रसन्नश्च जायते—

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रे सुखिता ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्रसूतः ॥

९. आदर्शप्रेमी—दुष्यन्तः एक आदर्शप्रेमी अस्ति । स प्रथमदर्शने एव शकुन्तलायामनुरक्तो जातः । सा मद्विवाहयोग्या वा न वेति विचार्य पश्चाच्च अप्सरःसम्भवैवेति ज्ञात्वा विवाहयोग्येति निर्धार्य तया सह विवाहसूत्रे बद्धो जायते । यदा शकुन्तलासखी 'बहुपत्नीकाः राजानः श्रूयन्ते' इति कथयति तदा स सत्यापयति—

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः ।
समुद्ररशना चोर्वी सखी च युवयोरियम् ॥

अन्ततश्च पत्परिपालयति । यद्यपि दुर्वाससः शापो विघ्नमुपस्थापयति तथापि शापस्त्वलौकिकघटनाऽस्ति । शापे निवृत्ते स तत्कालमेव शकुन्तलामन्विपति । चित्रेऽङ्कितायाः शकुन्तलायाः अधरे भ्रमरं दृष्ट्वा स क्रुद्धो जायते । कथयति च—

बिम्बाधरं दशसि चेद्भ्रमरप्रियायाः
त्वां कारयामि कमलोदरबन्धनस्थम् ।

इति राजा दुष्यन्तः सफल आदर्शश्च प्रेमी कथयितुं शक्यते ।

१०. चित्रकला निपुणः—राजा दुष्यन्तश्चित्रकलायां निपुणोऽस्ति । यथा शकुन्तलाचित्रकारिणं तं मिश्रकेशी कथयति—

'अहो ! राजर्षेर्वर्तिकालेखनिपुणता । जाने प्रियसखी मे अग्रतो वर्तत इति ।' चित्रे न्यूनतां दृष्ट्वा स चेटीं कथयति—'चतुरिके अर्द्धलिखितमेतद्विनोदस्थानमस्माभिः तद्गच्छ वर्तिकास्तावदानय ।' तत्र चित्रे किं किं न्यूनं कर्त्तव्यञ्चास्तीति वर्णयन् स कथयति—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥

इति ।

एवं राजा दुष्यन्तः सफलप्रेमी, आदर्शराजा, कुशलः प्रजापालकः, पराक्र अतिगम्भीरः, क्षमावान्, आत्मश्लाघाविरतः, स्थिरः दृढव्रतः, वात्सल्य समन्वितः चित्रकलानिपुणः, धार्मिकश्च राजास्तीति अभिज्ञानशाकुन्तलस्य नायकत्वेन योग्यः उपयुक्तश्चास्ति ।

(१५) प्रश्नः—शकुन्तलायाश्चरित्रचित्रणं क्रियताम् ।

उत्तरम्—अस्ति शकुन्तला कालिदासस्य सर्वस्वभूतस्याभिज्ञानशाकुन्तलस्य ('कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्') प्रधाननायिका । यद्यपि ना शास्त्रीयेषु ग्रन्थेषु नायिकागुणानां प्रतिपादनं नैव कृतमस्ति तथापि नायक एव प्रायो नायिकास्वपि द्रष्टव्या इति नेतृसामान्यगुणाः—विनीतत्वम्, मधु (प्रियदर्शनता) त्यागः, दक्षता, प्रियम्वदता, रूढवंशता, स्थिरता, युवावस्था, ध्युत्साहस्मृतिप्रज्ञाकलादिसमन्वितत्वम् इत्यादयः सर्वे गुणाः यथावद्रूपेण गणनीयाः । अन्ये च स्त्रीगुणा अपि तत्र द्रष्टव्येति मनसि निधायाभिज्ञानशाकु न्तलनायिकायाः शकुन्तलायाश्चरित्रगतगुणानां मूल्याङ्कनमत्र क्रियते—

१. युवती—अभिज्ञानशाकुन्तले शकुन्तला बाल्यतारुण्यवती कन्येव चि ताऽस्ति । तस्याः प्रथमतारुण्यविकासफलभूतसौन्दर्यं दर्शं दर्शं राजा कण्व विवेकिनं मन्यते—

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥

तस्याः तारुण्यस्यैव फलमस्ति यत् शकुन्तला सूक्ष्ममपि वस्त्रं धार स्तनयुगपरिणाहमवश्यमेवाच्छादयति—

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥

तस्याः स्तनयुगं क्षणं क्षणं विस्तारं गच्छति । यथा—'हला ! अतिपि वल्कलेन प्रियम्बदया दृढं पीडिताऽस्मि, शिथिलय तावदेनम्' इति शकुन्तला प्रियम्वदां कथयति—

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2

'पयोधरविस्तारहेतुकमात्मनो यौवनारम्भं तावदुपालभस्व किं मामुपालभसे।'

अनेन ज्ञायते शकुन्तला प्राप्तयुवावस्थैका नायिकाऽस्तीति तस्यां युवावस्थागताः विकाराः सन्ति।

२. अलौकिकसौन्दर्यशालिनी—शकुन्तला अलौकिकसौन्दर्यशालिन्यस्ति। तस्याः शारीरिकं सौन्दर्यं दर्शं दर्शमेव राजा तत्प्रेमपाशपतितो जातः। शकुन्तला येन न दृष्टा तस्य चक्षुरेव निष्फलमिति राज्ञो निर्णयः। यथा विदूषकं कथयति—'माधव्य! अनाप्तचक्षुःफलोऽसि येन त्वया द्रष्टव्यानां परं न दृष्टम्।' तस्याः सौन्दर्यमेकेनैव श्लोकेन राजा वर्णयन् कथयति—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि॥

पूर्वं चित्रे परिकल्पितसर्वयोगान् निवेश्य, रूपोच्चयेन मनसा विधिना सा कृतेति राज्ञो मतमस्ति। अतएव सा स्त्रीरत्नसृष्टिरिति—

चित्रे निवेश्य परिकल्पितसर्वयोगान्
रूपोच्चयेन विधिना विहिता कृशाङ्गी।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

एवं शकुन्तला समधिकसौन्दर्यशालिन्यस्तीति।

३. प्रकृतिप्रिया—अभिज्ञानशाकुन्तलस्य नायिका शकुन्तला प्रकृतिपुत्र्यस्ति। अतएव प्रकृत्या सह तस्याः तादात्म्यमस्ति। सा प्रकृतिं स्वात्मनः पृथक् न मन्यते। लतास्तस्याः भगिन्यः सन्ति—'यतो भगिनी मे भवति ततः किमिति न सिञ्चामि?' तरवस्तस्याः भ्रातरः सन्ति। यथा—शकुन्तला कथयति—'नहि केवलं तातनियोग एव ममापि सहोदरस्नेहः एतेषु।' यदा वातेरितं पल्लवं जायते तदा स जानाति यत्—'एष पल्लवाङ्गुलिभिः मां व्याहरतीव चूतवृक्षः।'

आश्रमवृक्षेषु तस्यास्तथा प्रेम अस्ति यथा सा तेभ्यः पयो दत्त्वैव जलं पिबति तथा प्रियमण्डनापि स्नेहेन पल्लवं नादत्ते—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इत्यादि। मृगपोतान् स कृतकपुत्र इव मनुते—

'सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।'

एवं ज्ञायते शकुन्तला प्रकृतिपुत्र्यस्ति। तस्याः प्रकृत्या सह घनिष्ठ सम्बन्धोऽस्ति।

४, सुशीला—शकुन्तला सुशीलस्वभावऽस्ति। राजानं दृष्ट्वा तन्मनः कामविकारो जायते, किन्तु स्वकीयां कामवेदनामन्तत सा गोपायति. सख्यौ न कथयति। यदा साऽतीवास्वस्था जायते तदा सखीभ्यां पृष्टा सा 'आयास हेतुका वो भविष्यामि' इति कथयति। तथा 'यतः प्रभृति तपोवनरक्षिता राजर्षिः मे लोचनपथं गच्छति' इति।

अनेन ज्ञायते सा सुशीलास्तीति।

५. लज्जावती—शकुन्तला लज्जाशीलाऽस्ति। प्रथमाङ्के यदा रा तस्याः रूपं प्रशंसति तदा सा—सलज्जमधोमुखी तिष्ठति। यदा प्रियम्व तस्याः विवाहपरिचर्यां करोति तदा सा ततोऽन्यद् गन्तुमिच्छति। यथा-प्रियम्वदा—आर्य! धर्माचरणपरवश एष जनः। गुरोः पुनरस्याः अनुरूपवरप्रद संकल्पः। शकुन्तला—अनसूये! अहं गच्छामि।' इति।

तृतीयाङ्के रहसि राज्ञा सम्बन्धे जाते भूयो भूयस्ततो गन्तुमिच्छति।

६. सरलस्वभावा—शकुन्तला सरलस्वभावा नायिकाऽस्ति। यदा सख्यौ तस्याः परिहासं कुरुतस्तदा सा—'एष ते आत्मनश्चित्तगतो मनोरथः।' इ कथयति।

यद्यपि सा कुलपतेः कण्वस्य द्वितीयोच्छ्वास इवास्ति तथापि तन्मनसि अहङ्कारो नास्ति। सख्यावपि तामादेशयतः—'हला शकुन्तले गच्छ। उटज फलमिश्रमर्घ्यमुपाहर' इति।

एभिरुदाहरणैस्तस्याः स्वभावस्य सरलता ज्ञायते।

७. पतिपरायणा—शकुन्तलापतिपरायणाऽस्ति। तस्याः मनः सर्वदा प पार्श्वे एव भ्रमति। गान्धर्वविवाहविधिना विवाहितायां तस्यां गते च राज शकुन्तला निरन्तरं पतिगतमेव चिन्तयति, यत्परिणामेन सा दुर्वाससः शा भाजनं जाता—

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥

राज्ञा दुष्यन्तेन निराहृता सा कण्वशिष्ययोरनुगमनं करोति किन्तु शिष्येण—

अथ तु वेत्सि शुचिव्रतमात्मनः
पतिगृहे तव दास्यमपि क्षमम् ॥

इति श्रुत्वा तत्रैव निवसति। मरीच्याश्रमे निवसन्ती सा सर्वथा वियोगिनी नियमान् परिपालयति। यथा—

'वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणी।'

इत्यनेन राज्ञो वाक्येन ज्ञायते।

८. श्रेष्ठजनादरवती—शकुन्तला पुण्यजनान् प्रति समधिकमादरवत्यस्ति। सा स्वतन्त्रा नास्ति, गुरुजनपरवशास्तीति सा सम्यग्जानाति। तृतीयाङ्के यदा राजा तत्सेवार्थं कथयति तदा—'न माननीयेषु जनेषु आत्मानमपराधयिष्यामि' इति कथयति।

पञ्चमाङ्के राज्ञा निरादृता सा यदा शिष्यावनुगच्छति तदा शिष्येण—'आः पुरोभागिनि ? किमिदं स्वातन्त्र्यमवलम्बसे' इत्युक्ते सति तत्रैव स्थीयते।

एवं ज्ञायते श्रेष्ठजनान् प्रति शकुन्तला समधिकमादरवत्यस्ति।

शकुन्तलायाश्चरित्रं नहि केवलं संस्कृतसाहित्ये एव, अपितु विश्वसाहित्ये आदर्शपूर्णमस्ति। अस्याश्चरित्रं पाश्चात्यैरपि विद्वद्भिः मुक्तकण्ठेन प्रशंस्यत इति।

(१६) प्रश्नः—अभिज्ञानशाकुन्तलस्य प्रथमाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ?

उत्तरम्—'तवास्मि गीतरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥' इति प्रस्तावनया सूचितस्याभिज्ञानशाकुन्तलनाटकस्य प्रथमाङ्कस्य प्रारम्भो मृगयासक्तेन राज्ञा दुष्यन्तेन रथारूढेन सशरचापहस्तेन मृगानुसरणेन जायते। मृगमनुसरन्नपि राजा मृगं नाप्नोति स उदग्रप्लुतत्वाद् राज्ञो बहुदूरमग्रे गच्छति। समदेशवर्तिनीं भूमिङ्गते रथे वेगवर्धनाद् मृगो राज्ञः शरसन्धानविषयतां गतः।

यदा राजा मृगं प्रहर्तुं शरसन्धानं करोति तदैव तत्र त्रयो वैखानसाः समागच्छन्ति तथा च 'न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्' इत्यादिरूपेण राजानं वारयन्ति। विरते राजनि वैखानसः तमभिनन्दयति, आशीर्वचसा तं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सनाथयति च स्वानुरूपपुत्रप्राप्तये । तदैव वैखानसो राजानमामन्त्रयति स एवानुमालिनीतीरे वर्तमानं महर्षेः कण्वस्याश्रममागत्यातिथिसत्कारलाभा सम्प्रति महर्षिकण्व आश्रमे नास्ति स्वप्राणायितां शकुन्तलामतिथिसत्का नियुज्य सोमतीर्थं गतोऽस्तीत्यपि वैखानसादेव राजा जानाति तथा चाश्रमसं गत्वा मृगयावेशमपनीय विनीतवेषेण त्यक्तचापाभरणादिकः एकाकी एवाश्र प्रविशति ।

तत्राश्रमे स्वप्रमाणानुरूपं सेचनघटं धारयित्वा वृक्षसेचनं कुर्वती मुनिकन्य दर्शं दर्शं स किमपि चमत्कृतो जायते । तासां रूपमाधुर्यं वाक्माधुर्यादिकं प्रशंस्य राजा तासां विश्रम्भालापं श्रोतुं केनचिद् वृक्षेण लतागुल्मेन वाऽन्तति सन् तिष्ठन् तासां विश्रम्भकथितानि शृणोति ।

कन्यकाः परिहासकथादिकं कुर्वन्त्यः वृक्षसेचनं सम्पादयन्ति । राजा शकुन्त रूपं नेत्रपुटकाभ्यां पायं पायं सर्वथाऽभिनन्दति निन्दयति च महर्षिणं तामाश्र धर्मनियोगे । राजा तद्रूपसम्पत्तिविमोहितः तस्याः स्वविवाहयोग्यत्वा विचारयति । तदैव सहसैका घटना जाता—पुष्पसेकसलिलोद्भ्रान्तः कश्चि भ्रमरो नवमालिकामुज्झित्वा शकुन्तलावदनमनुधावति । शकुन्तलया निवारि ऽपि स नैव विरमति । राजा शकुन्तलायाः अधरपानार्थं कर्णे मन्त्रणार्थं कपो दिस्पर्शार्थं च भ्रमरं प्रशंसयति आत्मानं निन्दयति च ।

शकुन्तला भ्रमराद्रक्षणार्थं सख्यौ आक्रन्दति—'हला परित्रायेथां परित्राये मामनेन दुष्टमधुकरेणाभिभूयमानाम्' इति । सख्यौ च सपरिहासम्—'के आ परित्राणे दुष्यन्तं तावदाक्रन्दस्व, यतो हि राजरक्षितानि तपोवनानीति' क यन्ति । तदैव—'आः—

कः पौरवे वसुमतिं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥'

इति कथयन् तासां समक्षमायाति । धर्माधिकारित्वेन चात्मानं तासां समक्षमु स्थापयति । सख्यस्तदातिथ्यं सम्पादयन्ति । तत्रैव शिलापट्टके उपविष्ट राज्ञः सखीभिः सह नानाप्रकारेण परिचयविषयको वार्तालापो जायते ।

राजा नैष्ठिकस्य ब्रह्मचारिणः कण्वस्य पुत्री शकुन्तलेति सङ्गतिं पृच्छति अनसूया सर्वमनवद्यं यथा स्यात्तथा कथयति । तत्कथनादेव ज्ञायते यत्—विश्वा मित्रनियमविघ्नकारिण्यां मेनकायामप्सरसि विश्वामित्रेण समुत्पादिता श

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain, Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परित्यक्ता च शकुन्तैः परिवृता महर्षिणा कण्वेनाधिगता पालिता चेति सा कन्यका। अतएव कण्वपुत्रीति।

सर्वमिदं ध्यायं ध्यायं शकुन्तला मद्विवाहयोग्याऽस्तीति मनसि निधाय राजा ताम्प्रत्यनुरक्तो जातः। शकुन्तलायाश्च मनसि तम्प्रति जातोऽनुराग इति। सहसा राजानमन्वेषयन्तः तत् सैनिका आश्रममागताः। आश्रमे तदुपरोधात् कोलाहलो जातः। तत्सम्भ्रान्ताश्च कन्यका राज्ञः स्वीकृतिमादायाश्रमं गताः राजा च तदुपरोधशान्त्यर्थं गतः इति विरामविन्दुः प्रथमाङ्कस्य।

(१७) प्रश्नः—अभिज्ञानशाकुन्तलस्य द्वितीयाङ्कस्य कथानकं संक्षेपतो वर्णनीयम्।

उत्तरम्—द्वितीयाङ्कस्य प्रारम्भो राज्ञो दुष्यन्तस्य मृगयासक्तस्य वयस्यभावेन विदूषकस्य विषण्णतया जायते। विदूषको नानाप्रकारेण कष्टं प्रकटयति। राज्ञा सह प्रातःकाले एव मृगयार्थं निःसरति। मध्याह्नेऽपि विरामो न जायते, उष्णकटूनि गिरिनदीसलिलानि पीयन्ते, उष्णमांसभूयिष्ठं भोजनं भवति—सर्वमिदं ब्राह्मणस्य माधव्यस्य कृते विपरीतमेवास्ति। विदूषकमनसि सर्वतोऽधिकं कष्टं ततोऽस्ति यथा राज्ञा आश्रमे शकुन्तलानाम्नी कन्यका दृष्टास्ति। तदनुरागे पतितो राजा राजधानीगमनस्य वार्तामपि न करोति। विदूषकः सर्वमिदं निवेदयितुं एकाहस्याप्यवकाशार्थं दुष्यन्तं गन्तुमिच्छति तावत्तत्रैवायान्तं राजानं दृष्ट्वा अङ्गभङ्गविकलो भूत्वा तिष्ठति। आगते राजनि स वाचा मात्रेण यथोचितमुपचारं सम्पादयति। राज्ञा कथमिदमिति पृष्टे सति स राजनि दोषारोपणं करोति। तदनुरोधेन च 'अन्यस्मिन् कार्येऽहं साहाय्यं करिष्यामि' इति तत्पणेन च राजा एकाहस्य कृते मृगया निवृत्त्यर्थं मनसि निश्चितं करोति।

राजा सेनापतिमाहूय मृगयापवादिना माधव्यस्य कथनानुसारं मृगयानिवृत्त्यर्थमादिशति। सेनापतिः मृगयायां नानाप्रकारेण गुणत्वं सम्पादयति। सेनापतिविदूषकयोः कृतकं वाग्युद्धं जायते। राज्ञः कथनानुसारं विदूषकस्य विजयो जायते। अद्य मृगया नैव भविष्यति—इत्यादिशति राजा। राजा पुरोगतान् धनुर्ग्राहिणो निवृत्त्यर्थं सेनापतिमादिश्य शमप्रधानेष्वपि आश्रमपदेषु गूढं दाहात्मकं तेजोऽस्तीति आश्रमशक्तिं सर्वथाऽभिनन्दयति। सर्वे ततो स्वस्वनियोगार्थं गच्छन्ति।

एकान्तसमयमाप्त्वा शिलातलमुपविश्य विदूषको राजानं तत्पणं पृच्छति यत् किमस्ति कार्यं यदर्थमद्य ममावकाशोऽस्ति? राजा शकुन्तलाविषयिणीं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

वार्तामुपस्थापयति । नानाप्रकारेण शकुन्तलायाः सौन्दर्यवर्णनं च करोति। ब्रह्मणा पूर्वं शकुन्तलानिर्माणयोगान् परिकल्प्य चित्ते निवेश्य यद्वा चित्रे निवेश्य रूपोच्चयेन विहितेति सा अपरा स्त्रीरत्नसृष्टिरस्ति । तस्याः रूपम्—अनाघ्रातं पुष्पमिव, कररुहैरलूनं किसलयमिव, अनाविद्धं रत्नमिव, अनास्वादितरसं मधु इव, किं बहुना पुष्पानामखण्डं फलमिवास्ति । एवं वस्तुतः सा रूपवत्यस्ति यां राजाऽप्येवं वर्णयतीति मत्वा विदूषको राजानं पृच्छति—मूर्ख ! सा ब्राह्मण-कन्यका । क्षत्रियेण त्वया सह कथं विवाह इति ? राज्ञा पूर्वं श्रुतं कथानकमुपस्थाप्य तदप्सरोभवत्वं प्रतिपादयति । ननु साऽस्ति तव विवाहयोग्येति मन्ये किन्तु त्वोपरि तस्याः कीदृशो भावः ? इति विदूषकेन पृष्टो राजा आत्मानं प्रति तस्याः अनुरागं प्रतिपादयति—सा गच्छन्ती सती कतिचिदेव पदानि गत्वा दर्भाङ्कुरेण चरणः क्षत इति सव्याजं स्थिता । शाखास्वलग्नमपि वल्कलं मोचयन्ती सा सव्याजं वदनं विवृत्य बहुशो मां दृष्टवती—इत्यादि।

राजा पुनः आश्रमं गन्तुमपदेशमन्विषति विदूषकस्तु तस्य नृपत्वं प्रतिपाद्य नीवारषष्ठभागरूपकरग्रहणमेवापदेशत्वेन स्थापयति किन्तु राजा तन्निषिध्य तपस्विभिः प्राप्यमाणं तपःषड्भागत्वं यत् खलु सर्वथाऽक्षयमस्ति प्रतिपादयति। एवमेव परस्परं विचारविनिमयं कुर्वत्योः राजन्विदूषकयोः तपस्विनौ समागच्छतः । उभावपि तौ स्वस्वमनोनुकूलं राजानं प्रशंसयतः ।

राजा उपस्थितौ तपस्विनौ आगमनकारणं पृच्छति । 'भवानिहस्थ इति तपस्विभिर्ज्ञातमस्ति । अतः कुलपतेरसान्निध्यात् इष्ट्यादिकर्मणि रक्षोभिः विघ्ननिवृत्त्यर्थं सारथिमात्रद्वितीयं भवन्तमाश्रममेव निवासार्थं तपस्विनः प्रार्थयन्ति—इति मनोऽनुकूलां तपस्विप्रार्थनां श्रुत्वा प्रसन्नो जातो राजा । राजा तपस्विप्रार्थनां स्वीकृत्य अहमनुपदमेवागच्छामि—इत्युक्त्वा तपस्विनौ विसर्ज्य सज्जं रथमुपकल्पयितुं च दौवारिकमादिश्य विदूषकं शकुन्तलादर्शनकामनां पृच्छति । विदूषकस्तु परिहरति शकुन्तलादर्शनम् ।

ततश्च देवीनामाज्ञप्तिहरः करभको नगरात् समागच्छति । स राजानं देवीनां सन्देशं श्रावयति—'आगामिनि चतुर्थदिवसे 'पुत्रपिण्डपालनो' नामोपवासो भविष्यति । तत्रायुष्मताऽवश्यमेव वयं सम्भावनीया इति ।' तच्छ्रुत्वा राजा किंकर्त्तव्यविमूढ इव जायते, यत् स किं करोतु आश्रमं गत्वा ऋषीणामभयदानं करोतु, नगरं गत्वा विशिष्टोपवासतिथौ देवीः सम्भावयतु । एकतो मातृकार्यम्,

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपरतश्च ऋषिकार्यमिति कृत्ययोः भिन्नदेशत्वात् धृतद्वैधीभावं तन्मनो व्याकुलं जायते ।

चिन्ताकुलो राजा उपायं चिन्तयति—'विदूषक एव राजधानीं गत्वा मातृ-कार्यं सम्पादयतु' इति मनसि निश्चित्य स विदूषकं कथयति—मित्र माधव्य ! त्वमप्यम्बाभिः पुत्र इव स्वीकृतोऽसि । अतस्त्वमेव राजधानीं गत्वा ऋषिकार्येषु मद्व्यस्ततां प्रतिपाद्य मातृकार्यं सम्पादयतु—इति । ऋषिगौरवादेवाहमाश्रमं प्रविशामि न तु शकुन्तलादर्शनानुरागेणेति सर्वमनवद्यतया प्रतिपाद्य ससैन्यं विदूषकं राजधानीं प्रेषयति । विदूषको राजधानीं गच्छति राजा तु सारथि-द्वितीयो रथमारुह्य ऋषीणां यज्ञरक्षणार्थमाश्रमं प्रविशति ।

(१८) प्रश्नः—अभिज्ञानशाकुन्तलस्य तृतीयाङ्कस्य कथानकं संक्षेपेण समुपवर्ण्यताम् ।

उत्तरम्—तृतीयाङ्कस्य विष्कम्भके सर्वप्रथमं कश्चित् शिष्यो दृश्यते यः खलु पूर्वमिदं सूचयति यत् राज्ञः प्रवेशमात्रेणैव ऋषीणां सर्वं यज्ञयागादिकं कर्म निरुपप्लवं जायते । तेनैवेदमपि ज्ञायते यत्—बलवदसुस्थशरीरा वर्तते शकुन्तला । तत्सख्यौ अनसूयाप्रियम्बदे तस्याः शीतोपचारपरायणे स्तः । 'शकुन्तला यत्नतः परिरक्षणीया यतो हि सा कुलपतेः द्वितीयमुच्छ्वसितमस्ति अहमपि शकुन्तलायै गौतमीहस्ते वैतानिकं शान्त्युदकं प्रेषयामीति ।

अङ्कस्य प्रारम्भे कामपीडितो राजा भूयो भूयः सर्वथा शकुन्तलामेव चिन्त-यति । एकतः मनोभवं कामदेवम्, अपरतश्च तदुद्दीपकं चन्द्रमसं निन्दयति । सर्वथोद्विग्नो राजा स्वमनोविनोदार्थं प्रियाशरणमेव गन्तुमिच्छति । मध्याह्ने समये तया कुत्र भवितव्यम् ? इति ध्यायं ध्यायं राजा अनुमालिनीतीरं लतागृहं गच्छति । एकस्मिन् लतागृहे सखीभ्यामुपास्यमानां प्रियतमां दर्शं दर्शं हर्षप्रकर्ष-मधिगच्छति राजा । लताव्यवहितः सन् तासां विश्वस्तकथितानि शृणोति ।

नानाप्रकारेण कृतशीतोपचारायाः शकुन्तलायाः उपरि शीतलेन कमलिनी-पत्रेण सख्यौ उपवीजयतः किन्तु तदुपरि कोऽपि प्रभावो न दृश्यते । सख्यौ शकुन्तलादशां दर्शं दर्शं चिन्तिते स्तः । राजाऽपि अस्यास्तापो मनसिजकृतो-निदाघकृतो वेति सूक्ष्मं विचारयन् तत्सौन्दर्येण कामकृत एवायं दोष इति दृढी-करोति । प्रियम्बदापि यत् राजर्षेः प्रथमदर्शनादेवास्या इयं स्थितिरिति स एवास्यास्तापकारणमिति तर्कयति । अनसूयाऽपि तस्यास्तर्केण सहमताऽस्ति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अतोऽनसूया शकुन्तलां सुस्पष्टं पृच्छति—'सखि ! किं निमित्तं तेऽयमायासः ?' इति। शकुन्तला सहसा निवेदयितुं नेच्छति, किन्तु अगतिकगत्या निवेदयति—'यतः प्रभृति तपोवनरक्षिता स राजर्षिः मम दर्शनपथं गतः……' इति।

शकुन्तलामनोभावं श्रावं श्रावं राजा समधिकं हर्षमनुभवति, सख्यावपि किमपि निर्वृते भवतः। राजनि शकुन्तलाभिलाषं सख्यौ सर्वथा प्रशंसयतः। 'यदि वामनुमतं ततस्तथा प्रवर्त्तितव्यं यथा तस्य राजर्षेरनुकम्पनीया भवामी'ति शकुन्तलावचनं श्रावं श्रावं सख्यौ शकुन्तलया मदनलेखं कारयतः। शकुन्तला सर्वमुपायापायं चिन्तयित्वा यथा शकुन्तला राजनि तथा राजापि शकुन्तलाया-मस्तीति सख्याऽऽश्वस्ता सती कमलिनीपत्रे नखेन मदनलेखं करोति—

'तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रिमपि।
निष्कृप ! तापयति बलीयस्तव हस्तमनोरथानि अङ्गानि ॥' इति।

राजा लताकुञ्जान्निःसृत्य शकुन्तलामाश्वासयति। तथा शकुन्तलायाः सन्देहनिवृत्तिं करोति—

'परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररशना चोर्वी सखी च युवयोरियम् ॥ इति ॥

शिलातले पुष्पशय्यायामधिरूढां शकुन्तलां तदेकदेशे च समुपविष्टं राजानं त्यक्त्वा सव्याजं सख्यौ ततो बहिर्गच्छन्ति। शकुन्तलादुष्यन्तयोः नानाप्रकारेण प्रणयप्रसङ्गो जायते। आवयोः गान्धर्वविवाहोऽवश्यमेव गुरुजनैः स्वीकरणीयो भविष्यतीति दुष्यन्तेन कथिता शकुन्तला गान्धर्वविवाहविधिना राज्ञा विवाहिता जाता।

शकुन्तला तस्मात् लतागृहाद् वहिर्याति। राजा तां निवारयति, किन्तु शकुन्तलायां गतायां स बहुशश्चिन्तितो जायते। शकुन्तलाहस्तपतितं लीलाभरणं प्राप्य बहुदुःखितोऽस्ति। शकुन्तलालीलाभरणग्रहणव्याजेन पुनर्लतागृहं प्रविशति। शकुन्तला राजानं धैर्यमुपदिशति। राजा स्वयमेव तत्स्थाननिवेशनपर्णेन लीलाभरणं शकुन्तलायाः हस्ते प्रत्यर्पयति। नाना प्रकारेण पुनस्तयोः प्रणयप्रसङ्गो जायते।

ततः शिष्येण प्रेषिता गृहीतवैतानिकशान्त्युदकहस्ता ज्ञातशकुन्तलाऽस्वास्थ्यवृत्तान्ता गौतमी तत्रागच्छति। तामायान्तीं दृष्ट्वा सख्योः सङ्केतं प्राप्य शकुन्तला दुष्यन्तमाच्छदयति। गौतम्यादेशानुसारं च शकुन्तला पुनरप्यागम-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

नाथं स्वप्राणप्रियमामन्त्र्य, उटजं गता। गतायां तस्यां कथं कथमपि राजाऽपि ततो गत इति पटाक्षेपः तृतीयाङ्कस्य।

(१६) प्रश्नः—अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथानकं संक्षेपतो वर्णनीयम्।

उत्तरम्—चतुर्थाङ्कस्य विष्कम्भके एकतः कुसुमावचयं नाटयन्त्यौ शकुन्तलासख्यौ शकुन्तलाविषये एव चिन्तिते स्तः, विशेषतोऽनसूया। गान्धर्वेण विधिना शकुन्तलामुद्वाह्य राजधानीं गतो राजा किमपि पत्रादिकं वार्तामात्रं वा न विसृजतीति शकुन्तलासख्युः अनसूयायाः मनसि कष्टमस्ति। प्रियम्वदाऽनसूयामाश्वसयति यत्तादृशो आकृतिविशेषा गुणविरहिता न भवन्ति—इत्यादि, तथापि अनसूया मनसि शान्तिर्नास्ति।

अपरतश्च प्रियचिन्तापरायणा शकुन्तला अतिथिरूपेणोपस्थितं सुलभकोषं महर्षिणं दुर्वाससं नैव ज्ञातवतीति दुर्वासास्ताम्—'यं विचिन्तयन्ती त्वमुपस्थितं तपोनिधिं मां वेत्सि, स बोधितोऽपि सन् त्वां तथैव न स्मरिष्यति यथा प्रमत्तः प्रथमं कृतां कथां नैव स्मरति' इति शशाप। पुष्पावचयं कृत्वा परावर्तयन्तीभ्यां सखीभ्यां तच्छ्रुतम्। प्रियम्वदया शीघ्रं गत्वा तत्पादयोः पतित्वा महर्षिः प्रार्थितः—'क्षम्यतामयं कन्यकाजनस्य प्रथमोऽपराध' इति ततो न मे वचनमन्यथा भवितुमर्हति, किन्तु अभिज्ञानादिदर्शनेन शापनिवृत्तिर्भविष्यतीति कथयित्वा गते ऋषौ सख्योः मनसि किमपि समाधानं जातम्।

विष्कम्भकानन्तरमेकतः सर्वप्रथमं सुप्तोत्थितः कण्वशिष्यो वेलोपलक्षणार्थमुटजाद् बहिरागच्छति। पश्यति कियन्मात्रमेवावशिष्टाऽस्ति रजनी। शिष्यो बहुशः प्रभातं वर्णयति, तेजोद्वयस्य सूर्याच्चन्द्रमसोः युगपद् व्यसनोदयाभ्यां लोको दशान्तरेषु नियम्यतीति कथयित्वा अतः परं शकुन्तलायाः दशान्तरमेव भविष्यतीति सङ्केतयति।

अपरतोऽनसूया शय्यायामेवोपविष्टा शकुन्तलाचिन्तनपरायणा प्रभातकरणीयेष्वपि कार्येषु वितरताऽस्ति, आक्रोशयति च सर्वथाऽतिसन्धानपरं राजानम्। तत एवानसूयां प्रियम्वदा आगच्छति श्रावयति च शकुन्तलाया मङ्गलयात्राम्—

प्रवासात्प्रतिनिवृत्तः अग्निशरणं प्रविष्ट कण्व आकाशवाचा ज्ञापितः यत्—'तव कन्या शकुन्तला भुवः भूतये दुष्यन्तेन परिणीता सती तदाहितं तेजो धारयति।' इति। एवं ज्ञातशकुन्तलोद्विवाहवृत्तान्तो महर्षिः कण्वः—'अद्यैव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

त्वामृषिरक्षितां भर्तुः सकाशं प्रेषयामि' इत्युक्तवान् । सर्वमिदं प्रियम्वदामुखा-च्छ्रुत्वाऽनसूया प्रसन्ना जायते । उभे ते शकुन्तलायाः सकाशं गत्वा मङ्गल-समालम्भनादिकं सम्पादयतः । क्वचिच्च तापस्यो नानाप्रकारेणाशीर्वचोभिस्ता-मभिनन्दयन्ति ।

शकुन्तलार्थं वनस्पतिभ्यः प्रदत्तमाभरणादिकमानीय कश्चित् शिष्यः तत्सख्योः हस्तयोः समर्पयति । तैश्च चित्रं दृष्ट्वा शकुन्तला सखीभ्यां प्रसाधिता । ततश्च तत्रागच्छति स्नानोत्तीर्णः कण्वः । शकुन्तला तत्समुदाचारं समाचरति स च—

'ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
पुत्र त्वमपि साम्राजं सेव पुरुमवाप्नुहि ॥'

इत्याशीर्वचसा तां समाजितवान् । ततश्च कण्वादेशानुसारं शकुन्तलायाः यात्रा प्रारब्धा । महर्षिणा कण्वेन पतिगृहगमनाय शकुन्तलामनुज्ञां दातुं सर्वे वनस्पतयः प्रार्थिताः । वनस्पतिभिश्च कोकिलारावेणानुज्ञा प्रदत्ता ।

शकुन्तला पतिगृहं गच्छति । निखिलमेवाश्रमपदं शोकाकुलमस्ति, मृगाः न खादन्ति दर्भकवलम्, मयूरैश्चापि नर्तनं परित्यक्तम्, किं बहुना लताभिः पाण्डु-पत्रैरश्रूणि मुञ्चितानि । सर्वत्र शोकस्य छाया आच्छादिताऽस्ति । शकुन्तला रोदिति । तावत् कश्चिन्मृगपोतस्तां पटान्ते पुनः पुनः सज्जते । 'जनन्या विना यथा त्वं मया वर्द्धितस्तथैव मद्विरहितं त्वां तातोऽनुचिन्तयिष्यति' इत्युक्त्वा शकुन्तला गच्छति ।

कण्वः शिष्यैः दुष्यन्तं सन्देशं प्रेषयति—'अस्मान् संयमधनान् विचिन्त्य आत्मनः उच्चैः कुलं च विचिन्त्य तथा चास्यां स्वकीयां स्नेहप्रवृत्तिं च विचिन्त्य दारेषु इयं सामान्यप्रतिपत्तिपूर्वकं दृश्या' इति । शकुन्तलापि—'गुरून् शुश्रूषस्व सपत्नीजने प्रियसखीवृत्तिं कुरु, भर्तुः विप्रकृतापि रोषणतया प्रतीपं मा गमः परिजने दक्षिणा तथा भोगेषु अनुत्सेकिनी भव' इति बहुशः कण्वेनोपदिष्टा जाता ।

तात ! पुनः कदा तु तपोवनं प्रेक्षिष्ये ? इति शकुन्तलया पृष्टो महर्षिः कण्वः—'चिराय सदिगन्तमहीशपत्नी भूत्वा, अप्रतिरथं तनयं प्रसूय, तत्सन्नि-वेशितधुरेण भर्त्रा सहैव अस्मिन्नाश्रमे शान्त्यै पदं करिष्यति । इत्युत्तरयित्वा शकुन्तलां विसर्जितवान् ।

गतायां शकुन्तलायां व्यपगतभारो जायते महर्षिः कण्वः—कन्याधनं प

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कीयमस्ति। कन्यां परिणेतुः समीपं सम्प्रेष्य विशदान्तरात्मा जातोऽस्मीति कण्ववाक्येन चतुर्थाङ्कस्य समापनं जायते।

(२०) प्रश्नः—अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य कथासारांशो लेख्यः।

उत्तरम्—अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य कथानकं प्रणयविच्छेदात्मकमस्ति। पञ्चमाङ्कस्य प्रारम्भे जरापीडितः कञ्चुकी पूर्वं स्वकीयां जरावस्थां वर्णयति। ततश्च राजानं दृष्ट्वा सर्वथा प्रशंसयति यत् यथा भानुः अनवरतं प्रचलति, यथा च वायुः रात्रिन्दिवं प्रयाति यथा वा शेषः सदैवाहितभूमिभारोऽस्ति तथैव सर्वदा प्रजारक्षणं राज्ञां धर्मोऽस्तीति। तावदेव नेपथ्यतो वैतालिकाभ्यां कृताः राज्ञः स्तुतयः श्रूयन्ते। राजा विदूषकेन सहोपविष्टोऽस्ति। नेपथ्यतो वीणाध्वनिः जायते। सङ्गीतशालाभ्यन्तरे हंसवती वर्णपरिचयं करोतीति विदूषकेन संभाविता ततश्च गीतिकाया अर्थानुसन्धानेन राज्ञा स्मृतः यत् मया सकृत् कृतप्रणयोऽयं जनः। तदहमेवास्याः उपालम्भविषय इति। हंसवतीं सान्त्वयितुं विदूषकं प्रेषयित्वाऽपि राजा तया गीत्याऽतीव समुत्कण्ठितो जायते। सम्भवतो दुर्वासाशापवशाद् विस्मृतायामपि शकुन्तलायामव्यक्तरूपेण तामेवोद्दिश्योत्कण्ठा जायते किन्तु न तथा जानाति राजा।

ततः शकुन्तलामादाय कण्वशिष्याः दुष्यन्तस्य राजसभां प्रविशन्ति। अवगुण्ठनवती नातिपरिस्फुटशरीरलावण्यां शकुन्तलां दृष्ट्वा राजा चकितो जायते, पश्चाच्च सः परकलत्रदर्शनं वारयति। शिष्याः राजानं कण्वसन्देशं श्रावयन्ति—'मिथः समयादिमां मदीयां दुहितरं भवानुपयेमे। तन्मया प्रीतिमता युवयोरनुज्ञातम्।······तदिदानीमापन्नसत्त्वेयं गृह्यतां सहधर्मचरणाय' इति।

राजा शकुन्तलाविवाहवृत्तान्तेनात्मनोऽनभिज्ञतां प्रदर्शयति। गौतमी शकुन्तलाया अवगुण्ठनमपसारयति ततोऽपि न प्रत्यभिजानाति राजा, कथयति च भोस्तपस्विनः चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि। शकुन्तला विवाहवृत्तान्तस्मरणार्थमेकान्ते तयोः घटिताः काश्चिद्घटनाः श्रावयति। ततोऽपि राजा यदा नैव स्मरति तदा सा अभिज्ञानमङ्गुलीयक दर्शयितुं स्वकीयामङ्गुलीं प्रसारति। अङ्गुलीयशून्यामङ्गुलीं दृष्ट्वा शकुन्तला हतप्रभा जायते। गौतम्यादयश्च सर्वथाऽसमर्थाः जायन्ते शकुन्तलाविवाहं स्मारयितुम्। शिष्यैः राजा सर्वथा निन्दितो जातः। तथा च—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

'तदेषा भवतः पत्नी त्यज वैनां गृहाण वा ।
उपयन्तुर्हि दारेषु प्रभुता सर्वतोमुखी ॥'

इत्युक्त्वा शकुन्तलां तत्रैव त्यक्त्वा शिष्याः गन्तुं प्रवृत्ताः । शकुन्तलापि ताननुसृतवती किन्तु—'यथा क्षितिपो वदति यदि त्वं तथाऽसि तर्हि उत्कुलया त्वया किम् ? अथात्मनो व्रतं शुचि वेत्सि तर्हि पतिगृहे तव दास्यमपि क्षममस्ति' इत्युक्त्वा शिष्येण सा निर्भर्त्सिता ।

गताः कण्वशिष्याः । शकुन्तला हस्तपादौ प्रक्षेपयन्ती रोदितुं प्रवृत्ता जाता। चिन्तासागरे आनखपादं निमग्नोऽस्ति राजा दुष्यन्तः । तदा पुरोधसा एका व्यवस्था स्थापिता—आदेशिकानां कथनानुसारं तव पुत्रेण चक्रवर्तिना भवितव्यम् । अतः प्रसवं यावदियं मम गृहे तिष्ठतु । प्रसवानन्तरं यदि अस्याः पुत्रश्चक्रवर्तिलक्षणोपेतो भविष्यति तदेयं पत्नीत्वेन त्वया ग्रहणीया भविष्यति अन्यथा यथाऽस्यै रोचिष्यते तथा करिष्यतीति ।

सम्पन्नायां पुरोहितव्यवस्थायामेका आश्चर्योत्पादिका घटना सञ्जाता। अप्सरस्तीर्थमारात् कश्चित् स्त्रीसंस्थानं ज्योतिः शकुन्तलामङ्के उत्क्षिप्य तिरोहितं सञ्जातम् । [इयमस्ति मेनकायाः शकुन्तलामातुः प्रियसखी मिश्रकेशी। या शकुन्तलामादायाकाशयानेन कश्यपस्याश्रमं शकुन्तलां नीता] सर्वेऽनया घटनया विस्मिताः जायन्ते ।

इतो राजमुद्राङ्कितमङ्गुलीयकमादाय तद् विक्रेतुमापणमागतः कश्चिद् पुरुषो राजपुरुषैः धृतः । कुतः इदमुत्कीर्णनामाक्षरं राजकीयमङ्गुलीयकम् ? इति तैः पृष्टः पुरुषोऽङ्गुलीप्राप्तिं प्रतिपादयन् कथयति—अहं धीवरोऽस्मि एकस्मिन् दिवसे मया रोहितमत्स्यकः प्राप्तः । तद् खण्डशः कृतः । तस्योदरत एवेदं महाभासुरं रत्नमङ्गुलीयकमाप्तम् । विक्रयार्थं प्रदर्शिते एव भवद्भिः गृहीतोऽस्मीति।

सर्वं ज्ञात्वाऽपि स पुरुषो राजपुरुषैः राज्ञः समक्षमुपस्थापितः । राजाऽङ्गुलीयकदर्शनमात्रेणैव ज्ञातशकुन्तलावृत्तान्तो दुःखितः सञ्जातः स पुरुषस्तु सपारितोषिको मुक्तः सञ्जातः । राजा सर्वथा शकुन्तलामेवानुचिन्तयति ।

(२१) प्रश्नः—अभिज्ञानशाकुन्तलस्य षष्ठाङ्कस्य कथानकं संक्षेपतो वर्णनीयम् ।

उत्तरम्—अभिज्ञानशाकुन्तलस्य षष्ठाङ्कस्य कथानकं प्रायश्चित्तात्मकमस्ति । अस्मिन्नेवाङ्के राजा दुष्यन्तो निरन्तरमश्रूणि प्रवाहयन् दुःखितः सन्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

शकुन्तलापरित्यागरूपदुष्कृतस्य प्रायश्चित्तमिवाचरति। षष्ठाङ्कस्य प्रारम्भे चेटीद्वयं परस्परं वार्तालापं करोति। आम्रमञ्जरीं हस्ते आदाय ते कामदेवस्यार्चनमुपक्रमेते। तावदेव कञ्चुकी प्रविश्य तच्चेटीद्वयं सूचयति देवेन राज्ञा दुष्यन्तेन तावन्मधूत्सवः प्रतिषिद्धोऽस्तीति। वासन्तैस्तरुभिरपि राज्ञः आदेशः स्वीकृतः शासनं च प्रमाणीकृतमिति कञ्चुकिना ज्ञात्वा ते चेट्यौ क्षमायाचनं कुरुतः प्रतिपादयतश्चात्मनोः आगन्तुकत्वं राष्ट्रियेण मित्रावसुना प्रमदवने चित्रकम् अर्पयितुं भर्तुपादमूले प्रेषिते इति। ताभ्यां पृष्टः कञ्चुकी कामार्चनप्रतिषेधकारणं प्रतिपादयति—

'यदैवाङ्गुरीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा रहसि मया तत्रभवती शकुन्तला मोहात् प्रत्यादिष्टेति, तदा प्रभृत्येव पश्चात्तापमुपगतो देवः।' अतएव वैमनस्यात् प्रत्याख्यातः उत्सवः।

ततो राजा विमनायितस्तिष्ठति, आत्मानं चाक्रोशयति—प्रथमं प्रियतमया प्रतिबोध्यमानमपि सुप्तं मम हतहृदयमनुभवतु नाम दुःखमिति। राजा अमात्ये राज्यकार्यं त्यक्त्वाऽनुदिनं शकुन्तलादुःखेन परितप्यमानोऽस्ति। विनोदसमर्थैश्चित्रैः चित्रितेऽपि प्रमदवने राजा परितोषं नानुभवति, विदूषकेन सह माधवीलतागृहं गत्वा शकुन्तलायाश्चित्रं पश्यति।

मेनकाया आदेशात्तस्याः प्रियसखी मिश्रकेशी सर्वदा राजानमनुसरति, प्रशंसयति च शकुन्तलासौभाग्यम्। मिश्रकेश्यपि लतासंश्रिता शकुन्तलायाश्चित्रं पश्यति। राजा विदूषकं कथयति—मित्र! शकुन्तलावृत्तान्तं सर्वमेव पूर्वं भवते निवेदितमासीत् किन्तु मया विस्मृतं भवतापि नैव स्मारितम्, भवतापि कदाचिद् विस्मृतं स्यात्। विदूषकः कथयति मया तु नैव विस्मृतमासीत् किन्तु भवता यत् पूर्वमुक्तम्—

'परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः।'

इति, अतएव मया न सत्यत्वेन नाङ्गीकृतमिति न स्मारितम्।

राजा निराकरणविक्लवायाः शकुन्तलायाः दीनां तां तामवस्थां स्मारं स्मारं विक्लवतामेवानुभवति। राजा अङ्गुलीयकं विधानं स्मारं स्मारम् अङ्गुलीयकं पत्कारयति यत् त्वया तत् कोमलकराङ्गुलिः कथमिव परित्यक्ता इति। यदि वं पतितं न स्यात् तदा किमपि विक्लवं न जायेत्।

राजा चेट्या आनीतं शकुन्तलाचित्रं पश्यति। साक्षादुपस्थितां प्रियामनादृत्य चित्रगतायास्तस्याः सम्मानं तथैव यथा नदीं परित्यज्य मृगतृष्णिकायां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कस्यचित् स्नेह इति । तस्मिन् चित्रे यद् यदपूर्णमस्ति—मालिनी नदी, तत्ती लतागहनानि, मृगसमूहः, शकुन्तलाभिप्रेतप्रसाधनानि इत्यादि सर्वं चित्रे मिच्छति । चित्रगताया अपि शकुन्तलाया मुखे परिभ्रमन्तं गुञ्जन्तं भ्रमरं दृष्ट्वा स राजाऽतीव क्रुद्धो जायते तथा च तं कमलोदरबन्धनस्थं कर्तुं कथयति।

अस्मिन्नेवान्तरे अमात्यः पौरकार्यं पत्रे आरोप्य राज्ञः पार्श्वे प्रेषयति तत्रैका समस्यास्ति कश्चिद् धनवृद्धिर्नाम वणिक् अनपत्य एव विपन्नः। धनमिदानीं राजस्वतामापद्यते तद्विषये किं करणीयम् ? राजा बहुपत्नीक तस्य वणिजः कस्यामपि पत्न्यां कश्चित् पुत्रः स्यात् काचिद् वा गर्भस्थं शिशुं धारयति वा न वेति तत्त्वतो ज्ञातुमिच्छति । तस्य काचित् पत्नी सद्य निर्वृत्तपुंसवना वर्तते इति प्रतिहारिणा ज्ञात्वा राजा तदनुकूलमाचरितुम सन्दिशति तथा स्वयमेवोद्घोषयति—

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
तस्य तस्य कृते राजा दुष्यन्त इति घुष्यताम् ॥

अस्य वणिजो घटनाश्रवणानन्तरं राज्ञः कष्टं किमप्यन्यदेव जायते चिन्तयति अनपत्यस्य ममाप्यन्ते इयमेवावस्था स्यादिति । पुनश्च गर्भवतीं न्तलां स्मारं स्मारं बहुकष्टमनुभवति । मम कुले कश्चित् निपवनकर्म नास्ति । मयि मृते कः खलु पितृणां जलदानादिकं सम्पादयिष्यतीति ध्यायं शोकसागरे निमग्नः सन् मूर्च्छितो जायते ।

ततश्चित्रफलकहस्तं विदूषकं देव्याश्चेट्यस्ताडयन्ति तत्कोलाहलेन श्वासो राजा देवीं भर्त्सयति । ततश्च कश्चिददृश्यशरीरो विदूषकं प्रत्या भग्नास्थि कर्तुमिच्छति । राजा तस्मै अभयदानं करोति । हस्ते धनुरादाय राजनि तत्र मातलिः प्रविशति श्रावयति च देवेन्द्रसन्देशं यत् देवासुरस इन्द्रो भवत्साहाय्यमपेक्षत इति । अतः सम्प्रत्येव विजयाय प्रस्थानं प्रतिप राजा तथा करोतीति षष्ठाङ्कस्य पटाक्षेपः ।

(२२) प्रश्नः—अभिज्ञानशाकुन्तलस्य सप्तमाङ्कस्य कथानकं सं पतो वर्णनीयम् ?

उत्तरम्—सप्तमाङ्कस्य प्रारम्भो स्वर्गतः परावर्तमानयोः मातलिदुष्यन्त वार्तालापेन जायते । दुष्यन्तो देवेन्द्रकृतमात्मनः सम्मानं बहु मनुते, मातलि दुष्यन्तकृतं देवेन्द्रसाहाय्यं प्रशंसति । मया तु यद्यत् कृतं तत् सर्वं शतक्रतो

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

महिमेति प्रतिपादयति। वायुलोक-मेघलोकतो भूत्वा मनुष्यलोकमागच्छति मातलिरथः। तत्रास्ति हेमकूटो नाम किंपुरुषपर्वतः, यो खलु तपस्विनामपि परं क्षेत्रमस्ति। अत्रैव ब्रह्मपुत्रस्य सुरासुरगुरोः मारीचस्याश्रममस्ति यत्र स सपत्नीकस्तपश्चरतीति मातलिमुखाच्छ्रुत्वा तत्र सञ्जातश्रद्धो दुष्यन्तस्तमुद्देशमवलोकयितुं स्वकीयामिच्छां प्रकटितवान्। मातलिः रथमवतारयति, सम्प्रति तावुभावपि भूमौ वर्तेते।

स्वर्गादप्युत्कृष्टतरं मारीचस्याश्रमं दर्शं दर्शं तौ समधिकं प्रसन्नौ स्तः। मारीचदर्शनाय कृतोद्योगौ तौ कार्यान्तरव्यग्रस्य तस्य महर्षेः प्रतीक्षां कुर्वन्तौ अशोकवृक्षच्छायामाश्रित्य तिष्ठतः। दुष्यन्तस्य बाहुस्फुरणं जायते। नेपथ्यतः—'मा खलु चपलतां कुरु' इति शब्दं श्रुत्वा किञ्चिदिव सम्भ्रान्तो जायते राजा। शब्दानुसारेण दर्शनसक्तो राजा पश्यति—'काश्चिद् बालकः तापसीभ्यामवरुध्यमानोऽपि मातुरर्धपीतस्तनम्, आमर्दक्लिष्टकेसरम्, सिंहशिशुं प्रक्रीडितुं करेणैवावकर्षतीति। स सिंहशिशोः दन्तान् गणयितुमिच्छति।' तस्य बालकस्य नाम 'सर्वदमनः' इत्यस्ति—इत्यपि राजा तापसीमुखाद् जानाति। राज्ञो हृदयं पुत्रस्नेहेन स्नेहिलं जायते।

यदा काचित् तापसी बालकाय भाययति सिंहिकाभयेन तदापि स भीतो न जायते। यदा अपरा क्रीडनकं दातुं कथयति तदा प्रसार्यमाणे हस्ते चक्रवर्तिचिह्नं दृष्ट्वा राजा पुनरपि चकितो भवति। यदा बालकस्तापसीं न गणयति न च त्यजति सिंहशिशुं तदा सा तापसी ऋषिकुमारानाह्वयन्ती सम्मुखमुपस्थितं राजानमेव तद्धृष्टतां दर्शयति। राजा तमृषिकुमारकेन सम्बोधयति तदा नायमृषिकुमारः इत्यर्धोक्तायां तापस्यां राजा तमङ्के गृह्णाति। उभेऽपि तापस्यौ आश्चर्यं प्रकटयन्ति। किमिव? इति पृष्टे राजनि तापसी अपरिचितस्यापि भवतो वचनेनायं प्रकृतिस्थ इति श्रावयित्वा 'पौरव! अयम् अप्सरःसम्बन्धेन पुनरस्य बालकस्य जननी इहैव देवगुरोस्तपोवने प्रसूता' इति सर्वं राजानं श्रावयति।

मृन्मयूरमर्पयन्ती तापसी यदा—'सर्वदमन! प्रेक्षस्व शकुन्त-लावण्यम्' इति कथयति तदा शकुन्तला-शब्दं श्रुत्वा बालकः सम्भ्रान्तो भवति कथयति च 'कस्मिन् सा मे अम्बा' इति। तदा ज्ञातबालकमातृनामधेयो दुष्यन्तः—'किं शकुन्तलेत्यस्य मातुराख्या' इति मनसि चिन्तयन् अस्ति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तदैव बालकस्य मणिबन्धं रक्षाकाण्डकरहितं दृष्ट्वा विस्मितासु ता... भूमौ निपतितं रक्षाकाण्डकमुत्थापयितुमिच्छति राजा । तापस्यौ वारय... किमिव ? इति पृष्टे राजनि तापसी तत्प्रभावं वर्णयति यदस्य पितरौ... यः कोऽपि भूमिनिपतितमेतद् स्पर्शयिष्यति स मृतो भविष्यतीति प्रतिपाद... राजा रक्षाकाण्डकं गृह्णात्येव न च मृतः । इमामाश्चर्यात्मिकां घटनां शकु... श्रावयितुं तापस्यौ गच्छतः ।

तदैव तत्र समागच्छति धृतैकवेणी शकुन्तला । शकुन्तलादुष्यन्तयोः अ... साक्षात्कारो जातः इयं शकुन्तलैव इति दुष्यन्तस्तथा आर्यपुत्र एवाय... शकुन्तला चिन्तयति । राजा शकुन्तलायाः पादयोः पतति । शकुन्तला त... प्याश्वासयति तथा चायं तव पितेति सर्वदमनं प्रतिपादयति ।

महर्षिः मारीचस्तत्सर्वं पूर्वकथानकं राजानं श्रावयित्वा शकुन्तलां दुष्य... समर्पितवान् । राजा पत्नीपुत्राभ्यां सह राजधानीं प्रति प्रस्थानमकरोत् । काले स एव पुत्रो भरत इति नाम्ना प्रसिद्धो जातः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

श्लोकव्याख्याभागः

प्रथमोऽङ्कः

(१) आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ १।२ ॥

सन्दर्भः—श्लोकोऽयं कविकुलकमलदिवाकरेण, काव्यमानसमरालेन, पृथिव्याः हारायमानेन, संस्कृतसाहित्योदधिपूरणाय जलदायमानेन, अप्रतिमप्रातिभसम्पत्तिभासमानेन 'कनिष्ठिकाऽधिष्ठितकालिदासः' इत्युक्तिदिशा सर्वथाऽसमानेन, कवितावनिताविलासेन, महाकविना कालिदासेन विरचितस्य, संस्कृतसाहित्यललामभूतस्य निखिलतत्त्वपरिपूतस्य, सर्वथा नवनवस्य, देशेषु विदेशेषु च ख्यातख्यातस्य अभिज्ञानशाकुन्तलनामधेयस्य नाटकस्य प्रथमाङ्कादुद्धृतोऽस्ति ।

प्रसङ्गः—प्रसङ्गेऽत्र कविः, सूत्रधारेण पात्राणां सावधानतोपदेशार्थमुक्ते सति 'सुविदितप्रयोगतयाऽऽर्यस्य न किमपि परिहास्यते' इति नटयोत्तरिते सूत्रधारमुखेन भूतार्थं कथयति—

अन्वयः—विदुषाम् आपरितोषात् प्रयोगविज्ञानं साधु न मन्ये । शिक्षितानां बलवद् अपि चेतः आत्मनि अप्रत्ययम् (भवतीति) ।

व्याख्या—विदुषां=विज्ञानाम् आपरितोषात्=यावत्सन्तोषो न स्यात् तावत् प्रयोगस्य=नाट्यविधानस्य विज्ञानं=चातुर्यं साधु=सम्यक् उत्तममिति न मन्ये=स्वीकरोमि यतो हि शिक्षितानां=विदितवेदितव्यानां बलवत्=दृढम् उचितमनुचितमिति विवेकक्षममपि चेतः=हृदयम् आत्मनि=स्वस्मिन् न=नास्ति प्रत्ययं=विश्वासो यस्मिन् तत् अविश्वस्तं भवतीति भावः ।

अत्र पूर्वार्द्धे पर्यायोक्तालङ्कारः, भङ्ग्या प्रयोगविज्ञानस्यैव प्रतिपादितत्वात्—'पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ।' इति लक्षणात् । उत्तरार्धे तु सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः—'सामान्यं च विशेषेण विशेषस्तेन वा यदि । समर्थ्यतेऽर्थान्तरन्यासोऽसौ' इति लक्षणात् । आर्याच्छन्दः—'यस्याः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्च साऽऽर्या ॥' इति लक्षणात् ॥

(२) सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ १।३

सन्दर्भः—द्रष्टव्यं श्लो०—१

प्रसङ्गः—प्रसङ्गेऽस्मिन् यदा सूत्रधारो नटीं परिषदः श्रुतिप्रमो काञ्चिद्गीतिं गातुं कथयति, नटी गातुमृतुनिर्देशं कर्तुं सूत्रधारं कथयति । सूत्रधारो ग्रीष्मर्तुमधिकृत्य गातुमुक्त्वा ग्रीष्मवैशिष्ट्यं प्रतिपादयति—

अन्वयः—सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः प्रच्छायसु निद्रा दिवसाः परिणामरमणीयाः (सन्तीति) ।

व्याख्या—सुभगः=शोभनः सुखकरः सलिले=जले अवगाहनं= येषु ते, पाटला=पुष्पविशेषस्तस्य संसर्गेण—सम्बन्धेन सुरभिणः=सुगन्धि वनस्य=अरण्यस्य वाताः=वायवो येषु ते, प्रकृष्टा छाया प्रच्छाया= च्छाया तस्यां सुलभा=सुखेन लभ्या निद्रा=स्वापो येषु ते दिवसाः परिणा अन्ते सायंकाले रमणीयाः=मनोहराः सन्तीति ।

अत्र सर्वेषां विशेषणानां साभिप्रायात् परिकरालङ्कारः—'उक्तिर्विशे साभिप्रायैः परिकरो मतः ।' इति लक्षणात् । ग्रीष्मस्य स्वभाववर्णनाच्च स्व वोक्तिरलङ्कारः 'स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्' इति लक्षणात् । छन्दः—'यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वि चतुर्थके पञ्चदश साऽऽर्या ॥' इति लक्षणात् ॥

(३) ग्रीवाभङ्गाऽभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१

प्रसङ्गः—प्रसङ्गेऽस्मिन् सशरचापहस्तो रथारूढो राजा दुष्यन्तो मृग सरन् तत्पश्चाद् धावत्येव तथापि स मृगोऽतीव दूरेऽस्ति । राजा सूतं कथय

अन्वयः—(सोऽयमिदानीमपि) अनुपतति स्यन्दने ग्रीवाभङ्गाभिरामं बद्धदृष्टिः, शरपतनभयाद् भूयसा पश्चार्द्धेन पूर्वकायं प्रविष्टः, अर्द्धावलीढैः

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विवृतमुखभ्रंशिभिः शष्पैः कीर्णवर्त्मा (अयम्) पश्य उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्यां तु स्तोकं प्रयाति ।

व्याख्या—(सः अयं=मृगः इदानीमपि=साम्प्रतमपि इयद्दूरं समागतेऽपि) अनु=पश्चात् पतति=समागच्छति स्यन्दने=रथे ग्रीवा=कन्धरा तस्याः भङ्गेन=परावर्तनेन अभिरामं=मनोहरं यथा स्यात्तथा मुहुः=भूयो भूयः बद्धा=दत्ता दृष्टिः=चक्षुर्येन सः, शरस्य=बाणस्य पतनं=पातः तस्य भयात्=भीतेः भूयसा=बहुलेनाधिकं यथा स्यात्तथा पश्चार्द्धेन=शरीरस्यार्द्धेन पश्चाद्भागेन पूर्वकायं कायायाः=शरीरस्य पूर्वं=पूर्वभाग इति तत्र प्रविष्टः= सङ्कोचितः, अर्द्धावलीढैः=अर्द्धचर्वितैः श्रमेण=परिश्रमेण विवृतं=व्यात्तं यत् मुखं=आननं तस्मात् भ्रंशिभिः=पतनशीलैः शष्पैः=तृणैः कीर्णं=व्याप्तं वर्त्म=मार्गं यस्य सः अयं=मृगः पश्य=अवलोक्य उदग्रम्=उन्नतं च प्लुतं= कूर्दनं तस्य भावस्तस्मात् वियति=आकाशे बहुतरम्=अधिकतरम् उर्व्यां= पृथिव्यां तु स्तोकम्=अल्पं प्रयाति=गच्छति ।

अत्र मृगस्य स्वभाववर्णनात् स्वभावोक्तिरलङ्कारः—'स्वभावोक्तिर्दुरूहार्थ-स्वक्रियावस्तुवर्णनम्' इति । अत्र नृपनिष्ठस्योत्साहस्य व्यञ्जनाद् वीरो रसः तथा च मृगनिष्ठस्य भयस्याभिव्यञ्जनात् भयानकरसः । स्रग्धरा वृत्तम्—'म्रभ्नै-र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात् ॥

(४) मुक्तेषु रश्मिषु निरायतपूर्वकायाः
स्वेषामपि प्रसरतां रजसामलङ्घ्याः ।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥ १।८ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—अत्र राजा दुष्यन्तो रथेनानुसरन्नपि यदा मृगं दूरं पश्यति सूतं च कथयति तदा सूतो मृगस्य दूरगमने कारणं प्रतिपादयति—उद्घातिनी भूमि-रिति रथस्य मन्दीभूतो वेगः । सम्प्रति समदेशवर्तिनस्ते न दुरासदो भविष्यतीति । अश्वानां गतिं च प्रतिपादयन् कथयति—

अन्वयः—मुक्तेषु रश्मिषु निरायतपूर्वकायाः स्वेषाम् अपि प्रसरतां रजसाम् अलङ्घ्याः निष्कम्पचामरशिखाः च्युतकर्णभङ्गाः ते वाजिनः वर्त्मनि धावन्ति नु तरन्ति ।

व्याख्या—मुक्तेषु=त्यक्तेषु शिथिलीकृतेषु रश्मिषु=रज्जुषु, प्रग्रहेषु,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

नि:=नितरां समधिकं आयतम्=दीर्घं कायाया:=शरीरस्य पूर्वं=पूर्वभा
येषां ते स्वेषाम्=आत्मनां खुराग्रेणोद्धूतानामपि प्रसरतां=वायुवेगेन गच्छ
रजसां=धूलीनाम् अलङ्घ्या:=लाङ्घितुमयोग्या: निष्कम्पा:=निश्च
चामराणां=शिरोबद्धानां भूषणानां शिखा:=अग्रभागा: येषां ते च्युत:=पति
त्यक्त: कर्णयो:=श्रोत्रयो: भङ्ग:=पतनं येषां ते एवंभूतास्ते वाजिन:=अश्
वर्त्मनि=मार्गे धावन्ति=द्रुतगत्या गच्छन्ति नु=अथवा (आकाशे) तरन्
तीर्त्वा गच्छन्तीति ।

अत्र पादत्रये वाजिनां स्वभाववर्णनात् स्वभावोक्तिरलङ्कार:—'स्वभावो
क्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्' इति लक्षणात् । अन्तिमे पादे उत्प्रेक्षा धा
तरणस्य सम्भावनात्—'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति ल
णात् । वसन्ततिलकाच्छन्द:—'उक्ता वसन्ततिलका तभजा जगौग:' इ
लक्षणात् ।

(५) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदद्धा विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥ ११९॥

सन्दर्भ:—द्रष्टव्यं श्लो०—१ ।

प्रसङ्ग:—यदा राजा मृगस्य दूरगमने कारणं पृच्छति सूतश्च भूमेरुद्घा
नीत्वं रथस्य मन्दीभूते कारणमिति प्रतिपादयन् भूयो रथवेगं निरूपयति त
राजा अश्वानां गतिं प्रशंसयन् कथयति—

अन्वय:—यद् आलोके सूक्ष्मं सहसा तद् विपुलतां व्रजति, यद् अ
विच्छिन्नं तद् कृतसन्धानम् इव भवति, यत् प्रकृत्या वक्रं तदपि नयनयो: स
रेखम् (एवञ्च) रथजवात् किञ्चित् मे दूरे न तु क्षणम् अपि किञ्चित् पा
(वर्तत इति) ।

व्याख्या—यत्=वस्तु आलोके=दर्शने सूक्ष्मं=लघुतरम् सहसा=अ
स्मात् तत्=वस्तु विपुलतां=दीर्घतां व्रजति=प्राप्नोति, यत् अद्धा=वस्
विच्छिन्नं=विभक्तम् तत् कृतसन्धानं=संयुक्तम् इव भवति, यत्=
प्रकृत्या=स्वभावत: वक्रं=तिर्यग्भूतं तदपि=तद्वस्त्वपि नयनयो:=नेत्र
समा=ऋजु रेखा यस्य तत् ऋजुकमिति भाव:, एवञ्च रथस्य=स्यन्दन

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जवात्=वेगात् किञ्चिद्वस्तु मे=मम दूरे न=नास्ति न तु क्षणमपि कृते किञ्चित् पार्श्वे=निकटे एव वर्तते ॥

अत्र द्वितीये पादे 'कृतसन्धानमिव' इत्यत्रोत्प्रेक्षा । अन्तिमे पादे 'क्षणमपि किञ्चित् न पार्श्वे न च दूरे' इत्यत्र रथजवस्य कारणात् पदार्थहेतुकं काव्यलिङ्गम् । शिखरिणी वृत्तम्—'रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात् ॥

(६) न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥ १।१० ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१

प्रसङ्गः—प्रसङ्गोऽयं तत्समयस्यास्ति यदा वृद्धिं गते रथवेगे राजा मृगपार्श्वं प्राप्य शरसन्धानं नाटयति तदा तत्रोपस्थितः कश्चित् सशिष्यो वैखानसो हस्तमुद्यम्य राजानं निवारयति—

अन्वयः—तूलराशौ अग्निः इव अस्मिन् मृदुनि मृगशरीरे अयं बाणः न खलु न खलु सन्निपात्यः । हरिणकानाम् अतिलोलं जीवितं क्व निशितनिपाताः वज्रसाराः ते शराः च क्व (इति) बत ।

व्याख्या—तूलः=कार्पासः तस्य राशौ=समूहे अग्निः=स्फुलिङ्गः इव=यथा अस्मिन्=दृश्यमाने मृदुनि=कोमले मृगशरीरे=हरिणावयवे अयं=तीक्ष्णः बाणः=शरः न खलु=निश्चयेन नैव सन्निपात्यः=प्रयोक्तव्यः, हरिणकानां=क्षुद्रमृगाणाम् अतिलोलं=चञ्चलं जीवितं=जीवनं क्व=कुत्रास्ति निशितः=तीक्ष्णः निपातः=अग्रभागो येषां ते तीक्ष्णाग्रभागाः वज्रवत्=इन्द्रकुलिशवत् सारं=बलं येषु ते वज्रवत् कठिनाः ते=तव शराः=बाणाश्च क्व=कुत्र सन्तीति बत=खेदे, उभयोः सामञ्जस्यं नास्ति । अत एवात्र मृगे बाणो नैव प्रयोक्तव्य इति ।

अत्र पूर्वार्द्धे उपमा मृगशरीरे बाणस्य तूलराशौ अग्निना सादृश्यवर्णनात् । वज्रसाराः इत्यत्र तु लुप्तोपमा । उत्तरार्धे हरिणबाणयोः वैषम्यघटनात् विषमालङ्कारः । मालिनी वृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः ।' इति लक्षणात् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(७) नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलः शिखानिष्यन्दरेखाङ्किता ॥१।१४॥

सन्दर्भः—द्रष्टव्यं श्लो०—१।

प्रसङ्गः—अत्र मृगमनुसरन् महर्षेः कण्वस्याश्रमपार्श्वमागतस्तथा च वैखानसेन मृगमारणनिवारितः, तत्प्रार्थनया चातिथिसत्कारग्रहणायाश्रमं प्रविशन् राजा अकथितोऽपि ज्ञायत एवायमाभोगस्तपोवनस्येति सूतं कथयित्वा आश्रमवैशिष्ट्यं वर्णयति—

अन्वयः—तरूणाम् अधः शुककोटरार्भकमुखभ्रष्टाः नीवाराः, क्वचित् इङ्गुदीफलाभिदः प्रस्निग्धाः उपला एव सूच्यन्ते, विश्वासोपगमात् अभिन्नगतयः मृगाः शब्दं सहन्ते, तोयाधारपथाश्च वल्कलशिखानिःष्यन्दरेखाङ्किताः सन्ति।

व्याख्या—तरूणां=वृक्षाणाम् अधः=नीचैः शुकाः=पक्षिविशेषास्तेषां ये कोटरार्भकाः=कोटरस्थाः शिशवः तेषां मुखेभ्यः=आननेभ्यः भ्रष्टाः=निपतिताः नीवाराः=धान्यविशेषाः सन्ति, क्वचित्=कस्मिंश्चित् स्थाने इङ्गुदी=तापसतरुः तेषां फलानि भिन्दन्ति=विदारयन्ति तैलनिःसारणाय कुट्टन्ति इति, अतएव प्रस्निग्धाः=चिक्कणाः उपलाः=प्रस्तराः एव सूच्यन्ते=प्रकाश्यन्ते। अत्रास्मान्न कोऽपि वधिष्यतीति विश्वासोपगमात्=विश्वासलाभात् न=नहि भिन्नाः=परिवर्तिताः गतयः=गमनानि येषां ते अभिन्नगतयः=समानरूपेणगमनशीलाः मृगाः=हरिणकाः शब्दं=रथध्वनिं सहन्ते=आकर्णयन्ति, उद्विग्ना नैव भवन्तीति। तोयाधाराः=जलाशयास्तेषां पथाः=मार्गाः जलाशयपन्थानश्च वल्कलानां=तरुत्वचां मुनिवस्त्राणां शिखाः=अग्रभागाः तेभ्यः निःष्यन्दाभिः=निःसृताभिः रेखाभिः=जलरेखाभिः अङ्किताः=चिह्निताः सन्ति। एवञ्चाकथितोऽपि ज्ञायत एवायमाभोगस्तपोवनस्येति।

अत्र तपोवनस्याभोगे नीवारादीनां हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात्। किञ्च आश्रमाभोगे नीवारादीनां हेतुत्वात् अनुमानाऽलङ्कारः। आश्रमस्य स्वभाववर्णनात् स्वभावोक्तिश्चेति काव्यलिङ्गानुमान-स्वभावोक्त्यादीनां सङ्करः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(८) कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ।। १।१५ ।।

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—द्रष्टव्यं श्लो०—७ ।

अन्वयः—पवनचपलैः कुलाम्भोभिः शाखिनः धौतमूलाः, आज्यधूमोद्गमेन किसलयरुचां रागः भिन्नः एते च नष्टाशङ्काः हरिणशिशवः अर्वाक् च्छिन्नदर्भाङ्कुरायाम् उपवनभुवि मन्दमन्दं चरन्ति ।

व्याख्या—पवनेन=वायुना चपलैः=तरङ्गितैः कुल्याः=क्षुद्रसरितः तासाम् अम्भोभिः=जलैः शाखिनः=वृक्षाः धौतानि=प्रक्षालितानि मूलानि =मूलभागाः येषां ते, आज्यं=घृतं तस्य धूमः=हवनप्रयुक्तघृतधूमस्तस्य उद्गमेन=निःसरणेन किसलयानां=नवपल्लवानां रुक्=कान्तिस्तेषां रागः =रक्तिमा भिन्नः=परिवर्तितः एते=दृश्यमानाश्च नष्टाः=विनष्टाः दूरीभूताः आशङ्काः=ताडनभयानि येषां ते हरिणानां=मृगाणां शिशवः=पोताः अर्वाक्= समीपे एव च्छिन्नाः=मृगैः कर्तिताः दर्भाणां=कुशानाम् अङ्कुराः=अग्रभागा यस्यास्तस्याम् उपवनस्य=उद्यानस्य भुवि=भूमौ मन्दमन्दं—स्वेच्छा शनैः शनैः चरन्ति=सञ्चलन्ति द्रुतगत्या नैव पलायन्त इति भावः ।

अत्राश्रमाभोगे शाखिनां धौतमूलादीनां हेतुत्वात् काव्यलिङ्गम् । आश्रमाभोगस्यानुमाने हेतुत्वात् अनुमानालङ्कारः—'अनुमानं तु विच्छित्या ज्ञानं साध्यस्य साधनात्' इति लक्षणात् । आश्रमस्वभाववर्णनाच्च स्वभावोक्तिः, इति काव्यलिङ्गानुमानस्वभावोक्त्यादीनां सङ्करः । मन्दाक्रान्ता वृत्तम्—'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्' इति लक्षणात् ।।

(९) इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समीलतां छेत्तुमृषिर्व्यवस्यति ।। १।१८ ।।

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—अत्र वैखानसप्रार्थनया आतिथ्यलाभाय कण्वाश्रमगतो राजा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

दुष्यन्तः यदा सखीभ्यां सह आश्रमवृक्षकान् सिञ्चन्तीं शकुन्तलां ददर्श तदा अन्तःपुरिकाभ्योऽपि रमणीयतरेण तस्याः सौन्दर्येण प्रभावितः सन् तामाश्रमधर्मे नियोक्तारं महर्षिणं कण्वमुपालभते—

अन्वयः—यः इदं किल अव्याजमनोहरं वपुः तपःक्षमं साधयितुम् इच्छति सः ऋषिः ध्रुवं नीलोत्पलपत्त्रधारया शमीलतां छेत्तुं व्यवस्यति ।

व्याख्या—यः=ऋषिः इदं=पुरतो दृश्यमानं किलेति निश्चये अव्याजमनोहरं=स्वाभाविकसुन्दरं वपुः=शरीरं तपसः=तपस्यायाः क्षमं=सहनयोग्यं साधयितुं=निर्मातुम् इच्छति=वाञ्छति स ऋषिः ध्रुवं=निश्चयमेव नीलोत्पलस्य=नीलकमलस्य पत्रस्य=पर्णस्य धारया शमीलतां=तन्नाम्नी लतां छेत्तुं=कर्त्तयितुं व्यवस्यति=उद्योगं करोति एवञ्च यथा नीलोत्पलपत्त्रधारया शमीलतां कर्त्तनोद्योगोऽनुचितस्तथैव शकुन्तलायाः आश्रमधर्मे नियोगोऽप्यनुचित एव ।

अत्र सुकुमारेण शकुन्तलाशरीरेण आश्रमधर्मपालनेच्छा नीलोत्पलपत्त्रधारया शमीलताच्छेदनेच्छावत् इति निदर्शनाऽलङ्कारः—'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः' इति लक्षणात् । 'ध्रुव'मित्यत्रोत्प्रेक्षेति निदर्शनोत्प्रेक्षयोः परस्परं निरपेक्षयोः एकत्र वर्तमानत्वात् सङ्करालङ्कारः । वंशस्थवृत्तम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ।

(१०) इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्त्रोदरेण ॥ १।१९ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—प्रसङ्गोऽयं तत्समयस्यास्ति यदा राजा कण्वाश्रमागत्य पादपान्तरितः सन् आश्रमवृक्षकान् सिञ्चन्तीं कण्वपुत्रीं शकुन्तलां पश्यति, तामाश्रमधर्मे नियोक्तारं महर्षिणं कण्वञ्चासाधुदर्शिनं प्रतिपादयति तदा वल्कलशिथिलनायानसूयामुक्त्वा शकुन्तला प्रियम्वदया आक्षिप्ता जायते । तदा राजा तस्याः यौवनारम्भं स्तनयुगपरिणाहच्छादि वल्कलं च दर्शं दर्शं तत्सौन्दर्यं प्रमाणयति—

अन्वयः—स्कन्धदेशे उपहितसूक्ष्मग्रन्थिना स्तनयुगपरिणाहाच्छादिना वल्कलेन अभिनवम् इदम् अस्याः वपुः स्वां शोभां पाण्डुपत्त्रोदरेण पिनद्धं कुसुमम् इव न पुष्यति ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

व्याख्या—स्कन्धदेशे=स्कन्धयोः प्रान्तभागे उपहिता=प्राप्ता दत्तेति सूक्ष्मा=लघुतरा ग्रन्थिः=बन्धनग्रन्थिः यस्मिन् तेन, स्तनयोः=उरोजयोः युगं=युगलं द्वन्द्वमिति तयोः परिणाहौ=विस्तारौ आच्छादयति तच्छीलेन, वल्कलेन=तरुत्वचा वस्त्रभूतेनेति अभिनवं=नूतनम् अस्याः=शकुन्तलायाः इदं=दृश्यमानं वपुः=शरीरं पाण्डुपत्रोदरेण=पाण्डुपत्रमध्ये पिनद्धम्=आच्छादितं कुसुमं=पुष्पम् इव=यथा स्वां=स्वकीयां शोभां=सौन्दर्यं न पुष्यति=पुष्णाति न प्रकटयति ।

अत्र पूर्णोपमाऽलङ्कारः वल्कलाच्छादितस्य शकुन्तलाशरीरस्य पाण्डुपत्रोदरपिनद्धेन कुसुमेन सादृश्यवर्णनात्—'सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालङ्कृतिः ।' इति लक्षणात् । मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(११) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ १।२० ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—मृगमनुसरन् राजा दुष्यन्तो यदा वैखानसानुरोधेन महर्षेः कण्वस्याश्रमं प्रविवेश तदा आश्रमवृक्षकान् सिञ्चन्तीः बालिकाः दृष्ट्वा किञ्चिच्चमत्कृतो जातः । तासु शकुन्तलासौन्दर्येण स अतीव प्रभावितोऽस्ति । पूर्वं तु धृतवल्कलायास्तस्याः शरीरे वल्कलं तद्रूपाननुकूलमिति विचार्य पुनश्च पश्चात् कृतसूक्ष्मविवेचनः स वल्कलेनापि तस्याः शोभा वर्धत एवेति प्रतिपादयन् कथयति—

अन्वयः—शैवलेन अनुविद्धम् अपि सरसिजं रम्यम्, हिमांशोः मलिनम् अपि लक्ष्म लक्ष्मीं तनोति, इयं तन्वी वल्कलेनापि रम्या, हि मधुराणाम् आकृतीनां किमिव मण्डनं न ।

व्याख्या—शैवलेन=शैवालनाम्नाहरिततृणविशेषेण अनुविद्धं=युक्तम् आच्छादितमपि सरसिजं=पङ्कजं रम्यं=रमणीयं भवति, हिमांशोः=शीतांशोश्चन्द्रमसः मलिनं=कृष्णवर्णमपि लक्ष्म=चिह्नं लक्ष्मीं=शोभां तनोति=विस्तारयति वर्धयतीति, एवमेव इयं=दृश्यमाना तन्वी=क्षीणशरीरा शकुन्तला वल्कलेन=तरुत्वचापि रम्या=मनोहरा, हि=यतः मधुराणां=सुन्दराणाम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

आकृतीनां=स्वरूपाणां सुन्दरस्वरूपवतामिति किमिव=किं वस्तु मण्डनम्=अलङ्करणं शोभावर्द्धकं न भवति अपि तु सर्वमेवालङ्कारायैव जायत इति।

अत्रैकस्यैव सामान्यधर्मस्य सौन्दर्यस्य रम्यं लक्ष्मीं मनोज्ञेति पृथक्पृथग्वचनेन निर्देशात् प्रतिवस्तूपमाऽलङ्कारः—'प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥' इति लक्षणात्। चतुर्थपादेन सामान्येन पादत्रयस्य विशेषस्य समर्थनादर्थान्तरन्यासः। अनयोश्च परस्परं सापेक्षत्वात् संसृष्टिः। मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(१२) अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ १।२१ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१।

प्रसङ्गः—प्रसङ्गेऽस्मिन् वृक्षं सिञ्चन्ती प्रियम्वदा यदा वृक्षसमीपे शकुन्तलां स्थातुं कथयति यतो हि तया समीपस्थया लतासनाथ इव चूतवृक्षः प्रतिभाति, तदा वस्तुतस्तस्याः रूपं ध्यायं ध्यायं राजा कथयति—

अन्वयः—अधरः किसलयरागः बाहू कोमलविपटानुकारिणौ, अङ्गेषु कुसुमम् इव लोभनीयं यौवनं सन्नद्धम् (अस्ति)।

व्याख्या—अधरः=अधरोष्ठः किसलयस्य=नवपल्लवस्य रागः=रक्तिमा इव रागो यस्य स एवंभूतोऽस्ति, बाहू=भुजौ कोमलौ च तौ विटपौ=शाखाद्वयं तौ अतः अनुकुरुतः=तुलयतः तच्छीलौ, अङ्गेषु कुसुमं=पुष्पम् इव=यथा लोभनीयं=मनोहरं यौवनं=तारुण्यं सन्नद्धम्=उपस्थितमस्ति।

अत्र पूर्वार्धे लुप्तोपमा, उत्तरार्धे च पूर्णोपमेति। आर्या जातिः—'यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ॥' इति लक्षणात् ॥

(१३) चपलाङ्गां दृष्टि स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती ॥ १।२३ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—१।

प्रसङ्गः—द्रष्टव्यं श्लो० १४।

अन्वयः—हे मधुकर ! करं व्याधुन्वत्याः चलापाङ्गां वेपथुमतीं दृष्टिं

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

बहुशः स्पृशसि, रहस्याख्यायी इव कर्णान्तिकचरः मृदु स्वनसि, रतिसर्वस्वम् अधरं पिबसि, वयं तत्त्वान्वेषात् हताः त्वं खलु कृती ।

व्याख्या—हे मधुकर=भ्रमर ! करं=पाणिं व्याधुन्वत्याः=विलोलयन्त्याः भ्रमरनिवारणायेति तस्याः शकुन्तलायाः चलौ=चञ्चलौ अपाङ्गौ=नेत्रप्रान्तभागौ यस्यास्तां वेपथुमतीं=कम्पन्तीं दृष्टिं=नेत्रद्वयं बहुशः=नानाप्रकारेण वारं वारं स्पृशसि, रहस्यं=गोपनीयमाख्यायते=कथयति तच्छीलः इव=यथा कर्णयोः=श्रोत्रयोः अन्तिकं=समीपं चरतीति=भ्रमतीति तथा सन् मृदुं=मधुरं यथा स्यात्तथा स्वनसि=शब्दं करोसि, रतेः=रतिक्रियायाः सर्वस्वं=सर्वस्वभूतम् अधरम्=अधरोष्ठं पिबसि=पानं करोसि एवंञ्च वयं=दुष्यन्तः तत्त्वस्य=वस्तुस्थितेः इयं कस्य कन्या ? कण्वस्य क्षेत्रसम्भवा अक्षेत्रसम्भवा वेति ? मद्विवाह योग्या अस्ति वा नास्ति वेति अन्वेषात्=तत्त्वतोऽनुसन्धानात् हताः=नष्टाः त्वं खलु कृती=धन्यः सफलोऽसि ।

अत्र भ्रमरे शृङ्गारिणो नायकस्य व्यवहारसमारोपात् समासोक्तिरलङ्कारः—'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः' इति लक्षणात् । चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम्—हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । अनयोश्च सङ्करः । शिखरिणी वृत्तम्—'रसैः रुद्रैश्छिन्ना यमनसभलागः । शिखरिणी' इति लक्षणात् ।।

(१४) वैखानसं किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव सदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्नाभिः ।। १।२६ ।।

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—अत्र मृगमनुसरन् राजा दुष्यन्तो यदा महर्षेः कण्वस्याश्रमं समागतस्तदा आश्रमवृक्षकान् सिञ्चन्तीः मुनिकन्यकाः दृष्ट्वा चमत्कृतो जातः । विटपान्तरितः तासां विश्रब्धालापं श्रावं श्रावं दर्शं दर्शं च शकुन्तलामाधुर्यं तस्यामनुरक्तो जातः । भ्रमरबाधानिवारणत्वेन तासां समक्षमुपस्थितः सन् शकुन्तलाविषये सख्यौ पृच्छति—

अन्वयः—अनया मदनस्य व्यापाररोधि वैखानसं व्रतम् आप्रदानात् निषेवितव्यम् किम् आहो सदृशेक्षणवल्लभाभिः हरिणाङ्नाभिः समम् अत्यन्तम् एव निवत्स्यति ?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

व्याख्या—अनया=युवयोः सख्या मदनस्य=कामदेवस्य व्यापारं=काम-भावनां रुणद्धि=निवारयति तच्छीलम् वैखानसं=ब्रह्मचर्यं व्रतम् आप्रदानात्=विवाहं यावत् निषेवितव्यम्=धारणीयं किमिति प्रश्ने, आहो=अथवा सदृशे-क्षणात्=समाननेत्रत्वात् वल्लभाभिः=प्रियतराभिः हरिणाङ्गनाभिः=मृगीभिः समं=साकम् अत्यन्तं=जीवनपर्यन्तमेव निवत्स्यति=धारयिष्यति।

अत्र विशेषणानां साभिप्रायात् परिकरालङ्कारः—'उक्तिर्विशेषणैः साभि-प्रायैः परिकरो मतः' इति लक्षणात् वसन्ततिलकावृत्तम्—उक्ता वसन्ततिलका तभजा जगौगः' इति लक्षणात्।

(१५) स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुलाः मूर्धजाः॥ १।२९॥

सन्दर्भः—द्रष्टव्यं श्लो०—१।

प्रसङ्गः—शकुन्तलाविषये किमप्यधिकं कथयन्त्याः प्रियंवदायाः वचनं श्रुत्वा क्रोधाविष्टा शकुन्तला यदा ततो गन्तुमुद्यता भवति तदा प्रियम्वदा तस्याः द्विवृक्षसेचनरूपमृणं कथयति तेन ऋणेन मुक्ता सत्येव सा गन्तुं शक्नोति—इति प्रियंवदायाः वचनं श्रुत्वा शकुन्तलायाः परिश्रान्तत्वं प्रतिपादयन् राजा कथयति—

अन्वयः—घटोत्क्षेपणात् स्रस्तांसौ अतिमात्रलोहिततलौ बाहू अद्यापि प्रमा-णाधिकः श्वासः स्तनवेपथुं जनयति, वदने कर्णशिरीषरोधि घर्माम्भसां जालकं बद्धम्, बन्धे स्रंसिनि एकहस्तयमिताः मूर्धजाः च पर्याकुलाः (सन्तीति)।

व्याख्या—घटस्य=जलकलशस्य उत्क्षेपणात्=धारणात् स्रस्तौ=नीचैं-रागतौ अंसौ=स्कन्धौ अतिमात्रं=समधिकं लोहिते=रक्ते तले=करतले ययोस्तौ तथाभूतौ बाहू=भुजौ, अद्यापि=साम्प्रतमपि प्रमाणात्=स्वाभावि-कात् अधिकः=समधिकः श्वासः=निःश्वासः स्तनयोः=वक्षोजयोः वेपथुं=कम्पं जनयति=उत्पादयति, वदने=मुखे कर्णयोः=श्रोत्रयोः कर्णालङ्कारी-भूते शिरीषे=शिरीषकुसुमे ते रुणद्धि=अवरोधयति तच्छीलम्, घर्माम्भसां=स्वेदजलानां जालकं=समूहः बद्धम्=आच्छादितम्, बन्धे=बन्धने स्रंसिनि=स्खलिते सति एकेन हस्तेन=करेण यमिताः=संयम्य धृताः मूर्धजाः=केशाः पर्याकुलाः=अस्तव्यस्ताः सन्ति। अनेन ज्ञायते यदियमधिकं परिश्रान्ताऽस्ति।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अत्र शकुन्तलायाः श्रान्तत्वप्रतिपादने एकस्यैव कारणस्य समर्थत्वेऽपि अनेकेषां कारणानां प्रतिपादनात् समुच्चयालङ्कारः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' ॥

(१६) वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ १।३० ॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—अत्र राजा दुष्यन्तः शकुन्तलायाः आत्मानं प्रति भावं विचारयति यत् यथा अस्यामहमनुरक्तोऽस्मि तथा इयं माम्प्रत्यस्ति वा न वेति? विचारयन् स जानाति यत् तस्याः माम्प्रति रागभावः प्रकटित एवास्ति—

अन्वयः—यद्यपि मद्वचोभिः वाचं न मिश्रयति मयि भाषमाणे अवहिता सती कर्णं ददाति, कामम् इयं मदाननसम्मुखी न तिष्ठति, तु अस्याः दृष्टिः भूयिष्ठम् अन्यविषया न।

व्याख्या—यद्यपि मद्वचोभिः=मम वचनैः सह स्वकीयं वाचं=वाणीं न मिश्रयति=सम्मेलयति मद्वचनप्रसङ्गे किमपि न वक्ति, मयि=दुष्यन्ते भाषमाणे=उक्ते अवहिता=सावधाना सती कर्णं=श्रोत्रे ददाति शृणोतीति भावः, कामं=यद्यपि मम=दुष्यन्तस्य आननस्य=मुखस्य सम्मुखी=प्रत्यक्षं न तिष्ठति तु=तथापि अस्याः=शकुन्तलायाः दृष्टिः=नेत्रं भूयिष्ठं=अधिकम् अन्यविषया=अन्यत्रासक्ता न=नास्ति।

अत्रानुरागोत्पत्तिं प्रति अनेकविधकारणानां प्रतिपादनात् समुच्चयालङ्कारः। वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(१७) तुरगखुरहतस्तथाहि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु ॥१।३१

सन्दर्भः—द्रष्टव्यं श्लो०—१।

प्रसङ्गः—अत्र मृगमनुसरन् महर्षेः कण्वस्याश्रमं प्रविष्टो राजा दुष्यन्तः आश्रमे सह सखीभ्यां शकुन्तलया वार्तालापं करोति, तत्प्रेमपाशग्रथितोऽस्ति, इयं मद्विवाहयोग्यास्ति न वा? इति चिन्तयन् अप्सरसम्भवां तां ज्ञात्वा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

आत्मनो विवाहयोग्यत्वं निर्धार्य नाना प्रकारेण वार्तां करोति तदैव राजानमन्वेषयन्तः सैनिकाः आश्रमं समागच्छति । नेपथ्यतः राज्ञः आगमन सूचना प्रसार्यंत, तदागमनचिह्नं च प्रतिपाद्यत इति ।

अन्वयः—तथाहि तुरगखुरहतः परितारुणप्रकाशः रेणुः शलभसमूह इव विटपविषक्तजलार्द्रवल्कलेषु आश्रमद्रुमेषु पतति ।

व्याख्या—तथाहि=यतो हि तुरगाणाम्=अश्वानां खुरैः=शफैः हत उत्थितः परिणतः=सायंकालिको यो अरुणः=सूर्यसारथिः तस्य प्रकाश प्रकाशो यस्य सायंकालिकारुणरागरक्तः रेणुः=धूलिः शलभानां=पतङ्ग समूहः=समवाय इव=यथा विटपेषु=शाखासु विषक्तानि=अवल तानि च तानि जलार्द्राणि वल्कलानि=मुनिवस्त्राणि येषां तेषु आश्रमद्रुमेषु आश्रमवृक्षेषु पतति=निपतति ।

अत्र पूर्णोपमाऽलङ्कारः । पुष्पिताग्रा वृत्तम्—'अयुजि न युगरेफतो य युजि च नजौ जरगाश्च पुष्पिताग्रा' इति लक्षणात् ॥

(१८) तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः
प्रौढाकृष्टव्रततिवलयासञ्जनाज्जातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं विरुजति गजः स्यन्दनालोकभीतः ॥ १।३२॥

सन्दर्भः—द्रष्टव्यं श्लो०—१ ।

प्रसङ्गः—प्रसङ्गेऽस्मिन् राजानं दुष्यन्तमन्वेषयन्तः सैनिकाः यदा त समागतास्तदा स्यन्दनस्यालोकेन भीतेन केनचिद् वनगजेन धर्मारण्ये बहु वि उत्पादितः । तस्यैव सूचना नेपथ्यतः प्रसार्यंते ।

अन्वयः—तीव्राघातात् अभिमुखतरुस्कन्धभग्नैकदन्तः प्रौढाकृष्टव्रतति वलयासञ्जनाज्जातपाशः स्यन्दनालोकभीतः भिन्नसारङ्गयूथः गजः नः त मूर्तः विघ्न इव धर्मारण्यं विरुजति ।

व्याख्या—तीव्रः=कठोरश्चासौ आघातः=प्रहारस्तस्माद् अभिमु सम्मुखं यो तरुः=वृक्षस्तस्य स्कन्धे=प्रकाण्डे भग्नः=त्रुटितः एकः=एक को दन्तः=दशनं यस्य सः, प्रौढानां=कठोराणाम् आकृष्टानाम्=समाक्षि च व्रततीनां=लतानाम् वलयस्य=समूहस्य आसञ्जनात्=परिवेष्ट जातः=उत्पन्नः पाशः=बन्धनं यस्य सः, स्यन्दनस्य=रथस्य आलोके दर्शनेन भीतः=त्रस्तः, भिन्नं=इतस्ततः कृतं सारङ्गानां=मृगाणां यू

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

समूहो येन सः, गजः=वनगजः नः=अस्माकं तपसः=तपस्यायाः मूर्त्तः=शरीरधारी विघ्नः=बाधा इवेत्युत्प्रेक्षायाम्, धर्मारण्यं=तपोवनं विरुजति=पीडयति।

अत्र गजे विघ्नस्य सम्भावनादुत्प्रेक्षाऽलङ्कारः—'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्—'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्मम्' इति लक्षणात्॥

द्वितीयोऽङ्कः

(१९) स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि तत्सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामः स्वतां पश्यति॥२।२॥

सन्दर्भः—श्लोकोऽयं कविकुलकमलदिवाकरेण, काव्यमानसराजहंसेन, विद्वत्कुलावतंसेन, कविमण्डलमण्डनायमानेन, सर्वथाऽसमानेन, अतुलनीयप्रातिभसम्पत्तिभासमानेन, कविताविलासेन महाकविना कालिदासेन विरचितस्य, ख्यातख्यातस्य, संस्कृतसाहित्यललामभूतस्य, अभिज्ञानशाकुन्तलस्य द्वितीयाङ्कादुद्धृतोऽस्ति।

प्रसङ्गः—अत्रैकतस्तु राजा दुष्यन्तः स्वकीयां प्रेयसीं शकुन्तलां दुर्लभां मनुते, अपरतस्तु तदभावं दृष्ट्वा किञ्चिदाश्वस्तोऽस्ति। तद्भावांश्चिन्तयन् राजा पुनः स्वकीयं कामं निन्दयन् कथयति—

अन्वयः—अन्यतः अपि नयने प्रेरयन्त्या तया यत् स्निग्धं वीक्षितम्, नितम्बयोः गुरुतया विलासात् इव यत् मन्दं यातम्, मा गा इति उपरुद्धया यदपि तत् सखी सासूयम् उक्ता तत् सर्वं मत्परायणं किल, अहो! कामः स्वतां पश्यति।

व्याख्या—अन्यतः=अन्यस्यां दिशि अपि नयने=नेत्रे प्रेरयन्त्या=परावर्तयन्त्या तया=शकुन्तलया यत् स्निग्धं=प्रेमपूर्वकं यथा स्यात्तथा वीक्षितम्=अवलोकितम्, नितम्बयोः=कटिपश्चाद्भागयोः गुरुतया=पृथुतया भारादिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विलासात्=शृङ्गारिचेष्टाया इवेति सम्भावनायाम्, यत् मन्दं=शनैः शनैः यातं=गमनं कृतम्, मा=नहि गाः=गच्छ इति=एवम् उपरुद्धया=निवा-यन्त्या तत्=तया यदपि सखी=स्वसुहृद्भूता प्रियम्वदा असूयया=ईर्ष्या-सहितं यथा स्यात्तथा उक्ता=कथिता, तत्=पूर्वोक्तं सर्वम्=अखिलं मम= दुष्यन्तस्य परायणं=अधीनं मद्विषयकमिति, अहो=आश्चर्यं कामः=काम-भावना सर्वस्मिन्नपि विषये स्वताम्=आत्मीयताम् आत्मानुकूलतां पश्यति= अवलोकयति, मनुते इति भावः।

अत्र चतुर्थपादांशेन सामान्येन पूर्वोक्तस्य विशेषस्य समर्थनात् अर्थान्तर-न्यासः—'सामान्यं च विशेषेण विशेषस्तेन वा यदि। समर्थ्यते अर्थान्तरन्यासो-ऽसौ' इति लक्षणात्। विलासादिव इत्यत्रोत्प्रेक्षा नितम्बगुरुतारूपकारणस्य विलासत्वेन सम्भावनात् 'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति लक्ष-णात्। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्री-डितम्' इति लक्षणात्॥

(२०) अनवरतधनुर्ज्यास्फालनक्रूरवर्ष्मा
रविकिरणसहिष्णुः स्वेदलेशैरभिन्नः।
अपचितमपि गात्रं व्यापतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति॥ २।४॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

प्रसङ्गः—प्रसङ्गेऽत्र मृगयाश्रान्तो विदूषको यदा अङ्गभङ्गविकलः सन् राजानं प्राप्य मृगयां निन्दयति, एकस्य दिवसस्यावकाशं च प्रार्थयति तदा राजा सेनापतिमाहूय मृगयानिवारणार्थमादिशति। सेनापतिस्तु मृगयापवादिनं माढ-व्यं कृतकं निन्दति तथा मृगयां प्रशंसयन् तद्गुणान् वर्णयति—

अन्वयः—(तथाहि) अनवरतधनुर्ज्यास्फालनक्रूरवर्ष्मा रविकिरणसहिष्णुः स्वेदलेशैः अभिन्नः, देवः गिरिचरः नागः इव अपचितम् अपि व्यायतत्वात् अल-क्ष्यं प्राणसारं गात्रं बिभर्ति॥

व्याख्या—अनवरतं=निरन्तरं धनुषः=बाणासनस्य ज्यायाः=मौर्व्याः आस्फालेन=आकर्षणेन क्रूरं=कठिनं वर्ष्म=शरीरं यस्य सः, रवेः=दिनकर-स्य किरणानि=करान् सहते तच्छीलः, स्वेदलेशैः=घर्माम्भःकणैः अभिन्नः= अविपरीतः स्वेदजलकणैरपि व्याकुलतां नानुभवतीति, गिरौ=पर्वते चरति= भ्रमति इति गिरिचरः=पर्वतीयो नागः=हस्ती इव=यथा अपचितं=क्षीण-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मपि व्यायतत्वात्=वस्त्राच्छादितत्वात्, गजपक्षे दीर्घत्वात् अलक्ष्य=अप्रतीयमानं प्राणः=प्राणवायुः बलं वा सारं=मुख्यतत्त्वं यस्मिन् तत् गात्रं=शरीरं बिभर्ति=धारयति ।

अत्र तृतीये पादे श्लेषः—'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते' इति लक्षणात् । चतुर्थे पादे उपमा राज्ञो गिरिचरनागेन सादृश्यस्य प्रतिपादनात् । राज्ञो विशेषणानां साभिप्रायत्वात् परिकरालङ्कारोऽपि 'उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः' इति लक्षणात् । श्लेषोपमापरिकराणां च सङ्करः । मालिनी वृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(२१) मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥२।५॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९ ।

प्रसङ्गः—द्रष्टव्यं श्लो०—२० ।

अन्वयः—वपुः मेदश्छेदकृशोदरं लघु उत्साहयोग्यं भवति, भयक्रोधयोः सत्वानाम् अपि विकृतिमत् चित्तं लक्ष्यते, यत् चले लक्ष्ये इषवः सिध्यन्ति स च धन्विनाम् उत्कर्षः, मृगयां मिथ्या व्यसनं वदन्ति हि ईदृक् विनोदः कुतः ।

व्याख्या—वपुः=शरीरं मेदसः=वसायाः छेदेन=न्यूनतापादनेन कृशं=क्षीणम् उदरं=मध्यभागो यस्य तत्, अत एव लघु=भारहीनम् उत्साहयोग्यं=उत्साहानुकूलञ्च भवति=जायते, भये=भीतौ क्रोधे=हृदयोद्दीपने च सत्वानाम्=वन्यजन्तूनामपि विकृतिः=विकारोऽस्यास्मिन्नस्तीति विकृतिमत्=विकारयुक्तं भयक्रोधानुकूलं चित्तं=मनः लक्ष्यते=ज्ञायते, यत् चले=चलायमाने लक्ष्ये=बाणपातपथवर्तिने इषवः=बाणाः सिध्यन्ति=सफलयन्ति बाणविषयीकुर्वन्ति स च धन्विनां=धनुर्धारिणाम् उत्कर्षः=सफलतायाः चरमसीमेति मृगयां मिथ्या=मृषा एव व्यसनं=दुर्गुणं वदन्ति=प्रतिपादयन्ति धर्मशास्त्रिणः हि=यतः ईदृक्=एवंविधः विनोदः=प्रमोदः कुतः=कस्मादन्यकार्याद् भवतीति नैवास्तीति भावः ॥

अत्र मृगयायां व्यसनत्वनिवारकाणामनेकेषां कारणानां प्रतिपादनात् समुच्चयालङ्कारः । चतुर्थपादं प्रति पूर्वपादत्रयस्य हेतुत्वात् काव्यलिङ्गम् अनयोश्च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

परस्परं सापेक्षत्वात् संसृष्टिः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्तत सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

(२२) गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थामभ्यस्यतु।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥२।६॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

प्रसङ्गः—अत्र माधव्यस्य विदूषकस्य प्रार्थनां स्वीकृत्य एकस्य दिवसस्य कृते मृगयाव्यापारान्निवृत्तिं निर्णीय राजा सेनापतिमाहूयादिशति—

अन्वयः—महिषाः शृङ्गैः मुहुः ताडितं निपानसलिलं गाहन्ताम्, छाया-बद्धकदम्बकं मृगकुलं रोमन्थम् अभ्यस्यतु, विश्रब्धैः वराहपतिभिः पल्वले मुस्ता-क्षतिः क्रियताम्, शिथिलज्याबन्धम् इदम् अस्मद्धनुः च विश्रामं लभताम्।

व्याख्या—महिषाः=वन्यपशुविशेषाः शृङ्गैः=विषाणैः मुहुः=भूयो भूयः ताडितं=आहतं खनितं निपानस्य=अल्पजलसरोवरस्य सलिलं=जलं गाहन्ताम् आलोडनं क्रियताम्, छायासु=वृक्षतलेषु बद्धं=कृतं रचितमिति कदम्बकं= समूहो येन तत् मृगाणां=हरिणानां कुलं=समूहः रोमन्थं=चर्वितस्याकृष्य पुनश्चर्वणम् अभ्यस्यतु=पौनःपुन्येन करोतु, विश्रब्धैः=अद्य कोऽप्यस्मान् न बाधि-ष्यतीति विश्वासयुक्तैः वराहाणां=शूकराणां पतिभिः=यूथनाथैः पल्वले= अल्पजलजलाशये मुस्ता=तृणविशेषस्तासां क्षतिः=ध्वंसः उत्पाटनमिति क्रियतां विधास्यन्तु। शिथिलः=श्लथीभूतः ज्यायाः=मौर्व्याः बन्धः=बन्धनं यस्मिन् तत् इदं=दृश्यमानम् अस्माकं धनुः=बाणासनञ्च विश्रामं=मृगयानिवृत्तिं लभतां=प्राप्नोतु। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

(२३) शमप्रधानेषु तपोवनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्ते ह्यन्यतेजोऽभिभवाद्दहन्ति ॥२।

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

प्रसङ्गः—अत्र विदूषकस्य प्रार्थनामङ्गीकृत्य राजा दुष्यन्तो यदा सेनापति-माहूय मृगयानिवारणार्थमादिशति तदा सेनापतिः मृगयायामनेकविधगुणानां प्रतिपादनं करोति। राजा तु सर्वं स्वीकृत्यापि मृगयानिवारणे कारणं प्रति-पादयति—

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अन्वयः—हि शमप्रधानेषु तपोवनेषु गूढं दाहात्मकं तेजः अस्ति। हि स्पर्शानुकूला सूर्यकान्तः इव अन्यतेजोऽभिभवात् ते दहन्ति।

व्याख्या—हि=यतो हि शमः=शान्तिः सत्त्वगुणः प्रधानः=प्रमुखो येषु तेषु तपोवनेषु=धर्मारण्येषु आश्रमस्थमुनिषु गूढं=गुप्तं दाहात्मकं=प्रज्वलनात्मकं तेजः अस्ति। हि=यतः स्पर्शानुकूलाः=स्पर्शयोग्या अपि सूर्यकान्ताः=सूर्यकान्तमणयः अन्यस्य=अपरस्य तेजसः=सूर्यस्य अभिभवात्=समाक्रमणात् दहन्ति=अग्निमुद्गिरन्ति।

अत्रोत्तरार्धस्य दृष्टान्तवाक्यस्य पूर्वार्धस्य दार्ष्टान्तिकवाक्यस्य च बिम्बप्रतिबिम्बभावाद् दृष्टान्तालङ्कारः—'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्' इति लक्षणात्। उपजातिः वृत्तम्—इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणात्॥

(२४) चित्ते निवेश्य परिकल्पितसर्वयोगान्
रूपोच्चयेन विधिना विहिता कृशाङ्गी।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥ २।९॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

प्रसङ्गः—अत्र विदूषकवचनं समादृत्यैकस्य दिवसस्य कृते मृगयानिवारणार्थं सेनापतिमादिश्य कार्यान्तरे साहाय्यार्थं विदूषकं निवेदयन् तत्पृष्टः कार्यं कथयति शकुन्तलाप्रेमप्रसङ्गम्। विदूषकसमक्षं शकुन्तलासौन्दर्यं वर्णयन् राजा कथयति—

अन्वयः—(सा) कृशाङ्गी विधिना परिकल्पितसर्वयोगान् चित्ते निवेश्य रूपोच्चयेन विहिता, धातुः विभुत्वं तस्याः वपुश्च अनुचिन्त्य सा मे अपरा स्त्रीरत्नसृष्टिः प्रतिभाति।

व्याख्या—सा कृशाङ्गी=तन्वङ्गी विधिना=ब्रह्मणा सृष्टिकर्त्रा परिकल्पितान्=शकुन्तलानिर्माणाय कल्पनाविषयीकृतान् सर्वान्=अखिलांश्च तान् योगान्=रङ्गसम्मिश्रणाद्युपयान् चित्ते=सावधानतया मनसि निवेश्य=आधाय स्मारं स्मारमिति भावः, रूपोच्चयेन=समधिकेन सौन्दर्येण विहिता=निर्मिताऽस्ति। धातुः=ब्रह्मणाः विभुत्वं=निर्माणसामर्थ्यं तस्याः=शकुन्तलायाः अतिशयकमनीयं वपुः=शरीरं च अनुचिन्त्य=विचार्य सा=शकुन्तला मे=मम मनसि नास्ति परा द्वितीया यस्याः अपरा=अद्वितीया यद्वा अपरा=लक्ष्म्याः द्वितीया स्त्रीरत्नस्य=स्त्रीषु रत्नभूता=श्रेष्ठभूता सृष्टिः=निर्माणं प्रतिभाति=प्रतीयते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अत्रासम्बन्धेऽपि सम्बन्धवर्णनरूपातिशयोक्तिः। वसन्ततिलका वृत्तम्–'उक्ता वसन्ततिलका तभजा जगौगः' इति लक्षणात्॥

(२५) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि॥२।१०॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

प्रसङ्गः—द्रष्टव्यं श्लो०—२४।

अन्वयः—तद्रूपम् अनाघ्रातं पुष्पम् (इव), कररुहैः अलूनं किसलयम् (इव) अनाविद्धं रत्नम् (इव) अनास्वादितरसं नवं मधु (इव) पुण्यानाम् अखण्डं फलम् इव अनघम् (अस्ति) इह भुवि कं भोक्तारं समुपस्थास्यति इति न जाने।

व्याख्या—तस्याः=शकुन्तलायाः रूपं=सौन्दर्यम् न=नहि आघ्रातं=घ्राणविषयीकृतं केनचिदप्यगृहीतसुगन्धं पुष्पं=कुसुमम् इव, कररुहैः=नखैः अलूनं=अच्छिन्नं किसलयं=नवपल्लवम् इव अनाविद्धम्=अछिन्नं रत्नम्=मणिः इव न=नहि आस्वादितः=गृहीतास्वादो रसो यस्य तत् केनाप्यनास्वादितं नवं=नूतनं मधु=क्षौद्रमिव, पुण्यानां=सुकृतानाम् अखण्डं=पूर्णं फलम् इव अनघं=पवित्रमस्ति, इह=अस्मिन् भुवि=पृथिव्यां कं=कम् भोक्तारं=भोगकर्त्तारम् समुपस्थास्यति=विधास्यतीति न=नहि जाने=वेद्मि।

अत्रैकस्य शकुन्तलारूपस्योपमेयस्य अनाघ्रातपुष्पाद्यनेकविधोपमानप्रतिपादनात् मालोपमाऽलङ्कारः—'मालोपमा यदेकस्य उपमानं बहु दृश्यते' इति लक्षणात्। शिखरिणी वृत्तम्—'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात्॥

(२६) दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम्॥२।१२॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रसङ्गः—प्रसङ्गेऽत्र यदा राजा दुष्यन्तो नानाप्रकारेण शकुन्तलायाः रूपं वर्णितवान् शकुन्तलाप्रेमप्रसङ्गे साहाय्यार्थं च विदूषकं प्रार्थितवान् तदा त्वं प्रति तस्याः कीदृशो भाव इति विदूषकेन पृष्टः सन् आत्मनि तस्याः भावं वर्णयति—

अन्वयः—तन्वी कतिचिद् एव पदानि गत्वा दर्भाङ्कुरेण चरणः क्षतः इति अकाण्डे स्थिता, द्रुमाणां शाखासु असक्तम् अपि वल्कलं विमोचयन्ती विवृत्तवदना आसीत् ।

व्याख्या—तन्वी=तन्वङ्गी सा शकुन्तला कतिचित्=स्वल्पमेव पदानि =न्यासाः गत्वा दर्भस्य=कुशस्य अङ्कुरेण=अग्रभागेन चरणः=पादः क्षतः =विद्धः इत्युक्त्वा अकाण्डे=अनवसरे दर्भाङ्कुरक्षताभावेऽपि स्थिता= गमननिवृत्तिं कृतवती, द्रुमाणां=वृक्षाणां शाखासु=विटपेषु असक्तम्=अलग्नमपि वल्कलं=तरुत्वचम् विमोचयन्ती=अवमोचयन्ती ततो निःसारयन्ती विवृत्तं=परावर्तितं वदनं=मुखं यस्याः सा एवं भूता आसीत्=जाता ।

अकाण्डे स्थिता, असक्तमपि विमोचयन्तीत्यादिषु विरोधाभासः—'विरुद्धमिवाभासेत विरोधाभासोऽसौ' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(२७) अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥२।१४॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९ ।

प्रसङ्गः—अत्र आश्रमे राज्ञो दुष्यन्तस्यागमनं श्रुत्वा राक्षसैः विघ्नितानां स्वकीयानां यज्ञानां रक्षणार्थं प्रार्थयितुं राजानमुपस्थितयोः ऋषिकुमारयोरन्यतरो राजानं दृष्ट्वा तद्वैशिष्ट्यं वर्णयति—

अन्वयः—अमुना अपि सर्वभोग्ये आश्रमे वसतिः अध्याक्रान्ता, अयमपि प्रत्यहं रक्षायोगात् तपः सञ्चिनोति, वशिनः अस्य अपि चारणद्वन्द्वगीतः द्यां स्पृशति, पुण्यः शब्दः मुनिः इति (अस्यापि) मुहुः केवलं राजपूर्वः ।

व्याख्या—अमुना=अनेन राज्ञा दुष्यन्तेनापि सर्वैः=सर्वजनैः भोग्ये= पालनीये आश्रमे=गृहस्थाश्रमे वसतिः=निवासः अध्याक्रान्ता=कृताऽस्ति, मुनयोऽप्याश्रमे निवसन्ति, अयमपि=नृपोऽपि प्रत्यहं=प्रतिदिनं रक्षायोगात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

=प्रजारक्षणात् तपः=तपस्यां सञ्चिनोति=एकत्रीकरोति, मुनयोऽपि तपः समाचरन्ति जगतो रक्षणं च कुर्वन्ति 'सर्वे भवन्तु सुखिनः' इत्यादिभिः प्रार्थनया, वशिनः=जितेन्द्रियस्य अस्य=राज्ञो दुष्यन्तस्यापि चारणयोः=स्तुतिपाठकयोः द्वन्द्वं=युगलं तेन गीतः=गानं कृतः यशोगानमिति द्यां=स्वर्गं स्पृशति=प्राप्नोति, पुण्यः=पवित्रः शब्दः मुनिः इति मुनीनां कृतेऽपि भवति राज्ञः कृतेऽप्यस्ति मुहुः=भूयः इयद्वैशिष्ट्यं यत् केवलं=मात्रमस्य मुनिशब्दः राजशब्दः पूर्वं=प्रथमं यस्यैवंभूतो राजमुनिरिति ।

अत्र मुनिभिः राज्ञः सर्वं समानेऽपि मुनयः केवलं मुनयः सन्ति राजा तु राजमुनिरस्ति इत्युपमेये राजनि विशेषस्य वर्णनाद् व्यतिरेकः—'आधिक्यमुपमेयस्य उपमानानान्यूनताऽथवा व्यतिरेकः' इति लक्षणात् । मन्दाक्रान्ता वृत्तम्—'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ य युग्मम्' इति लक्षणात् ।

(२८) नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु सुराः सक्तवैराः हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥२।१५॥

सन्दर्भः—द्रष्टव्यं श्लो०—१९ ।

प्रसङ्गः—द्रष्टव्यं श्लो०—२७ ।

अन्वयः—एतत् चित्रं न, यत् नगरपरिघप्रांशुबाहुः अयम् एकः कृत्स्नां उदधिश्यामसीमां धरित्रीं भुनक्ति इति, हि दैत्यैः सक्तवैराः सुराः समितिषु अस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयम् आशंसन्ते ।

व्याख्या—एतत् चित्रम्=आश्चर्यकरं न=नास्ति यत् नगरस्य=राजधान्याः परिघो=अर्गलौ इव=यथा प्रांशू=उन्नतौ बाहूः=भुजौ यस्य सः अयं दीर्घभुजोऽसौ एकः कृत्स्नां=सम्पूर्णाम् उदधयः=चत्वारः समुद्रा एव श्यामा=कृष्णवर्णा सीमा=विस्तारसूचिका रेखा यस्यास्तां धरित्रीं=पृथ्वीं भुनक्ति=पालयति इति, हि=यतो हि दैत्यैः=राक्षसैः सक्तं=संभृतं वैरं=शत्रुत्वं येषां ते सुराः=देवाः समितिषु=युद्धेषु अस्य=राज्ञो अधिज्ये=गुणसम्पन्ने धनुषि=शरासने पौरुहूते=इन्द्रसम्बन्धिनि वज्रे=कुलिशे च विजयं=जयम् आशंसन्ते=कल्पनां कुर्वन्ति ।

अत्र प्रस्तुतस्य दुष्यन्तधनुषोऽप्रस्तुतस्य इन्द्रवज्रस्य चैकक्रियया सह सम्बन्धात् दीपकाऽलङ्कारः—'अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते' इति लक्षणात् ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

'नगरपरिघप्रांशुबाहुः' इत्यत्र लुप्तोपमा। मन्दाक्रान्ता वृत्तम्—मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्मम्' इति लक्षणात् ॥

तृतीयोऽङ्कः

(२९) जाने तपसो वीर्यं सा बाला परवतीति मे विदितम्।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम् ॥३।२॥

सन्दर्भः—श्लोकोऽयं पृथिव्याः हारायमाणेन, 'काव्येषु माघः कविकालिदासः' इति सर्वथा ख्यातेन, अप्रतिमप्रातिभसम्पत्तिभासमानेन, कवितावनिताविलासेन, रससिद्धेन कवीश्वरेण महाकविना कालिदासेन विरचितस्य अभिज्ञानशाकुन्तलनामधेयस्य सर्वथा नवनवस्य नाटकस्य तृतीयाङ्कादुद्धृतोऽस्ति।

प्रसङ्गः—अत्र शकुन्तलाप्रेमपाशबद्धो राजा दुष्यन्तः न तु बलात्तां नेतुमर्हति न च ततो निवृत्त इति वर्णयति कविः—

अन्वयः—तपसः वीर्यं जाने सा बाला परवती इति मे विदितं (तथापि) ततः मे हृदयं निम्नात् सलिलम् इव न निवर्त्तते।

व्याख्या—तपसः तपस्यायाः वीर्यं=पराक्रमं शक्तिरिति जाने=वेद्मि सा बाला परवती=परवशा इति मे=मम विदितं=ज्ञातमस्ति तथापि ततः=शकुन्तलायाः मे=मम हृदयं=मनः निम्नात्=नीचैः स्थानात् सलिलं=जलम् इव न निवर्तते=परावर्तते। यथा नीचैरागतं जलं पुनरुपरि न गच्छति तथैव ततो मे हृदयं न निवर्तत इति भावः।

अत्र पूर्वार्द्धरूपकारणे सत्यपि ततो हृदयनिवर्तनरूपकार्यस्याभावात् विशेषोक्तिः—'सति हेतौ फलाभावे विशेषोक्तिः' इति लक्षणात्। सलिलमिवेत्यत्रोपमा। आर्याच्छन्दः 'यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या' इति लक्षणात् ॥

(३०) तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारी करोषि ॥३।३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सन्दर्भः—द्रष्टव्यं श्लो०—२९ ।

प्रसङ्गः—प्रसङ्गेऽस्मिन् शकुन्तलावियोगेन मन्थितहृदयो राजा स्वहृदयस्थं कामदेवमुपालभ्य तदुद्दीपकेट चन्द्रमसं चाप्युपालम्भयति—

अन्वयः—तव कुसुमशरत्वम् इन्दोः शीतरश्मित्वं चेति इदं द्वयमपि मद्विधेषु अयथार्थं दृश्यते; इन्दुः हिमगर्भैः मयूखैः अग्निं विसृजति, त्वमपि कुसुमबाणान् वज्रसारी करोषि ।

व्याख्या—तव=कामदेवस्य कुसुमशरत्वं=पुष्पबाणत्वम्, इन्दोः=चन्द्रमसः शीतरश्मित्वं=शीतकरत्वम् इदं द्वयमपि=द्वितयमपि मद्विधेषु=मादृशेषु अयथार्थं=असत्यं दृश्यते=अवलोक्यते, इन्दुः=चन्द्रमा हिमगर्भैः=शैत्यपूर्णैः मयूखैः=किरणैः अग्निम्=अनलं विसृजति=विस्तारयति, त्वमपि=कामदेवोऽपि कुसुमबाणान्=पुष्पशरान् वज्रवत्=कुलिशवत् सारं बलं यस्मिन् तथा करोषि=सम्पादयसि इति ।

अत्र पूर्वार्द्धं प्रत्युत्तरार्द्धस्य हेतुत्वात् काव्यलिङ्गम् 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ।

(३१) स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः साबाधं तदपि कमनीयं वपुरिदम् ।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥३।६॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९ ।

प्रसङ्गः—अत्र राजानं दुष्यन्तमुद्दिश्य शकुन्तला बलवदस्वस्थाऽस्ति । प्रियम्वदाऽनसूये तदुपरि कमलिनीपत्रेण बीजयतः । तथापि शकुन्तलाशरीरं नैव सुखयति नलिनीपत्रवातः । अनेन सख्यौ आश्चर्यान्वितो स्तः । राजाऽपि तस्याः समधिकं तापं भावयन् किमयमातपदोषोऽस्ति ? यद्वा यथा मनसि वर्तते ? इति कल्पयन् कथयति—

अन्वयः—प्रियायाः इदं वपुः स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयम् (अत एव) साबाधं तदपि कमनीयम्, कामं मनसिजनिदाघप्रसरयोः तापः समः तु युवतिषु ग्रीष्मस्य अपराद्धम् एवं सुभगं न ।

व्याख्या—प्रियायाः=शकुन्तलायाः इदं=दृश्यमानं वपुः स्तनयोः=वक्षोजयोः न्यस्तं=स्थापितं उशीरं=लेपनद्रव्यविशेषो यस्मिन् तत् प्रशिथिलं=शिथिलं

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जातं मृणालस्य=कमलनालस्य एकवलयं=एकहस्ताभूषणम् इति वियोगवर्णन-कविसमयः एवञ्च साबाधं=बाधया तापेन युक्तमस्ति तदपि=तथापि कमनीयं=सुन्दरं कामं=यद्यपि मनसिजः=कामदेवः निदाघः=ग्रीष्मः तयोः प्रसरः=विस्तारस्तयोः तापः=सन्तापः समः=समान एव भवति तु=किन्तु युवतिषु=कान्तासु ग्रीष्मस्य=निदाघस्य अपराद्धं=बाधनम् एवं सुभगं=शोभनं न भवति । ग्रीष्मतापे युवतीनां सुन्दरता क्वापि गच्छति, अस्याः वपुषि सुन्दरता दृश्यत इति नात्र ग्रीष्मतापः अपि तु कामताप एवेति ।

अत्र मनसिजनिदाघयोस्तापे समानेऽपि मनसिजतापे सौन्दर्यस्याधिक्यस्य वर्णनाद् व्यतिरेकः । स्तनन्यस्तोशीरादीनामनेकेषां कारणानां तापे प्रतिपादितत्वात् समुच्चयः । शिखरिणीवृत्तम्—रसैः रुद्रैश्छिन्ना यमन समलागः शिखरिणी' इति लक्षणात् ॥

(३२) क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनग्लानेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥३।७॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९ ।

प्रसङ्गः—प्रसङ्गेऽत्र बलवदस्वस्थशरीरां शकुन्तलां दर्शं दर्शं चिन्तितासु सखीषु तदस्वास्थ्यविषयेऽनसूयया पृष्टा शकुन्तला यदेदं कथयति—'बलीयानायासः, न शक्नोमि सहसा निवेदयितुम्' इति । तदा तस्याः अस्वास्थ्यं प्रमाणितायां प्रियम्वदायां राजाऽपि तस्याः वचनं समर्थयन् कथयति—

अन्वयः—आननं क्षामक्षामम्, उरः काठिन्यमुक्तस्तनम्, मध्यः क्लान्ततरः, अंसौ प्रकामविनतौ, छविः पाण्डुरा, मदनग्लाना इयं पत्राणां शोषणेन मरुता स्पृष्टा माधवी लता इव शोच्या च प्रियदर्शना च आलक्ष्यते ।

व्याख्या—आननं=मुखं क्षामक्षामम्=अतिशयमलिनम् उरः=वक्षस्थलं काठिन्येन मुक्तौ=रहितौ स्तनौ=उरोजौ यस्मिन् तत्, मध्यः=कटिभागः अतिशयेन क्लान्तः=क्षीणः, अंसौ=स्कन्धौ प्रकामम्=अत्यधिकं विनतौ=विनम्रौ, छविः=कान्तिः पाण्डुरा=पाण्डुवर्णा, मदनेन=कामदेवेन ग्लाना=क्षीणा इयं=शकुन्तला पत्राणां=वृक्षपर्णानां शोषणेन=शुष्ककारकेन मरुता=वायुना स्पृष्टा=कृतस्पर्शा माधवी=नवमल्लिका लता इव=यथा शोच्या=शोचनीया प्रियं=सुखकरं दर्शनं यस्या सा एवंभूता च आलक्ष्यते=दृश्यते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अत्र 'शोच्या च प्रियदर्शना च' इत्यत्र विरोधाभासः, 'विरुद्धमिवाभासे विरोधाभासोऽसौ इति लक्षणात्। चतुर्थे पादे पूर्णोपमा; शकुन्तलेत्युपमेयम् माधवी लतेत्युपमानम्, इवेति वाचकः शब्दः, शोच्यत्वं प्रियदर्शनत्वञ्चेति साधारणो धर्म इति चतुर्णामप्युपादानात्। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

(३३) पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रोत्तरश्रवणकातरतां गतोऽस्मि ॥ ३।८ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९।

प्रसङ्गः—अस्वास्थ्यकारणविषयेऽनसूयया पृष्टायां शकुन्तलायां राजा विचारयति यत् सम्प्रतीयमवश्यमेव स्वमनोगतमस्वास्थ्यकारणं वक्ष्यति। यद्यपि तया माम्प्रति बहुशोऽनुरागात्मको भावः प्रकटितोऽस्ति तथापि उत्तरश्रवण-कातरोऽस्मि यदियं किं वक्ष्यति—

अन्वयः—इयं बाला समदुःखसुखेन जनेन पृष्टा (सती) मनोगतम् आधि-हेतुं न वक्ष्यति (इति) न। (यद्यपि) अनया विवृत्य सतृष्णं बहुशः दृष्टः (तथापि) अत्र उत्तरश्रवणकातरतां गतः अस्मि।

व्याख्या—इयं बाला=शकुन्तला दुःखं=कष्टं सुखञ्च दुःखसुखे तयोः समः=समानः इति समदुःखसुखेन दुःखसुखयोः समानरूपेण व्यवहारशीलेन जनेन=सखीजनेन पृष्टा सती मनसि=हृदये गतं=वर्तमानम् आधिहेतुं=दुःख-कारणं न=नहि वक्ष्यति=कथयिष्यतीति न=नास्ति अवश्यमेव कथयिष्यतीति भावः। यद्यपि अनया=शकुन्तलया विवृत्य=आननं परावृत्य तृष्णया=उत्क-ण्ठया सहितं यथा स्यात्तथा बहुशः=अनेकप्रकारेण दृष्टः=अवलोकितः तथापि अत्र=प्रश्ने उत्तरस्य श्रवणे कातरतां=उत्कण्ठतां गतोऽस्मि=प्राप्तोऽस्मि।

अत्र द्वितीयं पादं प्रति प्रथमस्य हेतुत्वात् काव्यलिङ्गम्। 'नेयं न वक्ष्यति' इत्यत्रावश्यमेव वक्ष्यतीति अर्थात् अर्थापत्तिः। वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौगः' इति लक्षणात्।

(३४) अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु! यतोऽवधीरणाम्।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत् ॥३।११॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९।

प्रसङ्गः—यदा शकुन्तला सखीभ्यां परामृष्टा जायते यत् सा कामपत्रं लिखतु तदा सा कामलेखं चिन्तयति किन्तु अवधीरणाभीरुत्वं प्रकटयति तदा विहस्य राजा कथयति—

अन्वयः—हे भीरु !=यतः अवधीरणां विशङ्कसे स अयं ते सङ्गमोत्सुकः तिष्ठति। प्रार्थयिता श्रियं लभेत वा न वा, श्रिया ईप्सितः दुरापः कथं भवेत्।

व्याख्या—हे भीरु !=अवधारणाभीतहृदये ! यतः=यस्मात् अवधीरणां= तिरस्कारं विशङ्कसे=चिन्तयसि स अयं=मद्रूपजनः ते=तव सङ्गमस्य= सम्बन्धस्य संश्लेषस्य उत्सुकः=उत्कण्ठायुक्तः तिष्ठति=वर्तते। प्रार्थयिता= प्राप्तकर्ता, प्रार्थनाकर्ता वा श्रियं=लक्ष्मीं लभेत्=प्राप्नुयाद् वा न वा प्राप्नुयात् किन्तु श्रिया=लक्ष्म्या ईप्सितः=वाञ्छितः दुरापः=दुष्प्राप्यः कथं भवेत्=स्यात्।

अत्रोत्तरार्धेन सामान्येन पूर्वार्धरूपविशेषस्य समर्थनादर्थान्तरन्यासः। वंशस्थवृत्तम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात्।

(३५) तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥३।१४॥

सन्दर्भः—दष्टव्यं श्लो०—२९।

प्रसङ्गः—यदा दुष्यन्तकामनया पीडिता शकुन्तला सखीभ्यां परामृष्टा नलिनीपत्रे नखैः कामलेखं करोति सख्यौ च श्रावयति तदा तच्छ्रावं श्रावं राजा आत्मनोऽवस्थां प्रतिपादयति—

अन्वयः—तनुगात्रि ! मदनः त्वां तपति मां पुनः अनिशं दहति एव, हि दिवसः यथा शशाङ्कं ग्लपयति तथा कुमुद्वतीं न (ग्लपयति)।

व्याख्या—तनुगात्रि ! हे क्षीणशरीरे तन्वङ्गि मदनः=कामदेवः त्वां तपति =तापयुक्तां करोति मां तु पुनः दहति=भस्मसात् करोति, हि=यतः दिवसः =सूर्यः यथा=यावन्मात्रं शशाङ्कं=चन्द्रमसं ग्लपयति=क्षीणं करोति तथा तावन्मात्रं कुमुद्वतीं=कुमुदिनीं न=नहि ग्लपयति=क्षीणयति।

अत्र पूर्वार्धस्योत्तरार्धेन दृष्टान्तवाक्येन बिम्बप्रतिबिम्बभावात् दृष्टान्तः— 'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्' इति लक्षणात्। उत्तरार्धे शशाङ्क-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कुमुद्वत्योः नायकनायिकाव्यवहारसमारोपात् समासोक्तिः—'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः' इति लक्षणात्। 'तपति' 'दहति' इति क्रियाद्वयस्य एककर्त्रा मदनेनाभिसम्बन्धात् दीपकम्—अथ कारकमेकं स्यादनेकासु क्रियासु चेत्' इति लक्षणात्। किञ्च 'तपति, दहति, ग्लपयति' इत्येकस्यैव सामान्यधर्मस्य पृथक् पृथङ्निर्देशात् प्रतिवस्तूपमा—'प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥' इति लक्षणात्॥ तनुगात्रीत्यत्र पुनरुक्तवदाभासः। आर्या जातिः—'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादशद्वितीये चतुर्थके पञ्चदश साऽऽर्या॥' इति लक्षणात्॥

(३६) किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम्।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु! यथासुखं ते॥ ३।१८॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९।

प्रसङ्गः—प्रसङ्गेऽत्र शकुन्तलया लिखितं कामपत्रं श्रावं श्रावं समधिकं हर्षप्रकर्षमनुभवन् राजा स्वयमेव तत्र लताकुञ्जे यत्र शिलायां पुष्पशय्यायां सखीभ्यामन्वास्यमाना शकुन्तला तिष्ठति। तत्रोपस्थिते राजनि रहस्युभयोः सम्बन्धं कामयन्त्यौ सख्यौ अन्यकार्यव्यपदेशेन क्वापि गतौ। तपः शकुन्तलापि ततो गन्तुमिच्छति, तां निरुध्य राजा कथयति यत्—तव सखीस्थाने अहमुपस्थितोऽस्मि तत् कथय किं करणीयम्? इति—

अन्वयः—हे करभोरु! किं क्लमविमर्दिभिः शीकरैः आर्द्रवातं नलिनीदलतालवृन्तं सञ्चालयामि? उत ते पद्मताम्रौ चरणौ अङ्के निधाय ते यथासुखं संवाहयामि?

व्याख्या—हे करभौ इव उरू=जङ्घे यस्य तत् सम्बुद्धौ किमिति प्रश्ने क्लमं=तापं श्रमं वेति विशेषेण मर्दयन्ति=दूरीकुर्वन्ति तच्छीलैः शीकरैः=जलबिन्दुभिः आर्द्रः=शीतलो वातः=वायुः यस्य तत् नलिनीदलम्=कमलिनीपत्रमेव तालवृन्तम्=तालपत्रनिर्मितव्यजनम् सञ्चालयामि=संवाहयामि व्यजनं करोमीति भावः? उत=अथवा पद्म=कमले इव ताम्रौ=रक्तवर्णौ ते=तव चरणौ=पादौ अङ्के=क्रोडे निधाय=स्थापयित्वा ते=तव सुखम्=आननम् अनतिक्रम्येति यथासुखं=सुखकरं यथा स्यात्तथा संवाहयामि=मर्दयामि?

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र नलिनीदलमुपमेयम्, तालवृन्तमुपमानम्, नलिनीदले तालवृन्तस्यारोपाद्रूपकम् । करभोरु इत्यत्र लुप्तोपमेति रूपकोपमयोः संसृष्टिः । वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(३७) तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
कान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताद् भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि ॥ ३।२३॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९ ।

प्रसङ्गः—अत्र सखीभ्यां परामृष्टया अवस्थया शकुन्तलया लिखितं कामपत्रं श्रावं श्रावमेवमेव स्वयमुपस्थिते राजनि कार्यान्तरव्याजेन क्वापि गतयोः सख्योः, सखीस्थाने वर्तमाने राजनि प्रचलितायां विलासवार्तायां गौतम्यागमनेन तया सह शकुन्तला वेतसगृहाद् बहिर्निगता । तदा तद्वियोगेन पीडितो राजा विलापं करोति—

अन्वयः—तस्याः शरीरलुलिता शिलायाम् इयं पुष्पमयी शय्या, नलिनीपत्रे नखैः अर्पितः एषः कान्तः मन्मथलेखः, हस्तात् भ्रष्टम् इदं बिसाभरणम्, इति आसज्यमानेक्षणः (अहं) शून्यादपि वेतसगृहात् सहसा निर्गन्तुं न ईशोऽस्मि ।

व्याख्या—तस्याः=प्रियतमायाः शकुन्तलायाः शरीरेण=देहेन लुलिता=विमर्दिता शिलायां=प्रस्तरखण्डे इयं=दृश्यमाना पुष्पमयी=कुसुमनिर्मिता शय्या=तल्पम्, नलिनीपत्रे=कमलिनीपत्रे नखैः=कररुहैः अर्पितः=लिखितः एषः=दृश्यमानः कान्तः=मनोहरः मन्मथलेखः=कामपत्रम्, हस्तात्=करात् भ्रष्टम् इदं=पुरतो दृश्यमानं बिसाभरणम्=कमलनालतन्तुविरचिताभरणम्, इति=एषु वस्तुषु आसज्यमाने=प्रवृत्ते ईक्षणे=नेत्रे यस्य सोऽहं शून्यात्=प्रियारहितादपि वेतसगृहात्=लताकुञ्जात्, सहसा=शीघ्रं निर्गन्तुं=बहिर्गन्तुं न ईशोऽस्मि=न समर्थोऽस्मि ।

अत्र चतुर्थपादं पादत्रयस्य हेतुत्वात् काव्यलिङ्गम् । 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । 'शून्यादपि वेतसगृहान्निर्गन्तुं न ईशोऽस्मि' इति कारणाभावेऽपि कार्यवर्णनात् विभावनाऽलङ्कारः—'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते' इति लक्षणात् । यद्वा वेतसगृहस्य शून्यत्वरूपकारणे सत्यपि गमनरूपकार्याभाववर्णनाद् विशेषोक्तिः—'सति हेतौ फलाभावे विशेषोक्तिः' इति लक्षणात् । एवञ्च काव्यलिङ्ग-विभावना-विशेषोक्तीनां सङ्करः । शार्दूल-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्ष-णात् ॥

(३८) सायंतने सवनकर्मणि सम्प्रवृत्ते
वेदिं हुताशनवतीं परितः प्रकीर्णाः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्याभ्रकूटकपिशाः पिशिताशनानाम् ॥ ३।२४॥

सन्दर्भः—द्रष्टव्यं श्लो०—२९ ।

प्रसङ्गः—अत्रैकान्ते वेतसलतागृहे प्रियतमं राजानं परित्यज्य बहिर्गता-शकुन्तलायां तद्वियोगचिन्तापरायणे राजनि नेपथ्यतो राक्षसबाधानां कोला-हलो जायते ।

अन्वयः—सायंतने सवनकर्मणि सम्प्रवृत्ते, हुताशनवतीं वेदिं परितः प्रकीर्णाः भयमादधानाः सन्ध्याभ्रकूटकपिशाः पिशिताशनानां छायाः बहुधा चरन्ति ।

व्याख्या—सायंतने=सायंकालिके सवनकर्मणि=हवनकार्ये सम्प्रवृत्ते=समुपस्थिते सति हुताशनवतीं=प्रज्वलिताग्निसमन्वितां वेदिं=यज्ञभूमिं परितः=सर्वतः प्रकीर्णाः=व्याप्ताः भयं=भीतिम् आदधानाः=धृतवन्तः सन्ध्यायां=सायंकाले अभ्राणां=मेघानां कूटः=समूह इव कपिशाः=इषद्रक्तवर्णाः पिशितं=मांसमेव अशनं=भोजनं येषां ते तेषां राक्षसानामिति छायाः=प्रतिबिम्बानि बहुधा=प्रायो बाहुल्येनेति चरन्ति=इतस्ततो भ्रमन्ति ।

अत्र सन्ध्याभ्रकूटकपिशा इत्यत्र लुप्तोपमा । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

चतुर्थोऽङ्कः

(३९) विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥ ४।१ ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सन्दर्भः-श्लोकोऽयं 'पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः' इत्युक्तिदिशा कविमण्डलमण्डनायमानेन, अप्रतिमप्रातिभसम्पत्तिभासमानेन कविताववनितविलासेन महाकविना कालिदासेन विरचितस्य निखिलनाट्यतत्त्वपूतस्य काव्यकलासमन्वितस्य, सर्वथा नवनवस्य नाट्यसाहित्यशिरोरत्नभूतस्य संस्कृतसाहित्यनवनीतस्वरूपात् चतुर्थाङ्काद् गृहीतोऽस्ति ।

प्रसङ्गः—अत्र गान्धर्वेण विवाहविधिना शकुन्तलामुद्वाह्य स्वनगरं गते राजनि तच्चिन्तापरायणायां शकुन्तलायां पुष्पचयनार्थं बहिर्गतयोः सख्योः कदाचित् तत्रागतो सुलभकोपो महर्षिः दुर्वासा । शकुन्तला तदागमनं न ज्ञातवतीति तदातिथ्यं नैव चकार । आत्मपरिभवं ज्ञात्वा दुर्वासा तां शशाप—

अन्वयः—अनन्यमानसा यं वचिन्तयन्ती उपस्थितं तपोनिधिं माम् न वेत्सि स बोधितः सन् अपि प्रथमकृतां कथां प्रमत्तः इव त्वां न स्मरिष्यति ।

व्याख्या—अनन्यमानसा=एकाग्रचित्तेन यं=प्रियं विचिन्तयन्तीं=विचारयन्ती उपस्थितम्=अत्रागतं तपोनिधिं=तपोधनं माम् न=नहि वेत्सि=जानासि सः=तव प्रियः बोधितः=परैः ज्ञापितः सन् अपि प्रथमं=पूर्वं कृताम्=कथितां कथां=वार्तां प्रमत्तः=मत्तः जन इव=यथा त्वां=शकुन्तलां न=नहि स्मरिष्यति=स्मरणं करिष्यति, पत्नीत्वेन न ज्ञास्यतीति भावः ।

अत्रोपमाऽलङ्कारः । उत्तरार्धं प्रति पूर्वार्द्धस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौगः' इति लक्षणात् ॥

(४०) यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥ ४।२ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—अत्र प्रवासात् प्रतिनिवृत्तेन महर्षिणा कण्वेन वेलोपलक्षणार्थमादिष्टः कण्वशिष्यः—'हन्त ! प्रभातम्' इति ज्ञात्वा प्रातःकालस्य वर्णनं करोति—

अन्वयः—एकतः ओषधीनां पतिः अस्तशिखरं याति, एकतः अर्कः अरुणपुरःसरः आविष्कृतः युगपद् तेजोद्वयस्य व्यसनोदयाभ्याम् एषः लोकः दशान्तरेषु नियम्यत इव ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

व्याख्या—एकतः=एकस्यां दिशि ओषधीनां=औषधिनिर्माणलतानाम् पतिः=स्वामी चन्द्रः अस्तशिखरम्=अस्ताचलं याति=गच्छति, एकतः= अपरस्यां दिशि अर्कः=सूर्यः अरुणः=सूर्यसारथिः पुरः=अग्रे सरति=गच्छति यस्य सः आविष्कृतः=उदेति, युगपत्=एकदा एककालेन तेजसोः द्वयमिति तेजोद्वयं तस्य तेजोद्वयस्य=सूर्याच्चन्द्रमसोः व्यसनं=विनाशः अस्त इति उदयः= उन्नतिश्चेति ताभ्याम् एषः=दृश्यमानो लोकः=लोकसमवायः दशान्तरेषु= दशापरिवर्तनेषु नियम्यते=शिक्षते इवेत्युत्प्रेक्षायाम् ।

अत्रोत्प्रेक्षाऽलङ्कारः । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(४१) अन्तर्हिते शशिनि सैव कुमुद्वतीयं
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनेन
दुःखानि नूनमतिमात्रदुरुद्वहानि ॥ ४।३ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—द्रष्टव्यं श्लो०—४० ।

अन्वयः—शशिनि अन्तर्हिते सा एव इयं कुमुद्वती संस्मरणीयशोभा दृष्टिं न नन्दयति, अबलाजनेन इष्टप्रवासजनितानि दुःखानि नूनम् अतिमात्रदुरुद्वहानि (भवन्ति)।

व्याख्या—शशिनि=चन्द्रमसे अन्तर्हिते=क्वापि गते सा=शोभार्थं प्रसिद्धा एव इयं=पुरतो दृश्यमाना कुमुद्वतीं=कुमुदिनीं संस्मर्तुं योग्या संस्मरणीया= स्मरणयोग्या नष्टेति शोभा=सौन्दर्यं यस्याः सा एवंभूता सती दृष्टिं=नेत्रं न नहि नन्दयति=आह्लादयति ।

किञ्च—शशिनि=शशीव प्रशस्तकुलोत्पन्ने राजनि अन्तर्हिते=राजधानीं गते सा=सौन्दर्यार्थं ख्यातख्याता एव इयं कौ=पृथिव्यां मुद्वती=हर्षयुक्ता शकुन्तला विगतशोभा सती दृष्टिं नाह्लादयति ।

इष्टस्य=प्रियस्य प्रवासः=विदेशगमनं तेन जनितानि=उत्पन्नानि दुःखानि=कष्टानि अबलाजनेन=स्त्रीजनेन नूनं=निश्चयमेव अतिमात्रं= समधिकं यथा स्यात्तथा दुरुद्वहानि=दुःसहानि भवन्ति ॥

अत्र शशिकुमुद्वतीभ्यां दुष्यन्तशकुन्तलारूपार्थयोः गम्यत्वात् समासोक्तिरलङ्कारः—'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽन्यस्य वस्तुनः' इति लक्षणात्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

नूनमित्यत्रोत्प्रेक्षा । उत्तरार्द्धेन सामान्येन पूर्वार्द्धस्य विशेषस्य समर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । इति समासोक्त्युत्प्रेक्षाऽर्थान्तरन्यासानां सङ्करः । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(४२) क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि नः किसलयच्छायापरिस्पर्द्धिभिः ॥ ४।४ ॥

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—अत्र शकुन्तलायाः पतिगृहगमनवेलायां वनस्पतिभिरपि शकुन्तलायै नानाप्रकारकमाभरणादिकं प्रेषितम् । यदा कण्वशिष्याः पुष्पचयनार्थं गतास्तदा तेषां हस्ते वनस्पतिभ्यः क्षौमादिकं दत्तमिति हारीतनामकः शिष्यः गौतमीं ज्ञापयति—

अन्वयः—केनचित् तरुणा इन्दुपाण्डु माङ्गल्यं क्षौमम् आविष्कृतम्, केनचित् चरणोपरागसुभगः लाक्षारसः निष्ठ्यूतः, अन्येभ्यः आपर्वभागोत्थितैः किसलयच्छायापरिस्पर्द्धिभिः वनदेवताकरतलैः नः आभरणानि दत्तानि ।

व्याख्या—केनचित्=एकेन तरुणा=वृक्षेण इन्दुः=चन्द्रः तद्वत् पाण्डु=पीतवर्णं माङ्गल्यं=माङ्गलिकं क्षौमं=क्षौमवस्त्रम् आविष्कृतं=प्रकटितम्, केनचित्=अन्येन वृक्षेण चरणयोः=पादयोः उपरागाय=रञ्जनाय सुभगः=सुन्दरः लाक्षारसः=चरणरञ्जनद्रव्यं निष्ठ्यूतः=प्रकटितः अन्येभ्यः=इतरेभ्यः वृक्षेभ्यः आपर्वभागोत्थितैः=करतलभागमात्रबहिरागतैः किसलयानां=नवपल्लवानां छाया=कान्तिः तां परिस्पर्द्धन्ते=तुलयन्ति तच्छीलानि तैः वनदेवतानां करतलैः=हस्ताग्रभागैः नः=अस्माकम् आभरणानि=आभूषणानि दत्तानि=समर्पितानि ।

अत्र 'इन्दुपाण्डु' 'किसलयच्छायापरिस्पर्द्धिभिः' इत्यादौ लुप्तोपमाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

(४३) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

वैक्लव्यं मम तावदिदृशमपि स्नेहादरण्यौकस:
पीड्यन्ते गृहिण: कथं नु तनयाविश्लेषदु:खैर्नवै: ।। ४।५ ।।

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—अत्र शकुन्तलायाः पतिगृहगमनं ध्यायं ध्यायमेव महर्षिः कण्वो वैक्लव्यमनुभवति, तत्हृदयं समुत्कण्ठया युक्तमस्ति, कण्ठोऽश्रुकलुषितः, दर्शनं च चिन्ताजडं जातमस्ति । एवञ्च कण्वः कथयति यदरण्यौकसोऽपि मम यदीदृशं वैक्लव्यं जायते तदा गृहिणः कथं न पीड्यन्ते इति ।

अन्वयः—अद्य शकुन्तला यास्यति इति हृदयम् उत्कण्ठया संस्पृष्टम्, कण्ठः स्तम्भितबाष्पवृत्तिकलुषः दर्शनं चिन्ताजडम् । अरण्यौकसः अपि मम तावत् स्नेहात् ईदृशं वैक्लव्यम्, गृहिणः नवैः तनयाविश्लेषदुःखैः कथं न पीड्यन्ते ?

व्याख्या—अद्य=साम्प्रतं शकुन्तला यास्यति=गमिष्यति इति विचार्य हृदयं=मनः उत्कण्ठया=औत्सुक्येन संस्पृष्टं=युक्तम्, कण्ठः स्तम्भितेन= अवरुद्धेन बाष्पवृत्तिना=अश्रुव्यापारेण कलुषः=कालिष्ययुक्तोऽस्ति, दर्शनं= दृष्टिः चिन्तया=शकुन्तलागमनौत्सुक्येन जडं=किंकर्त्तव्यशून्यमस्ति । अरण्यौकसः=वनवासिनः अपि मम=कण्वस्य तावत्=यदि स्नेहात्=प्रेम्णा ईदृशम्= एवंप्रकारकं वैक्लव्यं=विकलताऽस्ति तर्हि गृहिणः=गृहस्थाश्रमवासिनः नवैः= नूतनैः तनयायाः=पुत्र्याः विश्लेषस्य=वियोगस्य दुःखैः=कष्टैः कथं= किमिति न पीड्यन्ते=पीडिताः कथं न भवेयुरिति ।

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम् । कण्वस्य वैक्लव्ये अनेकविधकारणानां प्रतिपादनात् समुच्चयः । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ।।

(४४) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।४।८।।

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—अत्र शकुन्तलां तत्पतिगृहप्रेषणाय समुद्यतो महर्षिः कण्वः आश्रमवृक्षेभ्यः शकुन्तलासहोदरेभ्योऽनुज्ञां ग्रहीतुं प्रार्थयति—

अन्वयः—या युष्मासु असिक्तेषु प्रथमं जलं पातुं न व्यवस्यति, प्रिय-मण्डनापि या स्नेहेन भवतां पल्लवं न आदत्ते, वः कुसुमप्रसूतिसमये आदौ

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

यस्याः उत्सवः भवति सा इयं शकुन्तला पतिगृहं याति सर्वैः अनुज्ञायताम् ।

व्याख्या—या=शकुन्तला युष्मासु=भवत्सु असिक्तेषु=जलमपीतेषु प्रथमं=पूर्वं जलं=पानीयमपि पातुं=ग्रहीतुं न व्यवस्यति=उद्योगं न करोति नेच्छतीति भावः, प्रियम्=अभीप्सितं मण्डनम्=अलङ्करणं यस्याः सा अलङ्कारप्रियाऽपि या स्नेहेन=प्रेम्णा भवतां=युष्माकं पल्लवं=किसलयं न आदत्ते=न गृह्णाति न लुनाति, वः=युष्माकं कुसुमानां=पुष्पाणां प्रसूतिः=उद्गमस्तस्य समये=काले आदौ=सर्वप्रथमं यस्याः उत्सवः=मङ्गलं भवति=जायते सा इयं शकुन्तला पतिगृहं=याति=गच्छति अतः सर्वैरपि=भवद्भिः अनुज्ञायतां=अनुज्ञाप्रदानं कुर्वन्तु ।

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

(४५) रम्यान्तरः कमलिनीहरितैः सरोभिः
छायाद्रुमैर्नियमितार्कमरीचितापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥४।१०॥

सन्दर्भः—द्रष्टव्यं श्लो० ३९ ।

प्रसङ्गः—अत्र शकुन्तलां पतिगृहं प्रेषयन् महर्षिः कण्वः स्वकीयेनाशीर्वचसा तस्या मार्गे मङ्गलकामनां कुर्वन् कथयति—

अन्वयः—अस्याः पन्थाः कमलिनीहरितैः सरोभिः रम्यान्तरः, छायाद्रुमैः नियमितार्कमरीचितापः कुशेशयरजोमृदुरेणुः शान्तानुकूलपवनः शिवश्च भूयात् ।

व्याख्या—अस्याः=शकुन्तलायाः पन्थाः=मार्गः कमलिन्या=नलिन्या हरितैः=हरिद्वर्णैः सरोभिः=सरोवरैः रम्यं=रमणीयम् अन्तरं=मध्यो यस्य सः एवंभूतः, छाया प्रधानं येषां ते छायाद्रुमाः=छायावद्भिः वृक्षैः नियमितः=संयमितः निराकृतः अर्कस्य=सूर्यस्य मरीचीनां=किरणानां तापः=घर्मतापो यस्मिन् सः, कुशेशयानां=कमलानां रजोभिः=परागैः मृदुः=कोमला रेणुः=धूलिः यस्मिन् सः, शान्तः=शनैः शनैः प्रवहमानःअनुकूलः=अनुगतः आगमनशीलः पवनः=वायुः यस्मिन् सः, शिवः=कल्याणं च भूयात्=भवेत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अत्र शकुन्तलायाः मार्गे शिवत्वसूचकानामनेकविधकारणानां प्रतिपाद... समुच्चयः । वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः।' इ... लक्षणात् ॥

(४६) यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥४।१३॥

सन्दर्भः—द्रष्टव्यं श्लो०—३९ ।

प्रसङ्गः—अत्र यदा शकुन्तला पतिगृहं याति तदा तस्याः कृतपुत्रः क... न्मृगशावकः भूयो भूयः शकुन्तलायाः पदान्ते सज्जते । शकुन्तला गति... रूपयन्ती यदा 'कः मम वसनान्ते सज्जते' इति पृच्छति तदा कण्वस्तां ... यति—

अन्वयः—वत्से ! यस्य कुशसूचिविद्धे मुखे त्वया व्रणविरोपणम् इङ्गुदी... तैलं न्यषिच्यत, श्यामाकमुष्टिपरिवर्धितकः सः अयं ते पुत्रकृतकः मृगः ते प... न जहाति ।

व्याख्या—वत्से=पुत्रि ! यस्य=मृगशावकस्य कुशानां=दर्भानां सूचि... अग्रभागैः विद्धे मुखे=आनने त्वया=शकुन्तलया व्रणविरोपणं=व्रणनिवा... कम्, इङ्गुदीनां=तैलद्रव्यविशेषाणां तैलं=स्नेहं न्यषिच्यत=निषक्तम् श्या... कानां=धान्यविशेषाणां मुष्टिभिः=मुष्टिपरिमाणैः परिवर्धितकः=पालि... पोषितश्च सोऽयं ते=तव पुत्रकृतकः=कृतकपुत्रः मृगः=हरिणशिशुः ते=... पदवीं=मार्गं न जहाति=त्यजति ।

अत्र पदवीपरित्यागाभावं प्रति पूर्ववाक्यानां हेतुत्वात् काव्यलिङ्गम्... 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । पालितस्य मृग... स्ववर्णनात् स्वभावोक्तिश्चेति । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिल... तभजाजगौगः' इति लक्षणात् ॥

(४७) अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यास्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतः परं न खलु तत्स्त्रीबन्धुभिर्याच्यते ॥४।१...

सन्दर्भः—द्रष्टव्यं श्लो० ३९ ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रसङ्गः—अत्र शकुन्तलायाः पतिगृहगमनसमये महर्षिः कण्वः राज्ञे दुष्यन्ताय सन्देशः स्वशिष्यान् श्रावयति—

अन्वयः—अस्मान् संयमधनान् आत्मनः उच्चैः कुलम् च साधु विचिन्त्य, त्वयि अस्याः कथमपि अबान्धवकृतां तां स्नेहप्रवृत्तिं च विचिन्त्य, त्वया दारेषु इयं सामान्यप्रतिपत्तिपूर्वकं दृश्या, अतः परं भाग्याधीनम्, तत् स्त्रीबन्धुभिः न खलु याच्यते।

व्याख्या—अस्मान्=तपस्विनः संयमः=नियम एव धनं येषां तान् अनेनार्थाभावो द्योत्यते, आत्मनः=दुष्यन्तस्य उच्चैः=श्रेष्ठं कुलं च साधु=सम्यक् विचिन्त्य=विचार्य, त्वयि=राजनि अस्याः=शकुन्तलायाः कथमपि=केनापि प्रकारेण बान्धवैः=कुटुम्बिभिः न कृतां=सम्पादितां तां=पूर्वानुभूक्तां स्नेहप्रवृत्तिं=प्रेमोद्गमश्च विचिन्त्य=विचार्य त्वया=दुष्यन्तेन दारेषु पत्नीषु सामाना च सा प्रतिपत्तिः=ज्ञानं तत्पूर्वकं समानरूपेणेति भावः दृश्या =ज्ञातव्या सम्माननीयेति अतः परं=अस्मात् अधिकं भाग्याधीनं=भाग्यायत्तं तत् स्त्रीणां=वधूनां बन्धुभिः=मातृपित्रादिभिः नैव याच्यते=प्राथ्यंते। अत्र शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

(४८) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥४।१७॥

सन्दर्भ—द्रष्टव्यं श्लो० ३९।

प्रसङ्गः—अत्र पतिगृहं गच्छन्ती शकुन्तला विदितवेदितव्येन धर्मशास्त्रलोकव्यवहारनिपुणेन पित्रा महर्षिणा कण्वेन पतिगृहव्यवहारे उपदिश्यते—

अन्वयः—गुरून् शुश्रूषस्व, सपत्नीजने प्रियसखीवृत्तिं कुरु, भर्तुः विप्रकृतापि रोषणतया प्रतीपं मास्म गमः। परिजने भूयिष्ठं दक्षिणा भोगेषु अनुत्सेकिनी भव, एवं युवतयः गृहिणीपदं यान्ति वामाः कुलस्य आधयः।

व्याख्या—गुरून्=श्वश्रूः तथा चान्यान् श्रेष्ठजनान् शुश्रूषस्व=परिचर्यां कुरु, सपत्नीजने=पत्युरन्यस्त्रीजने प्रियसख्याः=सुहृदः वृत्तिं=व्यवहारं कुरु, भर्तुः=स्वामिनः विप्रकृतापि=विरुद्धमाचरिता क्रोधादिसमन्विते सति रोषणतया=क्रोधेन प्रतीपं=विपरीतं मास्म=नहि गमः=गच्छ, परिजने=सेवक-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

वर्गे भूयिष्ठम्=अधिकं यथा स्यात्तथा दक्षिणा=दाक्षिण्ययुक्ता भव, भोगेषु=बिषयवासनासु अनुत्सेकिनी=अनुत्कण्ठिनी यद्वा राजसुखभोगेषु अनुत्सेकिनी=निरहङ्कारा भव। एवं पूर्वोक्तप्रकारेण व्यवहारसमन्विताः युवतयः=अल्पवयस्काः अनुभवरहिता अपि गृहिण्याः=गृहस्वामिन्याः पदं=स्थानं यान्ति=प्राप्नुवन्ति वामाः=एतद्विपरीताः कुलस्य=कुटुम्बस्य आधयः=व्याधयः सन्ति।

अत्र प्रियसख्याः वृत्ति शकुन्तला कथं करोतु इत्यसम्बद्धवद्वस्तु प्रियसखीवत् इत्युपमायां पर्यवसानात् निदर्शना 'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः' इति लक्षणात्। 'युवतयः' इति सामान्येन शकुन्तलारूपविशेषस्य समर्थनादर्थान्तरन्यासः। वामासु आधीनामारोपाद् रूपकम्। एवं निदर्शनाऽर्थान्तरन्यासरूपकाणां संसृष्टिः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

(४९) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैरस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से ! शुचं गणयिष्यति ॥४।१८॥

सन्दर्भः—द्रष्टव्यं श्लो०—३९।

प्रसङ्गः—अत्र पतिगृहं गच्छन्ती शकुन्तला यदा पितरं कण्वमाश्लिष्य कथयति यत्—'कथमिदानीं तातस्याङ्कात् परिभ्रष्टा मलयपर्वतादुन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि' इति तदा तामाश्वासयन् महर्षिः कण्वः कथयति।

अन्वयः—हे वत्से ! अभिजनवतः भर्तुः श्लाघ्ये गृहिणीपदे स्थिता अस्य विभवगुरुभिः कृत्यैः प्रतिक्षणम् आकुला, अचिरात् प्राची पावनम् अर्कम् इव तनयं प्रसूय, मम विरहजां शुचं त्वं न गणयिष्यसि।

व्याख्या—हे वत्से !=हे पुत्रि ! अभिजनवतः=कुलीनस्य भर्तुः=स्वामिनः दुष्यन्तस्य श्लाघ्ये=प्रशंसनीये गृहिणीपदे=गृहस्वामिनीपदे स्थिता=वर्तमाना अस्य=पत्युः विभवैः=धनैः गुरुभिः=श्रेष्ठैः कृत्यैः=कार्यैः प्रतिक्षणं=सर्वदा आकुला=व्यस्ता, अचिरात्=शीघ्रं प्राची=पूर्वदिशा पावनं=पवित्रम् अर्कम्=सूर्यम् इव=यथा प्रसूय=उत्पाद्य मम=अस्माकं विरहेन=वियोगेन जाताम्=उत्पन्नां शुचं=कष्टं त्वं न गणयिष्यसि=ज्ञास्यसि।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust. Funding IKS-MoE Grant-2

अत्र 'प्राचीजार्कम्' इत्यत्र पूर्णोपमा । चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । हरिणी वृत्तम्—'न्सौ म्रौ स्लौ गो यदा हरिणी मता' इति लक्षणात् ।

(५०) भूत्वा चिराय सदिगन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं प्रसूय ।
तत्सन्निवेशितधुरेण सहैव भर्त्रा
शान्त्यै करिष्यति पदं पुनराश्रमेऽस्मिन् ॥ ४।१९ ॥

सन्दर्भः—द्रष्टव्यं श्लो० ३९ ।

प्रसङ्गः—अत्र पतिगृहं गच्छन्ती शकुन्तला यदा पितरं कण्वं पृष्टवती—'तात ! पुनः कदा नु तपोवनं प्रेक्षिष्ये ?' तदा कण्वः कथयति—

अन्वयः—चिराय सदिगन्तमहीसपत्नी भूत्वा अप्रतिरथं दौष्यन्तिं तनयं प्रसूय तत्सन्निवेशितधुरेण भर्त्रा सहैव पुनः अस्मिन् आश्रमे शान्त्यै पदं करिष्यति ।

व्याख्या—चिराय=बहुकालाय सदिगन्ता=दिक्पर्यन्तं व्याप्ता या मही=पृथ्वी तस्याः सपत्नी=समानभर्तृका भूत्वा अप्रतिरथम्=अतुल्यबलं दौष्यन्तिं =दुष्यन्तसम्बन्धिनं तनयं=पुत्रं प्रसूय=जनयित्वा तस्मिन्=दुष्यन्ते सन्निशितं=स्थापितं धुरं=भारो येन तेन भर्त्रा=स्वामिना सहैव=सार्धमेव पुनः =भूयः अस्मिन्=दृश्यमाने आश्रमे=आश्रमपदे शान्त्यैः=शान्तिलाभाय पदं=स्थानं निवासः करिष्यति=सम्पादयिष्यति । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(५१) अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा ॥४।२१॥

सन्दर्भः—द्रष्टव्यं श्लो० ३९ ।

प्रसङ्गः—अत्र शकुन्तलां पतिगृहं प्रापयित्वा महर्षिकण्वो विशदान्तरात्मा सन् कथयति—

अन्वयः—हि कन्या परकीयः अर्थः, अद्य तां परिग्रहीतुः सम्प्रेष्य चिरस्य निक्षेपम् अर्पयित्वा इव सद्यः विशदान्तरात्मा जातः अस्मि ।

व्याख्या—हि=यतः कन्या=पुत्री परकीयः=अन्यदीय एव अर्थः=धनमस्ति, अद्य तां=कन्यां शकुन्तलां परिग्रहीतुः=परिणेतुः समीपं सम्प्रेष्य=प्रेषयित्वा चिरस्य=चिरकालस्य निक्षेपं=न्यासम् अर्पयित्वा=तत्स्वामिने प्रत्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

पंयित्वा इव सद्यः=शीघ्रं पूर्णरूपेणेति भावः, विशदः=स्वच्छो भाररहितः अन्तरात्मा=अन्तःकरणं यस्यैवंभूतो जातः=प्राप्तः अस्मि ।

अत्र कन्यायामर्थस्यारोपाद्रूपकम्—'रूपकं रूपितारोपो विषये निरपह्नवे' इति लक्षणात् । उत्तरार्धं प्रति पूर्वार्द्धस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् ॥ उपजातिवृत्तम्—'इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणात्' ॥

पञ्चमोऽङ्कः

(५२) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ ५२ ॥

सन्दर्भः—श्लोकोऽयं कविमण्डलमण्डनायमानेन, पृथिव्याः हारायमानेन कविताविलासेन महाकविना कालिदासेन विरचितस्य अभिज्ञानशाकुन्तलस्य नाटकस्य पञ्चमाङ्कात् परिगृहीतोऽस्ति ।

प्रसङ्गः—अत्र विदूषकेन सह राजसभायां वर्तमाने राजनि राज्ञः एका पत्नी हंसपदिका, खलु या राज्ञा सकृत्कृतप्रणयास्ति, वियोगगानं करोति तच्छ्रावं श्रावं राजा स्वमनसि विचारयति—

अन्वयः—रम्याणि वीक्ष्य मधुरान् शब्दान् च निशम्य सुखितः अपि जन्तुः यत् पर्युत्सुकः भवति तत् नूनम् अबोधपूर्वं जननान्तरसौहृदानि भावस्थिराणि चेतसा स्मरति ।

व्याख्या—रम्याणि=मनोहराणि वस्तूनि वीक्ष्य=अवलोक्य मधुरान्=श्रुतिसुखकरान् शब्दान्=वचनानि च निशम्य=श्रुत्वा सुखितः=हर्षयुक्तः, पत्नीयुक्तः वा अपि जन्तुः=प्राणी यत् पर्युत्सुकः=तरलितचित्तः भवति तत् नूनं =निश्चयम् न बोधः=ज्ञानं पूर्वं यस्य तत् एवंभूतं यथा स्यात्तथा जननान्तरे=जन्मान्तरे पूर्वजन्मनि यानि सौहृदानि=मैत्र्यादीनि तानि भावस्थिराणि=वासनारूपेण वर्तमानानि चेतसा=हृदयेन स्मरति=स्मरणं करोति ।

अत्राप्रस्तुतात् जन्तुसामान्यात् प्रस्तुतस्यात्मरूपस्य विशेषस्य प्रतीतेरप्रस्तुत-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रशंसाऽलङ्कारः । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(५३) औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ५।६ ॥

सन्दर्भः—द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः—अत्र राजकार्यव्यापृतो राजा दुष्यन्तः राज्यं प्रति स्वानुभवं प्रकाशयन् कथयति यत् राज्यं श्रमायैवास्ति न तु श्रमापनयनायेति—

अन्वयः—प्रतिष्ठा औत्सुक्यमात्रम् अवसादयति, लब्धपरिपालनवृत्तिः क्लिश्नाति एव राज्यं स्वहस्तधृतदण्डम् आतपत्रम् इव यथा श्रमाय अतिश्रमापनयनाय न ।

व्याख्या—प्रतिष्ठा=ख्यातिः यशः मात्रं=केवलम् औत्सुक्यम्=अलब्धलाभनिमित्तोत्कण्ठाम् अवसादयति=समापयति लब्धस्य=प्राप्तस्य वस्तुनः परिपालनस्य=रक्षणस्य वृत्तिः=व्यापारः क्लिश्नाति=क्लेशं ददाति एव राज्यं स्वहस्ते=स्वकरे धृतः=गृहीतो दण्डः=यष्टिः यस्य तत् आतपत्रं =छत्रम् इव=यथा श्रमाय=परिश्रमाय क्लेशायेति तथा अति=अतिमात्रमधिकमिति श्रमस्य=परिश्रमस्य कष्टस्य अपनयनाय=दूरीकरणाय न= न भवति ।

अत्रोपमालङ्कारः राज्यस्यातपत्रेण सादृश्यवर्णनात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(५४) स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवं विधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥ ५।७ ॥

सन्दर्भः—द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः—अत्र राज्ञो दुष्यन्तस्य वैतालिकयोः एको राज्ञः स्तुतिं कुर्वन् कथयति—

अन्वयः—स्वसुखनिरभिलाषः प्रतिदिनं लोकहेतोः खिद्यसे अथवा ते सृष्टिः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

एव एवंविधा, हि पादपः मूर्ध्ना परितापम् अनुभवति संश्रितानां तीव्रम् उष्णं परितापं छायया शमयति ।

व्याख्या—स्वस्य = आत्मनः सुखे नास्ति अभिलाषः = इच्छा यस्य स एवंविधः सन् प्रतिदिनं लोकस्य = प्रजावर्गस्य हेतोः = कल्याणाय खिद्यसे = खेदं प्राप्नोषि, अथवा ते = तव दुष्यन्तस्य सृष्टिरेव = निर्माणमुत्पत्तिरिति एवंविधा = दुःखं सोढुम् अस्ति, हि = यतः पादपः = वृक्षः मूर्ध्ना = शिरसा परितापं = घर्मतापम् अनुभवति किन्तु संश्रितानां = तलस्थजनानां तीव्रम् = असह्यम् उष्णं परितापं = घर्मतापं शमयति = दूरीकरोति ।

अत्र कर्त्तव्यनिष्ठस्य राज्ञः स्वभाववर्णनात् स्वभावोक्तिः, पादपे सज्जनव्यवहारसमारोपात् समासोक्तिः—'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः व्यवहारसमारोपः' इति लक्षणात् । मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(५५) नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः संविभक्ता-
स्त्वयि तु परिसमाप्तं बन्धुकृत्यं जनानाम् ॥ ५।८ ॥

सन्दर्भः—द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः—द्रष्टव्यं श्लो० ५४ ।

अन्वयः—आत्तदण्डः सन् विमार्गप्रस्थितान् नियमयसि, विवादं प्रशमयसि, रक्षणाय कल्पसे, ज्ञातयः अतनुषु विभवेषु संविभक्ताः त्वयि तु जनानां बन्धुकृत्यं परिसमाप्तम् ।

व्याख्या—आत्तः = गृहीतः दण्डः = दण्डनीतिः येन सः तथाभूतः सन् विमार्गे = कुमार्गे प्रस्थितान् = वर्तमानान् नियमयसि = नियमनं करोषि अपथान्निवारयसीति भावः, विवादं = विरोधं प्रशमयसि = दूरीकरोषि, रक्षणाय = पालनाय कल्पसे = समर्थो भवसि, ज्ञातयः = बान्धवाः अतनुषु = प्रभूतेषु विभवेषु = धनेषु संविभक्ताः = समानरूपेण विभज्य वर्तमानाः, एवं त्वयि = दुष्यन्ते जनानां = प्रजानां बन्धुकृत्यं = बान्धवकार्यं परिसमाप्तं = पर्यवसितम् ॥

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । एकस्यैव दुष्यन्तरूपकारकस्य प्रशमयसि, नियमयसि, कल्पसे इति क्रियात्रयेऽन्वयात् दीपकम्—'अथ कारकमेकं

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यादनेकासु क्रियासु चेत्' इति लक्षणात्। मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(५६) महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।
तथापीदं शश्वत् परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ ५।१० ॥

सन्दर्भः—द्रष्टव्यं श्लो० ५२।

प्रसङ्गः—प्रसङ्गोऽयं तत्समयस्यास्ति यदा शकुन्तलामादाय गौतमीसहितौ कण्वशिष्यौ राजानं दुष्यन्तं हस्तिनापुरमागतौ, तदा राजानमवलोक्य शार्ङ्गरवः स्वसहयोगिनं शारद्वतं प्रति राज्ञो दुष्यन्तस्य वैशिष्ट्यं वर्णयति।

अन्वयः—असौ महाभागः नरपतिः कामम् अभिन्नस्थितिः वर्णानाम् अपकृष्टोऽपि कश्चित् अपथं न भजते, तथापि शश्वत् परिचितविविक्तेन मनसा इदं जनाकीर्णं गृहं हुतवहपरीतम् इव मन्ये।

व्याख्या—असौ=दृश्यमानो महाभागः=विपुलभाग्यवान् नरपतिः=राजा कामं=यद्यपि न भिन्ना=विपरीता स्थितिः=मर्यादा यस्यैवंभूतः मर्यादापालकोऽस्ति, वर्णानां=ब्राह्मणक्षत्रियवैश्यशूद्राणाम् अपकृष्टः=नीचः अपि कश्चित्=जनः अपथं=कुमार्गं न=नहि भजते=आश्रयति, तथापि=सर्वं सुस्थेऽपि शश्वत्=निरन्तरं परिचितः=ज्ञातः विविक्तः=एकान्तस्थानं येन तेन मनसा=हृदयेन इदं=दृश्यमानं जनाकीर्णं=जनैः व्याप्तं गृहं=राजभवनं हुतवहेन=अग्निना परीतं=व्याप्तम् इव=इति सम्भावनायां मन्ये=उत्प्रेक्षे सम्भावयामीति।

अत्र राजगृहस्य हुतवहपरीतत्वेन ज्ञानस्य सम्भावनयोत्प्रेक्षा, मन्ये इत्यस्य उत्प्रेक्षावाचकत्वात् 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षावाचका शब्दा इव शब्दोऽपि तादृशः' इति नियमात्। एवं ज्ञाने शश्वत्परिचितविविक्तत्वस्य कारणत्वेनोपन्यासात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात्। शिखरिणी वृत्तम्—'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात् ॥

(५७) सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥ ५।१७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सन्दर्भः— द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः— अत्र शकुन्तलामादाय कण्वशिष्यौ यदा राजानं दुष्यन्तमागत्य गुरोः सन्देशं श्रावितवन्तौ तदा दुर्वाससः शापप्रभावात् विस्मृतशकुन्तलावृत्तान्तो राजा शकुन्तलाविवाहविषये स्वकीयामनभिज्ञतां प्रकटयति तदा शार्ङ्गरवनामकः कण्वशिष्यो राजानं कथयति—

अन्वयः— सतीमपि ज्ञातिकुलैकसंश्रयां भर्तृमतीं जनः अन्यथा विशङ्कते अतः प्रिया अप्रिया वा प्रमदा स्वबन्धुभिः परिणेतुः समीपे इष्यते ।

व्याख्या— सतीं=साध्वीमपि ज्ञातिकुलैकसंश्रयां=पितृगृहैकवासिनीं भर्तृमतीं=परिणीतां तथा च जीवितभर्तृकां जनः=लोकः अन्यथा=विपरीतम् असतीत्वेनेति भावः विशङ्कते=आशङ्कां कुर्वन्ति, अतः=एवं च प्रिया=अभिमता अप्रिया=अनभिमता वा प्रमदाः=युवतयः स्वबन्धुभिः=मातृपित्रादिभिः परिणेतुः=पत्युः समीपे=पार्श्वे इष्यते=वाञ्छयते ।

अत्राप्रस्तुतात् प्रमदासामान्यात् प्रस्तुतस्य शकुन्तलारूपविशेषस्य प्रतीते अप्रस्तुतप्रशंसाऽलङ्कारः—'अप्रस्तुतप्रशंसा स्यात् या सैव प्रस्तुताश्रया' इति लक्षणात् । वंशस्थविलं वृत्तम्—'जतौ तु वंशस्थविलं जतौ जरौ' इति लक्षणात् ॥

(५८) इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यध्यवस्यन् ।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् ॥५।१९॥

सन्दर्भः— द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः— महर्षिणा कण्वेन गौतमीसहितां शिष्याभ्यां परिरक्षितां स्वतः पत्नीत्वेन च उपस्थितां शकुन्तलां राजा न भोक्तुं शक्नोति न त्यक्तुमेव शक्नोतीति कथयति ।

अन्वयः— इदम् उपनतम् अक्लिष्टकान्ति एवंरूपं प्रथमपरिगृहीतं स्यात् न वा इति अध्यवस्यन् निशान्ते अन्तस्तुषारं कुन्दं भ्रमर इव सपदि न भोक्तुं शक्नोमि न खलु मोक्तुं शक्नोमि ।

व्याख्या— इदं=दृश्यमानम् उपनतम्=उपस्थितम् न=नास्ति क्लिष्टा=म्लाना कान्तिः=शोभा यस्य तत् एवंरूपं=एवमनिर्वचनीयं रूपं=सौन्दर्यं प्रथमं=पूर्वं परिगृहीतं=परिणीतं स्यात् न वा परिणीतमिति अध्यवस्यन्=विचारयन् निशान्ते=प्रातःकाले कुन्दं=तदाख्यं पुष्पम् अन्तः=मध्ये तुषारः

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तुषारबिन्दुः यस्य तत् भ्रमरः=षट्पदः इव=यथा सपदि=शीघ्रं न भोक्तुम् =उपभोक्तुं शक्नोमि=पारयामि न खलु मोक्तुं=त्यक्तुमेव शक्नोमि= पारयामीति ॥

अत्र पूर्णोपमाऽलङ्कारः । मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥

(५९) स्त्रीणामशिक्षितपटुत्वममानुषीणां
संदृश्यते किमुत याः परिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यद्विजैः परभृताः किल पोषयन्ति ॥५।२२॥

सन्दर्भः—द्रष्टव्यं श्लो० ५२ ।

प्रसङ्गः—यदा राजा शकुन्तलां न स्वीकृतवान् तदाऽभिज्ञानं प्रदर्शयितुं कृतप्रयत्ना शकुन्तला आत्मनोऽङ्गुलिम् अङ्गुलीयकशून्यामवलोकितवती तदा गौतम्योक्तं यत् कश्चित् प्रत्ययवचनं दीयतामिति । शकुन्तलया दुष्यन्तेन सह लताकुञ्जे घटिताः अनेकाः घटनाः कथितवती । तदापि न स्मृता शकुन्तला, तदा दुष्यन्तः स्त्रीणां बुद्धिं प्रशंसयन् कथयति—

अन्वयः—अमानुषीणां स्त्रीणाम् अशिक्षितपटुत्वं संदृश्यते किमुत याः परिबोधवत्यः ? परभृताः अन्तरिक्षगमनात् प्राक् स्वम् अपत्यजातम् अन्यद्विजैः पोषयन्ति किल ।

व्याख्या—अमानुषीणां=पशुपक्षिणीनामपि स्त्रीणां=नायिकानाम् अशिक्षितम्=अनुपदिष्टमेव पटुत्वं=कौशलं चातुर्यं संदृश्यते=अवलोक्यते तर्हि याः परिबोधवत्यः=ज्ञानवत्यः मानुष्यः सन्ति तासां किमुत=किं कथनीयमिति ? परभृताः=कोकिलाः अन्तरिक्षे=आकाशे गमनम्=उड्डयनं तस्मात् प्राक्=पूर्वं स्वं=स्वकीयम् अपत्यजातं=सन्ततिम् अन्यैश्च तैः द्विजैः=पक्षिभिः पोषयन्ति=पालयन्ति किलेति निश्चयेन ।

अत्र पूर्वार्द्धं प्रति उत्तरार्धस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(६०) मय्येवमस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ।।५।२३।।

सन्दर्भः—द्रष्टव्यं श्लो०—५२ ।

प्रसङ्गः—प्रसङ्गोऽयं तत्समयस्यास्ति यदा शकुन्तला राज्ञा दुष्यन्तेन ति- स्कृता जाता । तदापि शकुन्तलायां कथं विकाराः जाताः तान् विकारान् द- दर्शं राजा तद्वाक्ये सत्यतां कल्पयन् कथयति—

अन्वयः—एवम् अस्मरणदारुणचित्तवृत्तौ रहः वृत्तं प्रणयम् अप्रतिपद्यमाने मयि कुटिलयोः भ्रुवोः अतिलोहिताक्ष्या अतिरुषा स्मरस्य शरासनम् भग्नम् ।

व्याख्या—एवम्=इत्थंप्रकारेण न=नहि स्मरणं=पूर्वपरिणयज्ञानं दारुणा=निष्ठुरा भयङ्करा चित्तवृत्तिः=मनोवृत्तिः यस्य तस्मिन्, रहः= एकान्ते वृत्तं=सम्पन्नं प्रणयं=प्रेम अप्रतिपद्यमाने=अस्वीकुर्वाणे मयि दुष्यन्ते कुटिलयोः=वक्रयोः भ्रुवोः भेदात्=भङ्गात् अति=अतिमात्रम् लोहिते=रक्ते अक्षिणी=नेत्रे यस्यास्तया अतिरुषा=अतिक्रोधेन स्मरस्य कामदेवस्य शरासनं=धनुः भग्नं=भङ्क्तमिति इवेत्युत्प्रेक्षायाम् ।

अत्र भ्रुवोः भेदात् कामधनुर्भङ्गस्य सम्भावनया उत्प्रेक्षाऽलङ्कारः । उत्त- रार्द्धम्प्रति पूर्वार्द्धस्य हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ।।

षष्ठोऽङ्कः

(६१) चूतानां चिरनिर्गताऽपि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरवकं तत् कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ।।६।३।।

सन्दर्भः—श्लोकोऽयं कविकुलकमलदिवाकरेण, काव्यमानसराजहंसेन कविमण्डलमण्डनायमानेन अप्रतिमप्रातिभसम्पत्तिभासमानेन, कविताविलासेन महाकविना कालिदासेन विरचितस्य, संस्कृतसाहित्यललामभूतस्य निखिल-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्त्वपूतस्य सर्वथा नवनवस्य अभिज्ञानशाकुन्तलनामधेयस्य नाटकस्य षष्ठाङ्कात् परिगृहीतोऽस्ति ।

प्रसङ्गः—अत्र प्राप्तेऽङ्गुरीयके स्मृतशकुन्तलावृत्तान्तेन, शकुन्तलावियोगानलदन्दह्यमानमानसेन, राज्ञा दुष्यन्तेन स्वकीये राज्ये वसन्तोत्सवो निरुद्धोऽस्ति । केनापि जनेन तु वसन्तोत्सवो नैव सम्पाद्यते तरुलतादिभिरपि तच्छासनं प्रमाणयद्भिः वसन्तोत्सवस्त्यक्त इति कञ्चुकी चेटीम्प्रति वर्णयति—

अन्वयः—चिरनिर्गताऽपि चूतानां कलिका स्वं रजः न बध्नाति, यत् कुरबकं सन्नद्धं तत् अपि कोरकावस्थया स्थितम्, शिशिरे गतेऽपि पुंस्कोकिलानां रुतं कण्ठेषु स्खलितम्, स्मरः अपि चकितः तूणार्द्धकृष्टं शरं संहरति (इति) शङ्के ।

व्याख्या—चिरात्=चिरकालात् निर्गता=निःसृताऽपि चूतानाम्=आम्राणां कलिका=मञ्जरी स्वं=स्वकीयं रजः=परागं न बध्नाति=धारयति, यत् कुरवकं=तन्नामकं पुष्पं सन्नद्धं=उपस्थितं विकासायोद्यतं तदपि राज्ञः आदेशं श्रुत्वा कोरकावस्थया=कलिकारूपेणैव स्थितं=वर्तमानं जातम्, नैव विकसितमिति, शिशिरे=हिमतौ गते=समाप्तेऽपि पुंस्कोकिलानां=पुंजातीयानां कोकिलानां रुतं=रवं कण्ठेषु=गलप्रदेशेषु स्खलितं=स्पष्टतया नैव निःसृतमिति, स्मरः=कामदेवोऽपि चकितः=आश्चर्यान्वितः तूणार्द्धात्=तूणीरात् अर्द्धमेव यथा स्यात्तथा आकृष्टं=वहिरानीतं शरं=बाणं संहरति=सङ्कोचयति ।

'शङ्के' इति प्रयोगात् उत्प्रेक्षाऽलङ्कारः । देवादेशस्य स्वीकारे पादत्रयस्यापि हेतुत्वात् काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् ।' इति लक्षणात् ॥

६२) रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडावनम्रश्चिरम् ॥६।५॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१ ।

प्रसङ्गः—अत्र मधुरिका नाम्नी चेटी काञ्चुकीयं वसन्तोत्सव प्रत्यादेशस्य कारणं पृच्छति । तया पृष्टः कञ्चुकीयः राज्ञः शकुन्तलाप्रेमवृत्तान्तमङ्गुरीयक-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

वृत्तान्तश्चोपवर्णयति तथा चाङ्गुलीयकप्राप्तिमपि श्रावयति। अङ्गुलीयकप्रा-नन्तरं स्मृतशकुन्तलावृत्तान्तो राजा तदाप्रभृत्येव पश्चात्तापमुपगत इति श्रा-यति कञ्चुकी—

अन्वयः—रम्यं द्वेष्टि, पुरा यथा प्रकृतिभिः प्रत्यहं न सेव्यते शय्योपान्त-विवर्तनैः उन्निद्र एव क्षपाः विगमयति, यदा दाक्षिण्येन अन्तःपुरेभ्यः उचि-वाचं ददाति तदा गोत्रेषु स्खलितः चिरं व्रीडावनम्रः भवति।

व्याख्या—रम्यं=रमणीयं वस्तु द्वेष्टि=नाभिनन्दति, पुरा=पूर्वं यथा =इव प्रकृतिभिः=प्रजाभिः प्रत्यहं=प्रतिदिनं न सेव्यते=नोपास्यते शय्यायाः=तल्पस्य उपान्ते=प्रान्तभागे विवर्त्तनैः=पार्श्वपरिवर्तनैः उन्निद्रः =जागरितः एव क्षपाः=रात्रीः विगमयति=क्षपयति, यदा दाक्षिण्येन= दाक्षिण्यगुणतया अन्तःपुरेभ्यः=अन्तःपुरवासिभ्यः जनेभ्यः उचितां=उपयुक्तां वाचं=वाणीं ददाति=कथयति तदा गोत्रेषु=संज्ञासु स्खलितः=कृत-अन्यायाः स्थाने अन्यनामग्रहणे चिरं=बहुकालं यावत् व्रीडया=लज्जया अवनम्रः=अवनतशिरः भवति=जायते।

अत्र राज्ञः पश्चात्तापरूपकार्यस्य प्रतिपादनार्थमनेकविधरम्यद्वेषादिहेतूनां प्रतिपादनात् समुच्चयालङ्कारः। व्रीडावनम्रत्वे गोत्रस्खलनस्य हेतु-पदार्थहेतुकं काव्यलिङ्गम्। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः स-रवः शार्दूलविक्रीडितम्।' इति लक्षणात्॥

(६३) प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठे श्लथं
विभ्रत् काञ्चनमेकमेव वलयं श्वासापरक्ताधरः।
चिन्ताजागरणप्रताम्रनयनस्तेजोगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१।

प्रसङ्गः—द्रष्टव्यं श्लो०—६२।

अन्वयः—प्रत्यादिष्टविशेषमण्डनविधिः, वामप्रकोष्ठे श्लथं काञ्चनम् एव वलयं बिभ्रत्, श्वासापरक्ताधरः, चिन्ताजागरणप्रताम्रनयनः, क्षीणः आत्मनः तेजोगुणैः संस्कारोल्लिखितः महामणि इव न आलक्ष्यते।

व्याख्या—प्रत्यादिष्टः=निरादृतस्त्यक्तः विशेषरूपेण मण्डनस्य=अलंक-रणस्य विधिः=प्रकारो येन सः; वामप्रकोष्ठे वामहस्तमणिबन्धभागे श्लथं

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिथिलीभूतं काञ्चनं=सौवर्णम् एकम् एव वलयं=कङ्कणं बिभ्रत्=धारयन्, श्वासेन=उष्णनिःश्वासेन अपरक्तः=रक्तिमरहितः अधरः=अधरोष्ठो यस्य चिन्तया=शकुन्तलाप्राप्तिकामनया जागरणेन=उन्निद्रेण प्रकर्षेण ताम्रे=रक्ते नयने=नेत्रे यस्य सः, क्षीणः=दुर्बलः अपि आत्मनः=स्वस्य तेजोगुणैः=कान्तिभिः संस्कारेण=शाणेन उल्लिखितः=घर्षितः महामणिः=उत्कृष्टमणिः इव न=नहि आलक्ष्यते=क्षीणत्वेन न प्रतीयते इति ।

अत्र राज्ञो विरहवेदनाप्रतिपादनार्थमनेककारणानां प्रतिपादनात् समुच्चयालङ्कारः । 'महामणिरिव' इत्यत्र पूर्णोपमा । विरहिणः स्वभाववर्णनात् स्वभावोक्तिः । एवं समुच्चयोपमास्वभावोक्तीनां सङ्करः । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

६४) इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रकरकलुषामर्पितवती
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम् ॥६।९॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१ ।

प्रसङ्गः—अत्रैकान्ते शकुन्तलां स्मारं स्मारं तद्विषये एव विदूषकेन सह क्रमपि आलपन् परित्यागविक्लवायास्तस्याः एकैकां चेष्टां स्मरन् कथयति राजा—

अन्वयः—इतः प्रत्यादिष्टा स्वजनम् अनुगन्तुं व्यवसिता, गुरुसमे गुरुशिष्ये तिष्ठ इति उच्चैः वदति स्थिता, पुनः यत् क्रूरे मयि बाष्पप्रकरकलुषां दृष्टिम् अर्पितवती तत् तुकः सविषं शल्यम् इव मां दहति ।

व्याख्या—इतः=मत्तः प्रत्यादिष्टा=निरादृता सती स्वजनं=कण्वशिष्यम् अनुगन्तुं=अनुगमनं कर्तुं व्यवसिता=उद्यता, गुरुसमे=गुरुतुल्ये गुरुशिष्ये=शार्ङ्गरवशारद्वतादिषु तिष्ठ=अत्रैव तिष्ठ अस्माभिः सह मा आगच्छ इति=एवम् उच्चैः=उच्चस्वरेण वदति=कथयति सति स्थिता=गमनात् निवृत्ता, पुनः=भूयो भूयः क्रूरे=निरादरकठोरहृदये मयि=दुष्यन्ते बाष्पानाम्=अश्रूणां प्रकरेण=समूहेन कलुषां=कलुषितां दृष्टिं=नेत्रे अर्पितवती=दत्तवती तत्=चेष्टाः सविषं=विषदिग्धं शल्यं=कीलमिव मां दहति=ज्वलयति ।

अत्र पूर्णोपमाऽलङ्कारः । शिखरिणी वृत्तम्—'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(६५) साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे ! प्रणयवान् मृगतृष्णिकायाम् ॥६।१६॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१ ।

प्रसङ्गः—द्रष्टव्यं श्लो०—६४ ।

अन्वयः—हे सखे ! अहं पूर्वं साक्षात् उपगतां प्रियाम् अपहाय चित्रार्पिताम् इमां बहुमन्यमानः पथि निकामजलां स्रोतोवहां अतीत्य मृगतृष्णिकायां प्रणयवान् जातः (अस्मि) ।

व्याख्या—हे सखे !=हे मित्र ! अहं=दुष्यन्तः पूर्वं=पूर्वस्मिन् काले साक्षात्=सदेहाम् स्वयमेव उपगतां=समागतां प्रियां=प्रियतमां शकुन्तलाम् अपहाय=त्यक्त्वा चित्रे=आलेख्ये अर्पितां=लिखिताम् इमां=शकुन्तलां बहुमन्यमानः=अधिकं सम्मानयन् पथि=मार्गे निकामम्=अत्यधिकं जलं यस्याः सा तां स्रोतोवहां=नदीम् अतीत्य=समाक्रान्त्य त्यक्त्वा मृगतृष्णिकायां=मृगमरीचिकायां प्रणयवान्=अभिलाषुकः जातः=प्राप्तोऽस्मि ।

अत्र पूर्वार्द्धस्य दार्ष्टान्तिकवाक्यस्योत्तरार्द्धेन दृष्टान्तवाक्येन बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः—'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(६६) कार्या सैकतहंसलीनमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥६।१७॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१ ।

प्रसङ्गः—अत्र पूर्वं निर्मितकण्वाश्रमस्थशकुन्तलाचित्रो राजा तस्मिन् चित्रे न्यूनतां दर्शं दर्शं पुनस्तं पूर्णरूपेण चित्रितुं कथयति—

अन्वयः—सैकतहंसलीनमिथुना स्रोतोवहा मालिनी कार्या, ताम् अभितः निषण्णचमराः गौरीगुरोः पावनाः पादाः कार्याः शाखालम्बितवल्कलस्य तरोः अधः कृष्णमृगस्य शृङ्गे वामनयनं कण्डूयमानां मृगीं निर्मातुम् इच्छामि ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याख्या—सैकतेषु=बालुकासमूहेषु पुलिनेषु इति लीनं व्यासमुपविष्टं हंसस्य=तन्नामकपक्षिविशेषस्य मिथुनं=युगलं यस्याः सा, स्रोतोवहा=नदी मालिनी=तन्नाम्नी नदी कार्या=लेखनीया चित्रितव्याऽस्ति, ताम्=मालिनी-नदीम् अभितः=उभयपार्श्वतः निषण्णाः=उपविष्टाः चमराः=चमर्यो येषु ते गौरीगुरोः=हिमालयस्य पावनाः=पवित्राः पादाः=प्रान्तभागाः प्रत्यन्त-पर्वताः कार्याः=लेखनीयाः सन्ति, शाखासु=विटपेषु अवलम्बितानि=अव-सक्तानि वल्कलानि=मुनिवस्त्रभूततरुत्वचः यस्मिन् तस्य तरोः=वृक्षस्य अधः=तले कृष्णमृगस्य=मृगविशेषस्य शृङ्गे=विषाणे वामं=दक्षिणेतरं च तत् नयनं=नेत्रं यद्वा वामं=सुन्दरं नयनं कण्डूयमानां=कण्डूतिं कुर्वन्तीं मृगीं=हरिणीं कर्तुं=निर्मातुम् इच्छामि=वाञ्छामि। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

(६७) अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं दशसि चेद् भ्रमर! प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥६।२०॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१।

प्रसङ्गः—अत्र राज्ञा दुष्यन्तेन चित्रिते शकुन्तलायाश्चित्रे एको भ्रमरस्त-न्मुखमनुधावति, कदाचिदधरोष्ठं स्पृशति, कदाचित् कर्णयोः स्वनति। चित्रेऽपि दृष्ट्वा राजा सम्भ्रान्तो जायेत तथा क्रुद्धः सन् कथयति—

अन्वयः—भ्रमर! अक्लिष्टबालतरुपल्लवलोभनीयं रतोत्सवेषु मया सद-यम् एव पीतम्, प्रियायाः बिम्बाधरं दशसि चेत् त्वां कमलोदरबन्धनस्थं कार-यामि।

व्याख्या—हे भ्रमर=द्विरेफ! अक्लिष्टम्=अकठोरं, यत् बालतरोः=बालपादपस्य पल्लवं=किसलयं तद्वत् लोभनीयं=मनोहरम्, रतोत्सवेषु=रतिक्रीडासु मया=दुष्यन्तेन दयया सहितं यथा स्यात्तथा पीतम्=आस्वा-दितम्, प्रियायाः=प्रियतमायाः बिम्बं=बिम्बफलमिव अधरम्=अधरोष्ठं दशसि=दशनैः दंशनं करोषि चेत्=यदि तदा त्वां=भ्रमरं कमलस्य=पद्मस्य उदरे=मध्यभागे बन्धनस्थं=बन्धनयुक्तं कारयामि यद्वा कमलोदर-मेव=बन्धनं कारागृहं तत्रस्थं कारयामि=सम्पादयिष्यामि।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अत्र 'पल्लवलोभनीयं' तथा च 'बिम्बाधरम्' इत्यत्र लुप्तोपमा, 'कमलोदरबन्धनम्' इत्यत्र रूपकं कमलोदरबन्धनस्यारोपात् । भ्रमरे दुष्टनायकस्य व्यवहारसमारोपात् समासोक्तिः इति उपमा-रूपक-समासोक्तीनां सङ्करः । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(६८) अस्मात् परं बत यथाश्रुतिसम्भृतानि
को नः कुले निपवनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुसेकमुदकं पितरः पिबन्ति ॥६।२५॥

सन्दर्भः—द्रष्टव्यं श्लो०—६१ ।

प्रसङ्गः—अत्र पुत्रविहीनो राजा दुष्यन्तः पुत्रार्थं विलापं करोति—

अन्वयः—अस्मात् परं नः कुले कः यथाश्रुतिसम्भृतानि निपवनानि करिष्यति इति बत । नूनं पितरः प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुसेकम् उदकं पिबन्ति ।

व्याख्या—अस्मात्=मत्तः परं=पश्चात् नः=अस्माकं दुष्यन्तस्य कुले कः=को जनः यथाश्रुतिसम्भृतानि=वेदश्रुतिस्मृति-धर्मशास्त्रानुकूलानि निपवनानि=निपवनकार्याणि तर्पणकार्याणि करिष्यति=सम्पादयिष्यति इति बत=खेदे । नूनं=निश्चयमेव पितरः=मम पितरः प्रसूतिः=सन्ततिः तया विकलेन=रहितेन मया=दुष्यन्तेन प्रसिक्तं=दत्तं धौताश्रुसेकम्=प्रवाहिताश्रुसम्मिलितम् उदकं=जलं पिबन्ति=गृह्णन्ति ।

अत्र नूनमित्यस्योत्प्रेक्षावाचकत्वादुत्प्रेक्षाऽलङ्कारः । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

सप्तमोऽङ्कः

(६९) सिद्ध्यन्ति कर्मसु महत्स्वपि यान्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं प्राभविष्यदरुणस्तमसां वधाय
तच्चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥७।४॥

सन्दर्भः—श्लोकोऽयं कविकुलकमलदिवाकरेण, काव्यमानसराजहंसेन,

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संस्कृतसाहित्योदधिपूरणाय जलदायमानेन, अप्रतिमप्रातिभसम्पत्तिभासमानेन कवितावनिताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तल-नाटकस्य सप्तमाङ्कादुद्धृतोऽस्ति ।

प्रसङ्गः—प्रसङ्गेऽस्मिन् देवासुरसङ्ग्रामतो मातलिना सह प्रतिनिवृत्तो राजा सङ्ग्रामविजयार्थं मातलिना प्रशंस्यते । राजा तु स्वदाक्षिण्यं प्रकटयन् तद्देवेन्द्रस्यैव महिमेति प्रतिपादयति—

अन्वयः—नियोज्याः महत्सु अपि कर्मसु यत् सिद्ध्यन्ति तम् ईश्वराणां सम्भावनागुणम् अवेहि (यतो हि) चेत् सहस्रकिरणः धुरि न अकरिष्यत् तत् किम् अरुणः तमसां वधाय प्राभविष्यत् ?

व्याख्या—नियोज्याः=सेवकादयः महत्सु=महनीयेषु कठिनेष्विति भावः अपि कर्मसु=कार्येषु यत् सिद्ध्यन्ति=सिद्धिं प्राप्नुवन्ति तम् ईश्वराणां=प्रभूनां नियोक्तॄणां सम्भावनागुणं=सम्मानं महत्त्वम् अवेहि=जानीहि, यतोहि चेत्=यदि सहस्रकिरणः=सूर्यः धुरि=अग्रे न अकरिष्यत्=क्रियेत् तत् किम् अरुणः=सूर्यसारथिः तमसाम्=अन्धकाराणां वधाय=दूरीकरणाय प्राभविष्यत् =समर्थः स्यात् ? नैव स्यादिति भावः ।।

अत्रोत्तरार्द्धेन दृष्टान्तवाक्येन पूर्वार्द्धस्य बिम्बप्रतिबिम्बभावाद् दृष्टान्तालङ्कारः—'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्' इति लक्षणात् । वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ।।

(७०) शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ।।७।८।।

सन्दर्भः—द्रष्टव्यं श्लो०—६९ ।

प्रसङ्गः—अत्र मातलिरथारूढः स्वर्गात् प्रतिनिवर्तमानो राजा मनुष्यलोक-समीपमागत्य सम्भावति यत् मनुष्यलोकः समागत इति—

अन्वयः—मेदिनी उन्मज्जतां शैलानां शिखरात् अवरोहति इव, पादपाः स्कन्धोदयात् पर्णाभ्यन्तरलीनतां विजहति । आपगाः तनुभागनष्टसलिल-व्यक्त्या सन्धानं व्रजन्ति, पश्य केनापि उत्क्षिपता इव भुवनं मत्पार्श्वम् आनीयते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

व्याख्या—मेदिनी=पृथिवी उन्मज्जताम्=उन्नयतां शैलानां=पर्वतानां शिखरात्=शृङ्गात् अवरोहति=अवतरति नीचैरागति इवेति संभावनायाम्, पादपाः=वृक्षाः स्कन्धानां=शाखानाम् उदयात्=दर्शनात् पर्णानां=पत्राणाम् अभ्यन्तरे=अन्तः लीनतां=गुप्ततां विजहति=त्यजन्ति, पूर्वं पर्णेषु लीनाः सम्प्रति च व्यक्तं प्रतीयन्त इति, आपगाः=नद्यः तनुभागेषु=क्षीणभागेषु नष्टानाम्=अप्रतीयमानां सलिलानां=जलानां सम्प्रति व्यक्त्या=व्यक्तं प्रतीत्या सन्धानं=अविच्छिन्नत्वं व्रजन्ति=प्राप्नुवन्ति, पश्य=अवलोकय केनापि उत्क्षिपता=उपर्युत्थापयता इवेति सम्भावनायाम् भुवनं=भुवस्तलमुत्थाप्येति भावः मम=दुष्यन्तस्य पार्श्वं=समीपम् आनीयते=प्राप्यते।

अत्रोत्प्रेक्षाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

(७१) वल्मीकार्द्धनिमग्नमूर्तिरुरगत्वग्ब्रह्मसूत्रान्तरः
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडितः।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कविम्बं स्थितः ॥७।११॥

सन्दर्भः—द्रष्टव्य श्लो०—६९।

प्रसङ्गः—देवेन्द्रसाहाय्यं कृत्वा मातलिरथमारुह्य स्वर्गात् परावृत्तो राजा यदा मातलिं मारीचस्याश्रमः कस्मिन् प्रदेशे वर्तते इति पृच्छति तदा स हस्तेन दर्शयन् मारीचं तदाश्रमं च वर्णयति—

अन्वयः—वल्मीकार्द्धनिमग्नमूर्तिः उरगत्वग्ब्रह्मसूत्रान्तरः कण्ठे जीर्णलताप्रतानवलयेन अत्यर्थसम्पीडितः, अंसव्यापि शकुन्तनीडनिचितं जटामण्डलं बिभ्रत्, असौ मुनिः स्थाणुः इव अचलः यत्र अभ्यर्कविम्बं स्थितः (सोऽयमाश्रमो दृश्यते)।

व्याख्या—वल्मीकेन=वालूरेण अर्द्धं निमग्ना=आच्छादिता मूर्तिः=स्वरूपं शरीरं यस्य सः, उरगस्य=चक्षुःश्रवसः त्वक्=निर्मोकमेव ब्रह्मसूत्रं=यज्ञोपवीतम् अन्तरे=मध्ये शरीरमध्यभागे यस्य, कण्ठे=ग्रीवायां जीर्णानां=जरठानां लतानां=वल्लीनां प्रतानवलयेन=मण्डलेन अत्यर्थं=समधिकं यथा स्यात्तथा सम्पीडितः=बद्धः अंसं=स्कन्धं व्यापते=अवलम्बते तच्छीलं शकुन्तानां=पक्षिणां नीडैः निचितं=व्याप्तं जटामण्डलं=जटासमूहं बिभ्रत्=धारयन् असौ=दृश्यमानः मुनिः स्थाणु=शाखारहितवृक्ष यद्वा शिवः इव अचलः

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निश्चलः समाधिस्थः यत्र=यस्मिन् देशे अर्कबिम्बस्य=सूर्यमण्डलस्य समीपे स्थितः=वर्तमानः (सोऽयमाश्रमो दृश्यते)।

अत्र स्थाणुना मारीचस्य सादृश्यवर्णनात् पूर्णोपमाऽलङ्कारः। उरगत्वचि ब्रह्मसूत्रस्यारोपाद् रूपकालङ्कारः। रूपकोपमयोः संसृष्टिः। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्॥

(७२) प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यद्वाञ्छन्ति तपोऽभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥७।१२॥

सन्दर्भः—द्रष्टव्यं श्लो०—६९।

प्रसङ्गः—द्रष्टव्यं श्लो०—७१।

अन्वयः—सत्कल्पवृक्षे वने प्राणानाम् अनिलेन वृत्तिः उचिता, काञ्चनपद्मरेणुकपिशे तोये पुण्याभिषेकक्रिया, रत्नशिलागृहेषु ध्यानम्, विबुधस्त्रीसन्निधौ संयमः, अन्यमुनयः, तपोभिः यद् वाञ्छन्ति तस्मिन् अमी तपस्यन्ति।

व्याख्या—सन्तः=विद्यमानाः कल्पवृक्षाः=कामतरवः यस्मिन् तस्मिन् वने=अरण्ये तपोवने इति, प्राणानामनिलेन=प्राणायामवायुना प्राणायामक्रिययेति भावः वृत्तिः=जीविका उचिता=सम्पादिता अङ्गीकृतेति, काञ्चनानां=सुवर्णानां पद्मानां=कमलानां रेणुभिः=परागैः कपिशे=कपिशवर्णात्मके तोये=जले पुण्या=पवित्रा अभिषेकस्य=स्नानस्य क्रिया स्नानादिकं सम्पाद्यत इति, रत्नानां=इन्द्रनीलादीनां मणीनां या शिला=प्रस्तरखण्डः स एव गृहं तेषु मणिमयगृहेषु ध्यानं=समाधिः विबुधाः=देवास्तेषां याः स्त्रियः नायिकाः तासां सन्निधौ=समीपे संयमः=इन्द्रियनिग्रहः, अन्ये=अपरे च ते मुनयः=ऋषयः तपोभिः=तपस्तप्त्वा यद् वाञ्छन्ति=प्राप्तुमिच्छन्ति तस्मिन् =स्थाने अमी=मारीचादयो मुनय तपस्यन्ति=तपस्यां कुर्वन्ति।

अत्र तत्तत्कारणसत्त्वेऽपि तत्तत्कार्याभावाद् विशेषोक्तिः—'सति हेतौ फलाभावे विशेषोक्तिः' इति लक्षणात्। चतुर्थपादं पूर्वपादत्रयस्य हेतुत्वात् काव्यलिङ्गम्। अन्यमुन्यपेक्षया तत्रस्थानां मुनीनामाधिक्यवर्णनाद् व्यतिरेकः—'आधिक्यमुपमेय उपमानान्न्यूनताऽथवा व्यतिरेकः' इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(७३) सुतनु ! हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥७।२४॥

सन्दर्भः—द्रष्टव्यं श्लो०—६९ ।

प्रसङ्गः—मारीचस्याश्रमे शकुन्तलां प्राप्य राजा दुष्यन्तस्तत्पादयोः पतन् पूर्वकृतकार्यार्थं क्षमायाचनां करोति—

अन्वयः—सुतनु ! हृदयात् प्रत्यादेशव्यलीकम् अपैतु, (हि) तदा मे मनसः सम्मोहः किमपि बलवान् अभूत्, शुभेषु प्रबलतमसाम् एवम्प्रायाः वृत्तयः (भवन्ति) हि अन्धः शिरसि क्षिप्तां स्रजम् अपि अहिशङ्कया धुनोति ॥

व्याख्या—सु=शोभना तनुः=शरीरं यस्याः सा तत्सम्बुद्धौ, ते=तव हृदयात्=मनसः प्रत्यादेशस्य=त्यागस्य व्यलीकं=क्रोधः अपैतु=दूरीभवतु यतो हि तदा=तस्मिन् काले मे=मम मनसः=हृदयस्य सम्मोहः=अज्ञानं किमपि=विलक्षणं यथा स्यात्तथा बलवान्=प्रबलः अभूत्=जातः । शुभेषु =कल्याणेषु प्रबलम्=उत्कृष्टं तमः=तमोगुणो येषां तेषां एवम्प्रायाः= एवम्प्रकारकाः वृत्तयः=व्यवहाराः भवन्ति । हि=यतः अन्धः=दृष्टिविहीनो जनः शिरसि=मस्तके क्षिप्तां=पतितां स्रजं=पुष्पमालामपि अहिशङ्कया= सर्पभ्रमेण धुनोति=क्षिपति ।

अत्र सामान्येन चतुर्थपादेन विशेषस्य पादत्रयस्य समर्थनादर्थान्तरन्यासः । हरिणी वृत्तम् ॥

(७४) मोहान्मया सुतनु ! पूर्वमुपेक्षितस्ते
यो वाष्पबिन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते ! प्रमृज्य विगतानुशयो भवामि ॥७।२५॥

सन्दर्भः—द्रष्टव्यं श्लो० ६९ ।

प्रसङ्गः—द्रष्टव्यं श्लो० ७३ ।

अन्वयः—हे सुतनु ! मया मोहात् पूर्वं ते अधरं परिबाधमानः यः बाष्पबिन्दुः उपेक्षितः अद्य हे कान्ते ! तावत् आकुटिलपक्ष्मविलग्नं तं प्रमृज्य विगतानुशयः भवामि ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust. Funding IKS-MoE Grant-2

व्याख्या—हे सुतनु=शोभनाङ्गे ! मया=दुष्यन्तेन मोहात्=अज्ञानात् पूर्वं=प्रथमं ते=तव अधरम्=अधरोष्ठं परिबाधमानः=आच्छाद्यमानः यः बाष्पबिन्दुः=अश्रुकणः उपेक्षितः=एवमेव त्यक्तः हे कान्ते=प्रिये ! अद्य=सम्प्रति तावत् आकुटिलौ=कुञ्चितौ यौ पक्ष्मौ तयोः विलग्नम् तं=बाष्पप्रकरं प्रमृज्य=सम्मार्ज्य पादपतनादिनेति विगतानुशयः=दूरीकृततापः भवामि। वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(७५) पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्त्ता।
चापेन यस्य विनिवर्त्तितकर्म जातं
तत् कोटिमत्कुलिशमाभरणं मघोनः ॥७।२६॥

सन्दर्भः—द्रष्टव्यं श्लो० ६९।

प्रसङ्गः—अत्र प्राप्तपुत्रपत्नीको राजा यदा आशीर्वादं ग्रहीतुं महर्षेः मारीचस्य पार्श्वमुपगतस्तदा स्वपत्नीं दाक्षायणीं प्रति राज्ञः परिचयमुपस्थापयन् मारीचः कथयति—

अन्वयः—अयं ते पुत्रस्य रणशिरसि अग्रयायी दुष्यन्त इति अभिहितः भुवनस्य भर्ता, यस्य चापेन विनिवर्तितकर्मजातं मघोनः तत् कोटिमत् कुलिशम् आभरणम् अस्ति।

व्याख्या—अयं=पुरतो दृश्यमानः ते=तव पुत्रस्य=इन्द्रस्य रणशिरसि =प्रमुखे रणे अग्रयायी=अग्रे गच्छति तच्छीलः दुष्यन्त इति नाम्ना अभिहितः= प्रथितः भुवनस्य=लोकस्य भर्ता=स्वामी, यस्य चापेन=धनुषा विनिवर्तितं= सम्पादितं कर्मजातं=सकलं कार्यं यस्य तत् मघोनः=इन्द्रस्य तत्=प्रसिद्धं कोटिमत्=कोटिद्वययुक्तं कुलिशं=वज्रम् आभरणम्=अलङ्कारमात्रमस्ति। वसन्ततिलका वृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

(७६) उदेति पूर्वं कुसुमं ततः फलं
घनोदयं प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥७।३०॥

सन्दर्भः—द्रष्टव्यं श्लो० ६९।

प्रसङ्गः—यदा भगवान् मारीचः शकुन्तलया भरतेन च सहितं राजानं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

दुष्यन्तं दर्शयामास, मारीचो दुष्यन्तं स्त्रीपुत्रलाभं च निर्दिशति तदा राजा पुत्र लाभः पश्चाद् भवतां दर्शनमिति कथयति—

अन्वयः—पूर्वं कुसुमम् उदेति ततः फलम्, प्राक् घनोदयं तदनन्तरं पयः निमित्तनैमित्तिकयोः अयं क्रमः तु तव प्रसादस्य सम्पदः पुरः एव।

व्याख्या—पूर्वं=प्रथमं कुसुमं=पुष्पम् उदेति=विकसति ततः तदनन्तरं= फलं भवति, प्राक्=पूर्वं घनोदयं=मेघोत्पत्तिः तदनन्तरं=तत्पश्चात् पयः= जलवर्षणम्, निमित्तं=कारणं नैमित्तिकं=कार्यं तयोः कार्यकारणयोः अयमेव प्रसिद्धः क्रमोऽस्ति तु=किन्तु तव=भवतां प्रसादस्य=कृपायाः सम्पदः= सम्पत्तयः पुरः=पूर्वमेव प्राप्ताः इति।

अत्र काव्यलिङ्गातिशयोक्त्यप्रस्तुतप्रशंसादृष्टान्तानामलङ्काराणां सङ्करः। वंशस्थ वृत्तम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात्॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूक्तिव्याख्याभागः

१—'बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।' १।२।।

प्रसङ्गः—श्लोकांशोऽयं कविताविलासेन महाकविना कालिदासेन विरचितस्य, संस्कृतसाहित्यललामभूतस्य, देशेषु विदेशेषु च ख्यातख्यातस्य अभिज्ञानशाकुन्तलनाटकस्य प्रथमाङ्कस्य प्रस्तावनाभागतो गृहीतोऽस्ति।

अत्र कविः सूत्रधारमुखेनेदं प्रतिपादयति यत् विदुषामापरितोषात् प्रयोगविज्ञानं साधु न मन्यते, यतो हि शिक्षितानां बलवदपि चेतः आत्मनि नैव विश्वसिति—

व्याख्या—शिक्षितानां=विदुषां बलवत्=दृढम्, इदमुचितमिदमनुचितमिति विवेकशीलमपि चेतः=मनः आत्मनि=स्वस्मिन् न=नास्ति प्रत्ययः=विश्वासो यस्मिन् तत् अविश्वसनीयं भवति। विज्ञैरपि आत्मनि तावद् विश्वासो नैव क्रियते यावद् विदुषां परितोषो न स्यात्।

२—'भवितव्यानां द्वाराणि भवन्ति सर्वत्र।' १।१६।।

प्रसङ्गः—श्लोकांशोऽयं कविताविलासेन महाकविना कालिदासेन विरचितस्य अभिज्ञानशाकुन्तलनाटकस्य प्रथमाङ्काद् गृहीतोऽस्ति।

अत्र सशरचापहस्तो रथारूढो राजा दुष्यन्तो मृगमनुसरन् महर्षेः कण्वस्याश्रमसमीपमागतः वैखानसेन प्रार्थितः सन् विनीतवेषेण यदाऽऽतिथ्यग्रहणायाश्रमं प्रविशति तदा निमित्तं सूचयन् कथयति—इदमाश्रमपदं स्त्रीरहितमस्ति, मम च दक्षिणो बाहुः स्फुरति। बाहुस्फुरणस्य स्त्रीलाभरूपं फलमत्र कुतः स्यादिति पुनश्च पक्षान्तरं विचार्य कथयति—अवश्यं भावीनां कार्याणां सर्वत्र द्वाराणि भवन्तीति—

व्याख्या—भवितव्यानाम्=अवश्यंभाविनां कार्याणां सर्वत्र=सर्वस्मिन्नेव स्थाने उचितेऽनुचिते वा स्थाने द्वाराणि=कार्यसाधनोपायाः भवन्ति=जायन्ते।

एवञ्च यदि मम स्त्रीप्राप्तिः अवश्यंभाविनी स्यात्तदा कुतोऽपि कुत्रापि स्यादिति शान्तेऽस्मिन्नाश्रमेऽपि नासम्भाविनीति नाश्चर्यम्।

३—'किमिव हि मधुराणां मण्डनं नाकृतीनाम्।' १।२०।।

प्रसङ्गः—श्लोकांशोऽयं कवितावनिताहारायमानेन सर्वथा प्रसिद्धेन रस-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सिद्धेन कवीश्वरेण, संस्कृतसाहित्यमहोदधिपूरणाय जलदायमानेन काव्यकला-निपुणेन महाकविना कालिदासेन विरचितस्य, संस्कृतसाहित्यललामभूतस्य, निखिलनाट्यतत्त्वपूतस्य 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति ख्यातस्य सर्वथा नवनवस्य अभिज्ञानशाकुन्तलनामधेयस्य नाटकस्य प्रथमा-ङ्कादुद्धतोऽस्ति ।

अत्र धृतवल्कलां शकुन्तलां दर्शं दर्शं राजा पूर्वं तु शकुन्तलाशरीरे वल्कलं निन्दति पुनश्च चिन्तयति यद् वल्केनापि अस्याः शरीरस्य सौन्दर्यमपचीयते न तु हीयते इति—

व्याख्या—हि=यतः मधुराणां=दर्शनीयानां 'मधुरः प्रियदर्शनः' इति दशरूपकवचनात्, सुन्दराणामिति यावत् आकृतीनां=स्वरूपाणां किम्=किं वस्तु इवेति सम्भावनायाम्, मण्डनम्=अलङ्करणं सौन्दर्योत्कर्षकं न=नहि भवतीति । अर्थात् मधुराणामाकृतीनां कृते सर्वमपि मण्डनं जायत इति ।

अतः मधुरायाः शकुन्तलायाः वल्कलेनापि शोभा जायत एवेति ।

४—'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।' १।२२॥

प्रसङ्गः—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्याभिज्ञानशाकु-न्तलस्य सर्वथा नवनवस्य नाटकस्य प्रथमाङ्कादुधृतोऽस्ति ।

अत्र कण्वाश्रमललामभूताम्, अतिशयकमनीयतमाम्, स्त्रीरत्नसृष्टित्वेन प्रथितां शकुन्तलां दर्शं दर्शं तद्रूपसम्पत्यनुरक्तमनाः राजा दुष्यन्तः 'इयं मद्-विवाहयोग्याऽस्ति न वा' इति चिन्तयन् 'निश्चितमेवेयं मद्विवाहयोग्येति' निर्धारयन् तत्र स्वकीयमन्तःकरणमेव प्रमाणत्वेनाङ्गीकरोति—

व्याख्या—हि=यतः सन्देहपदेषु=संशयास्पदेषु वस्तुषु=विषयेषु सतां =सज्जनानाम्, अन्तःकरणस्य=मनसः प्रवृत्तयः=प्रवर्त्तनानि प्रमाणं=निर्णय-हेतवो भवतीति ।

एवञ्चान्तःकरणस्य प्रवृत्तिं प्रमाणत्वेनावधारयन् दाढर्येन कथयितुं शक्नोमि यत् अस्यामार्यं मम मनोऽभिलाष्यस्तीति क्षत्रपरिग्रहक्षमेयमिति ।

५—'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' ।१।२५॥

प्रसङ्गः—श्लोकांशोऽयं कविमण्डलमण्डनायमानेन, कविताविलासेन, महा-कविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य प्रथमाङ्कादुद्धतोऽस्ति ।

अत्र शकुन्तला कण्वस्य ब्राह्मण्यामुत्पन्ना पुत्री यद्वा असवर्णक्षेत्रसम्भवेति

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2

चिन्तनपरायणो राजा दुष्यन्तः सखीमुखात् अप्सरःसम्भवैषेति श्रावं श्रावं हर्ष-प्रकर्षमनुभवन् कथयति—

व्याख्या—प्रभया=त्विषा तरलं=भास्वरं यद्वा प्रभा=कान्तिः तरला=चञ्चला यस्य तत् ज्योतिः=प्रकाशो विद्युदित्यर्थः वसुधातलात्=भूतलात् न उदेति=उदयं न लभत इति ।

यथा विद्युज्ज्योतिः भूतलान्नैव सम्भवति तथैव शकुन्तलाया अप्युत्पत्तिः मानुष्या न सम्भवेति निष्कर्षः ।

६—'कामः स्वतां पश्यति' ।। २।२।।

प्रसङ्गः—श्लोकांशोऽयं कवितावनिताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलनामधेयस्य नाटकस्य द्वितीयाङ्काद् गृहीतोऽस्ति ।

अत्र राजा दुष्यन्तः शकुन्तलायां सर्वथा साभिलाषः सन् एकतस्तस्याः दुर्लभत्वम्, अपरतश्च तद्भावदर्शनेनाश्वासनत्वं प्रतिपादयन् स्वात्मन्येवापहसति, यत् तया यथा तथा किमप्याचेष्टितं मया तु सर्वं मत्परायणं मन्यत इति मम मनसि वर्तमानस्य कामस्य विलास इति ।

व्याख्या—कामः=मदनावेशोऽभिलाष इति स्वताम्=आत्मीयताम् अन्य-विषयकाणामपि भावानां स्वविषयकतामित्यर्थः पश्यति=जानाति सम्भाव-यतीति ।

अत्र शकुन्तलया न जाने कथं तत्तदाचेष्टितं किन्तु सर्वं तत् मयाऽऽत्मविष-यत्वेन गृहीतमित्याश्चर्यंकरमस्तीति भावः ।

७—मिथ्या हि व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ।' २।५।।

प्रसङ्गः—श्लोकांशोऽयं रससिद्धकवीश्वरेण कवितावनिताविलासेन महा-कविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य द्वितीयाङ्काद् गृहीतोऽस्ति ।

अत्र मृगयानिन्दकेन, मृगयाव्यापारादेकस्यापि दिवसस्यावकाशं प्रार्थयता, विदूषकेन कृतं नाटकं प्रदर्शितं च रोषं दृष्ट्वा राजा सेनापतिमाहूय यदा 'निरु-त्साहितोऽस्मि मृगयापवादिना माधव्येन' इति कथयति तदा सेनापतिः मृगया-गुणगणानां प्रतिपादयन् राजानं कथयति—

व्याख्या—मिथ्या हि=मुधैव मृगयां=आखेटकम् व्यसनं=दोषोत्पादकं वदन्ति=कथयन्ति मृगयापवादिनो मन्वादयो धर्मशास्त्रकाराः । ईदृक्=मृगया-सदृशः विनोदः=प्रमोदः दुःखदूरीकरणोपायः कुतः=कुत्र किं कथं वाऽस्तीति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri Trust. Funding IKS-MoE-Gran

नैव कुतोऽपीति भावः। अतो मृगयायां दोषो नास्ति, मृगयापवादिनो माधव्यस्योक्तौ सत्यता नास्तीति न तदादरणीयमिति।

८—'लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत्।' ३।११॥

प्रसङ्गः—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलनाटकस्य तृतीयाङ्कादुद्धृतोऽस्ति।

अत्र राजर्षिरेव तापस्य कारणमिति शकुन्तलायाः निदानं कृत्वा कामपत्रलेखाय सा सखीभ्यां समादिष्टा। तयाऽवधारणायां चिन्तितायां राजा कथयति।

व्याख्या—प्रार्थयिता=प्रार्थी लक्ष्म्यभिलाषी श्रियं=लक्ष्मीं लभेत=प्राप्नुयात् न वा प्राप्नुयात्, किन्तु श्रिया=लक्ष्म्या ईप्सितः=आप्तुमिष्टः श्रिया दुरापः=दुर्लभः कथं भवेत्=स्यात् नैव भवेदिति भावः।

कृतप्रयासो जनो लक्ष्मीं प्राप्नोति, न चापि प्राप्नोति किन्तु यदि श्रीरेव कश्चिज्जनं वाञ्छति तदा स जनः तस्यै दुष्प्राप्यो नैव भवतीति निश्चितम्। तथैव दुष्यन्तेन प्रार्थिता शकुन्तला लभेदपि न च लभेत किन्तु शकुन्तलया प्रार्थितः स तस्यै दुरापो नास्तीति भावः।

९—ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः।' ३।१४॥

प्रसङ्गः—श्लोकांशोऽयं रससिद्धेन, काव्यकलापारङ्गतेन, कविताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलनाटकस्य तृतीयाङ्कादुद्धृतोऽस्ति।

अत्र राजानं दुष्यन्तं मनसा कामयन्ती शकुन्तला यदा पूर्णरूपेणास्वस्था सञ्जाता तदा सखीभ्यां पृष्टाऽऽत्मनो मनोगतमाधिहेतुमुक्तवती। राजा एवास्यास्तापहेतुरिति ज्ञात्वा कामपत्रलेखनाय सखीभ्यां परामृष्टा शकुन्तला यदा 'तव न जाने हृदयम्' इत्यादि पत्रं लिखित्वा सख्यौ श्रावयति तदा तच्छ्रावं राजा कथयति—

व्याख्या—हि=यतः दिवसः=सूर्यः यथा=यावन्मात्रं शशाङ्कं=चन्द्रमसं ग्लपयति=ग्लानिं नयति पीडयतीति न तथा=तावन्मात्रं कुमुद्वतीं=कुमुदिनीं ग्लपयतीति।

समागते दिवसे कुमुद्वती सङ्कोचमाप्नोति नीरसताञ्चाधिगच्छति किन्तु तस्याः सत्ता तु भवत्येव सर्वथा तद्विनाशो न जायते किन्तु शशाङ्कस्तु सर्वथा

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgab

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विनष्टो भवति, आकाशे किञ्चिन्मात्रमपि तच्छोभा न जायत इति। एवमेव मदनेन यथा मम मनसि समधिकस्ताप उत्पाद्यते न तथा तवेति दुष्यन्तस्याभिप्रायः।

१०—'चक्रवाकवधु! आमन्त्रयस्व सहचरम्, ननु उपस्थिता रजनी।' —अ० ३

प्रसङ्गः—गद्यखण्डोऽयं कविताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य तृतीयाङ्काद् गृहीतोऽस्ति।

अत्र एकान्ते लतागृहे प्रेमालापं कुर्वतोः शकुन्तलादुष्यन्तयोः, शकुन्तलाया अस्वास्थ्यं श्रुत्वा तज्ज्ञानार्थं तत्र समागच्छन्तीं गौतमीं सूचयन्त्योः शकुन्तलासख्योरुक्तिरियमस्ति—

व्याख्या—चक्रवाकः=पक्षिविशेषस्तस्य वधूः=पत्नी चक्रवाकी तत्सम्बुद्धौ हे चक्रवाकि! सह=साधं सर्वदा चरतीति सहचरः=आत्मनः प्रियम् आमन्त्रयस्व=अन्येद्युरागमनार्थमामन्त्रणं क्रियताम्, अद्य च सहवासेन विरता भवतु, यतो हि ननु=निश्चयेनैव रजनी=रात्रिः उपस्थिता=समागतेति।

अत्र यथा दिने चक्रवाकी सहचरेण चक्रवाकेन सह विचरति विहरति किन्तु समागतायां रजन्यां तद्वियुक्ता भवति तथैव स्वप्रिये समधिकप्रेमशालिनी त्वं प्रियेण सह विहारं कृत्वा सम्प्रति तं परित्यज तस्मात् वियुक्ता भव यतो हि युवयोः वियोगकारिणी गौतमी समागच्छतीति।

११—'कोऽन्यो हुतवहात् प्रभवति दग्धुम्।' —अ० ४

प्रसङ्गः—गद्यखण्डोऽयमस्माकं पाठ्यपुस्तकस्य महाकविना कालिदासेन विरचितस्य अभिज्ञानशाकुन्तस्य चतुर्थाङ्काद् गृहीतोऽस्ति।

अत्र शकुन्तलां शप्त्वा त्वरिपादेनाभिगच्छन्तं दुर्वाससमवलोक्य तं ज्ञात्वा च प्रियंवदाऽनसूयां कथयति—

व्याख्या—हुतवहात्=अनलात् अन्यः=भिन्नः कः=कोऽस्ति यः दग्धुं=ज्वलयितुं प्रभवति=समर्थो भवति, न कोऽपीति भावः।

यथाऽग्निरेव दग्धुं समर्थो भवति तथैव दुर्वासा एव तथा शकुन्तलां शप्त्वा गच्छति, तदतिरिक्तः कोऽप्येवं शप्तुं न प्रभवतीति।

१२—'कस्तावदुष्णोदकेन नवमालिकां सिञ्चति?' —अ० ४

प्रसङ्गः—गद्यखण्डोऽयं कविमण्डलमण्डनायमानेन, अप्रतिमप्रातिभसम्पत्ति-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

भासमानेन, कविताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञान-शाकुन्तलस्य तुरीयाङ्काद् गृहीतोऽस्ति ।

अत्र दुर्वाससा शप्तायां शकुन्तलायां यदाऽनसूया 'द्वयोरेवावयोर्हृदये एष वृत्तान्तस्तिष्ठतु । रक्षणीया खलु प्रकृतिपेलवा प्रियसखी' इति प्रियम्वदां मन्त्रयति तदा प्रियंवदा कथयति—

व्याख्या—कः=को जनः तावदिति वाक्यपूर्त्तये उष्णोदकेन=तप्तवारिणा नवमालिकां=तदाख्यां लतां सिञ्चति=सेचनं करोति ? न कोऽपीति भावः।

यथा उष्णोदकेन नवमालिकायाः सिञ्चनमनुचितं तथैवानेन शापवृत्तान्तेन प्रकृतिकोमलायाः शकुन्तलायाः हृदयं दुःखयितुं नोचितमिति ।

१३—पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ।' ४।५॥

प्रसङ्गः—श्लोकांशोऽयं कविताविलासेन रससिद्धेन कवीश्वरेण महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्काद् गृहीतोऽस्ति ।

अत्र शकुन्तलाऽद्य पतिगृहं यास्यतीति ध्यायं ध्यायं महर्षिः कण्वः वनौकसोऽपि समधिकं पीडितो जायते, उत्कण्ठया तद्धृदयं स्पृष्टं भवति, कण्ठः कुलुषो जायते, दर्शनं च चिन्ताजडमिति । एवं यदि तस्येयमवस्थाऽस्ति तर्हि का कथा गृहस्थानामिति कथयति महर्षिः कण्वः ।

व्याख्या—गृहिणः=गृहस्थाश्रमवासिनो जनाः नवैः=नूतनैः पूर्वमननुभूतैरिति यावत् तनयायाः=पुत्र्याः विश्लेषः=वियोगस्तस्य दुःखैः=कष्टैः कथं=किमिति न=नहि पीड्यन्ते=दुःखिताः भवेयुरिति । अवश्यमेव तैः दुःखितैर्भवितव्यमिति ।

१४—'वत्से ! दिष्ट्या धूमोपरुद्धदृष्टेऽपि यजमानस्य
पावकस्यैव मुखे आहुतिर्निपतिता ।' —अ० ४

प्रसङ्गः—गद्यखण्डोऽयमस्माकं पाठ्यपुस्तकस्य, कविता विलासेन महाकविना कालिदासेन विरचितस्य संस्कृतसाहित्यललामभूतस्य अभिज्ञानशाकुन्तलस्य चतुर्थाङ्काद् गृहीतोऽस्ति ।

प्रसङ्गेऽस्मिन् आकाशवाचा शकुन्तला गान्धर्वेण विवाहविधिना नहि केवलं विवाहितैवास्ति, अपि तु दुष्यन्तेनाहितं तेजोऽपि भुवो भूतये धारयतीति ज्ञात्वा महर्षिः कण्वः शकुन्तलां कथयति—

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याख्या—वत्से=पुत्रि ! दिष्टया=सौभाग्येन धूमेन=आज्यधूमेन उपरुद्धा=व्याहता दृष्टिः=दर्शनक्रिया यस्य तस्यापि यजमानस्य=यज्ञकर्तुः पावकस्य=अग्नेः मुखे=मुखभागे एव आहुतिः=हव्यसामग्रीः निपतिता।

यथा धूमोपरुद्धदृष्टेरपि यजमानस्याहुतिः कदाचित्सौभाग्येन पावकमुखे निपतति तथैव अज्ञातदुष्यन्तयाऽपि त्वया उचितस्य योग्यस्यैव वरस्य वरणं कृतमिति।

१५—'भाग्याधीनमतःपरं न खलु तत्स्त्रीबन्धुभिर्याच्यते।' ४।१६॥

प्रसङ्गः—श्लोकांशोऽयं पृथिव्याः हारायमाणेन काव्यकलापारङ्गतेन कवितावनिताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य चतुर्थाङ्काद् गृहीतोऽस्ति।

अत्र स्वद्वितीयोच्छ्वासभूतां पुत्रीं शकुन्तलां पतिगृहं प्रेषयन् दुष्यन्तायोपदिशन् दारेषु सामान्यरूपेण शकुन्तलां द्रष्टुं कथयति। यतो हि अतः परं वधूबन्धुभिर्वाच्यं न भवति, देवीपदं तु भाग्याधीनमिति—

व्याख्या—अतः=दारेषु सामान्यप्रतिपत्तिपूर्वकदर्शनात् परम्=अतिरिक्तमधिकं देवीपदप्रदानादिकं तु भाग्यस्य=दैवस्य अधीनम्=आयत्तं भवति, तत्=देवीपदं तु स्त्रीबन्धुभिः=कन्यापित्रादिभिः न खलु याच्यते=प्रार्थ्यते।

१६—यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।' ४।१७॥

प्रसङ्गः—श्लोकांशोऽयं कविताविलासेन महाकविना कालिदासेन विरचितस्य, निखिलनाट्यतत्त्वपूतस्य, अभिज्ञानशाकुन्तलस्य चतुर्थाङ्काद् गृहीतोऽस्ति।

अत्र शकुन्तलायाः परिगृहगमनस्य शुभवेलायां महर्षिकण्वः स्वपुत्रीं शकुन्तलामुपदिशति—

व्याख्या—एवं=गुरुजनशुश्रूषादिभिः युवतयः=अनुभवहीना अपि नार्यः गृहिणीपदं=देवीपदं यान्ति=प्राप्नुवन्ति वामाः=एतद्विपरीताः गुरुजनशुश्रूषाविमुखाः, भोगपरायणाः, परिजनेषु क्रूरास्तु कुलस्य आधयः=व्याधय एव भवन्ति।

अतस्त्वया मयोपदिष्टेन मार्गेण समाचरणीयमिति।

१७—'अर्थो हि कन्या परकीय एव।' ४।२९॥

प्रसङ्गः—श्लोकांशोऽयं 'काव्येषु माघः कविकालिदासः' इति सूक्त्या कविमण्डलमण्डनायमानेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य तुरीयाङ्काद् गृहीतोऽस्ति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अत्र शकुन्तलां पतिगृहं प्रेषयित्वा विशदान्तरात्मा महर्षिः कण्वः कथयति यद् कन्याधनं पदकीयमेवाऽस्ति यथा न्यासः परकीयो भवति। न्यासप्रत्यर्पणे यथा शान्तिर्जायते तथैव कन्यायाः पतिगृहप्रेषणेनापि सुखमेव जायते—

व्याख्या—हि=यतः कन्या=पुत्री तु परकीयः=परस्यैव अर्थः=धनं भवति। कन्याधनं परस्यैव कृते भवति इति।

१८—'अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः।' ५।१७॥

प्रसङ्गः—श्लोकार्धोऽयं कविताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य पञ्चमाङ्काद्गृहीतोऽस्ति।

प्रसङ्गोऽयं तत्समयस्यास्ति यदा महर्षिणः कण्वस्यादेशानुसारं शकुन्तलामादाय शिष्यौ राज्ञो दुष्यन्तस्य राजसभामुपस्थितौ जातौ। यदा कण्वसन्देशं गौतमी श्रावयति यत् इयं च त्वं च रहसि परिणीतौ स्तः। तदा राजा तत्राश्चर्यं प्रकटयति। तद्दृष्ट्वा शार्ङ्गरवो राजानमाक्षिपन् कथयति—'किं नाम किमिदमुपन्यस्तमिति ? ननु भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः—केवलं पितृकुले वर्तमाना सत्यपि वचनतामधिगच्छति। अतः प्रियाऽप्रिया वा प्रमदा बन्धुभिः भर्तुः समीपे इष्यते—

व्याख्या—अतः=अस्मात् कारणात् ज्ञातिकुलैकसंश्रया भर्तृमती सती अपि वचनीयतामधिगच्छतीति हेतोः स्वबन्धुभिः=स्वकुटुम्बिभिः मातृपित्रादिभिः प्रिया=मनोहारिणी अप्रिया=अमनोहारिणी वा प्रमदा=युवतिः परिणेतुः=भर्तुः समीपे=पार्श्वे इष्यते=वाञ्छयते।

१९—'मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तानाम्।' ५।१८॥

प्रसङ्गः—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य पञ्चमाङ्काद् गृहीतोऽस्ति।

यदा राजा दुष्यन्तः शकुन्तलाज्ञानमन्थरो जायते, आत्मनः पत्नीत्वेन तां न स्वीकरोति। अतः शार्ङ्गरवस्तस्य धर्मविमुखतां प्रतिपादयन् कथयति—

व्याख्या—ऐश्वर्येण=धनेन मत्तानां=गर्वितानां जनानां प्रायेण=सामान्येन बाहुल्येनेति भावः अमी=कृतकार्यद्वेषादिरूपाः विकाराः=स्वभावपरिवृत्तयः मूर्च्छन्ति=उच्छ्रयन्ति वर्द्धन्त इति भावः।

भवन्तो राजानः सन्ति। ऐश्वर्यमत्तैरेव भवद्भिरियं न परिज्ञायत इति।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२०—अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥५।२४॥

प्रसङ्गः—द्रष्टव्यं सूक्ति—१९ ।

व्याख्या—अतः=अस्मात् कारणात् अविचारितस्य प्रेम्णस्तापानुकारित्वात् विशेषात्=विशेषतः पूर्वरूपेण परीक्ष्य=कुलशीलादिविचार्य रहः=एकान्ते सङ्गतं=प्रेमसम्बन्धः कर्त्तव्यं=विधातव्यम् । अज्ञातः=न परीक्षितः हृदयं=मनो येषां ते तेषु सौहृदं=प्रणयः एवं=उपस्थितरूपेण वैरीभवति=शत्रुतां याति ।

२१—'उपयन्तुर्हि दारेषु प्रभुता सर्वतोमुखी ।' ५।२७॥

प्रसङ्गः—श्लोकांशोऽयं कवितावनिताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलनाटकस्य पञ्चमाङ्काद् गृहीतोऽस्ति ।

प्रसङ्गोऽयं तत्समयस्यास्ति यदा राजा दुष्यन्तो दुर्वाससः शापवशात् शकुन्तलापरिज्ञानमन्थरो जायते, तां पत्नीत्वेन नैव जानाति, तां परित्यजति तदा कण्वशिष्यः शाङ्र्गरवः राजानं कथयति यदियं भवतः पत्न्यस्ति अस्यां भवतः सर्वतोभावेन प्रभुताऽस्ति । यथा भवते रोचते तथा कुरु, एनां त्यज वा गृहाण वा ।

व्याख्या—हि=यतः दारेषु=स्त्रीषु उपयन्तुः=परिणेतुः सर्वतोमुखी=सर्वतो भावेन प्रभुता=स्वामित्वमधिकार इति ।

स्त्रीषु परिणेतुः सर्वतोमुखी प्रभुता भवति । भवानस्याः परिणेता अतोऽनया सह स्वेच्छानुसारं यथा भवान् वाञ्छति तथा व्यवहारः करोतु, एनां त्यज वा गृहाण वा ।

२२—'वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ।' ५।२८॥

प्रसङ्गः—श्लोकांशोऽयं कविकुलकमलदिवाकरेण महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य पञ्चमाङ्काद् गृहीतोऽस्ति ।

अत्र कण्वशिष्यैः गौतम्या च बहुशः कथितोऽपि राजा दुष्यन्तः शकुन्तलां ज्ञातुं ज्ञानमन्थर एवास्ति पुनः पुनश्चिन्तयन्नपि नैव जानाति तदा तान् प्रति कथयति—भोस्तपस्विन् ! किमत्रभवतीं विप्रलभसे । यथा शशाङ्कः कुमुदानि तथा सविता पङ्कजान्येव बोधयति तथा वशिनां वृत्तिः परपरिग्रहसंश्लेषपराङ्मुखी एव भवति—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

व्याख्या—हि=यतः वशिनां=जितेन्द्रियाणां वृत्तिः=मनोवृत्तिः परपरिग्रहस्य=अन्येषां वस्तुनः अन्यकलत्रस्य च संश्लेषः=सम्पर्कस्तस्मिन् पराङ्मुखी=विपरीता भवति।

वशिनोऽन्यस्त्रीसंश्लेषं नैव कुर्वन्ति। अतोऽहमपि शकुन्तलायाः अन्यकलत्रस्य संस्पर्शं नैव करिष्यामीति।

२३—(क) 'न कदापि सत्पुरुषाः शोकचित्ता भवन्ति।' —अ० ६

(ख) 'ननु प्रवातेऽपि निष्कम्पा एव गिरयः।' —अ० ६

प्रसङ्गः—गद्यखण्डमिदमस्माकं पाठ्यपुस्तकस्य कवितावनिताविलासेन महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य षष्ठाङ्कात्परिगृहीतोऽस्ति।

अत्र पूर्वं तूपस्थिता शकुन्तला शापवशाद् विस्मृता नैव स्वीकृतेति पश्चात् प्राप्तेऽङ्गुरीयके शापे शिथिले सति राजा तद्वियोगं स्मारं स्मारं दुःखितो जायते तदा विदूषकस्तं सान्त्वयन् कथयति—

व्याख्या—(क) सत्पुरुषाः=श्रेष्ठजनाः कदापि=कदाचिदपि शोकः=कष्टं चित्ते मनसि येषां ते एवं शोकपरिभाविता न=नैव, भवन्ति=जायन्ते। अतो भवता शोको नैव कर्त्तव्य इति।

(ख) ननु=निश्चयमेव प्रकृष्टश्चासौ वायुः=पवनः तस्मिन् झञ्झावातेऽपि गिरयः=पर्वताः निष्कम्पाः=निश्चला एव भवन्ति।

अतो भवद्भिरपि दुःखेऽपि विकलेन नैव भाव्यमिति।

२४—'अचेतनं नाम गुणं न वीक्ष्यते।' ६।१३॥

प्रसङ्गः—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्याभिज्ञानशाकुन्तलस्य षष्ठाङ्काद् गृहीतोऽस्ति।

अत्राङ्गुरीयकमाप्त्वा शकुन्तलां स्मारं स्मारं तद्वियोगानलदन्दह्यमानहृदयो राजा अङ्गुरीयकमाक्षिपन् कथयति यत् त्वया सा अङ्गुलिः कथं वियुक्ता? अथवा उचितमेवास्ति यतो हि अचेतनं वस्तु गुणं न वीक्षते।

व्याख्या—अचेतनं=चेतनतारहितं वस्तु गुणं=पदार्थविशेषस्योत्कृष्टताप्रतिपादकं सौन्दर्यादिकं प्रेमादिकं वा न वीक्षते=न पश्यतीति। अचेतनेन त्वया तदङ्गुलिः वियुक्तेति युक्तं नाम।

---

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्नपत्राणि

(शास्त्रपरीक्षायां—प्रथमवर्षे)

१९८०

१—अधस्तनेषु पद्यद्वयं सप्रसङ्गं व्याख्येयम्— —३०

(क) इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥

(ख) शमप्रधानेषु तपोवनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद् वमन्ति ॥

(ग) अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

२—यथेच्छं त्रयाणां सप्रसङ्गं निरूपणं कार्यम्— —२०

(क) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

(ख) किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।

(ग) न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।

(घ) सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति ।

(ङ) पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ।

३—'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इत्युक्तिमहिम्नाऽभिज्ञान-शाकुन्तलनाटकस्य समीक्षणं विधेयम् । —२०

अथवा

'तत्रापि चतुर्थोऽङ्कः, तत्र श्लोकचतुष्टयम्' इति कथनस्य साधु विवेचनं कर्तव्यम् ।

१९८२

१—अधोलिखितेषु कयोश्चिद् द्वयोः पद्ययोः सप्रसङ्गं व्याख्या कार्या— —३०

(क) सुभगसलिलावगाहाः पाटलसंसर्गि सुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(ख) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला अपि सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥

(ग) विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥

(घ) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

२—अधोलिखितासु सूक्तिषु केचिद् द्वे सप्रसङ्गं व्याख्येये— —२०

(क) किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।

(ख) मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ।

(ग) श्रियादुरापः कथमीप्सितो भवेत् ।

(घ) प्रत्यर्पितन्यास इवान्तरात्मा ।

३—अभिज्ञानशाकुन्तले पञ्चमाङ्कस्य नाटकीयं वैशिष्ट्यं समालोचयन्तु ।—२०

अथवा

दुष्यन्तस्य चरित्रं ललितया वाचा चित्रयन्तु ।

१९८३

१—अधोलिखितेषु कयोश्चिद् द्वयोः पद्ययोः सप्रसङ्गं व्याख्या कार्या— —३०

(क) न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्नी ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥

(ख) सरसिजमनुविद्धं शैवलेनातिरम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

(ग) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै—
रनाविद्धं रत्नं मधुनवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(घ) यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥

२—अधोलिखितासु सूक्तिषु केचिद् द्वे सप्रसङ्गं व्याख्येये— —२०
(क) आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ।
(ख) कामी स्वतां पश्यति ।
(ग) आपन्नामयसत्रेषु दीक्षिताः खलु पौरवाः ।
(घ) इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ।

३—अभिज्ञानशाकुन्तले चतुर्थाङ्कस्य नाटकीयं वैशिष्टयं विश्लेषयन्तु । —२०

अथवा

अभिज्ञानशाकुन्तलमिति नाटकस्य नाम्ना औचित्यं साधयन्तु ।

१९८४

१—अधोलिखितेषु कयोश्चिद् द्वयोः पद्ययोः सप्रसङ्गं व्याख्या कार्या— —३०
(क) इदं किलव्याजमनोहरं वपुः
तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥
(ख) तव कुसुमशरत्वं शीतरश्मित्वमिन्दोः
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥
(ग) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥
(घ) उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

निमित्तनैमित्तिकयोरयं क्रमः
तव प्रसादस्य पुरस्तु सिद्धयः ॥

२—अधोलिखितासु सूक्तिषु केचिद् द्वे सप्रसङ्गं व्याख्येये— २०

(क) किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।

(ख) सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

(ग) श्रिया दुरापः कथमिप्सितो भवेत् ।

(घ) पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ।

३—अभिज्ञानशाकुन्तले पञ्चमाङ्कस्य नाटकीयं वैशिष्ट्यं विवेचयन्तु । २०

अथवा

शकुन्तलाया उत्पत्तिसौन्दर्यपातिव्रत्यञ्चाधिकृत्य निबन्धमेकं प्रणयन्तु ।

१९८५

१—अधोलिखितेषु पद्येषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या— ३०

(क) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

(ख) पातुं प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

(ग) स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवं विधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥

(घ) सिद्धयन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं प्राभविष्यदरुणस्तमसां वधाय
तञ्चेन्न सहस्रकिरणो धुरि नाकरिष्यत ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२—अधोलिखितासु सूक्तिषु केचिद् द्वे सप्रसङ्गं व्याख्येये— —२०

(क) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ।

(ख) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

(ग) आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ।

(घ) कस्तावदुष्णोदकेन नवमालिकां सिञ्चति ।

३—दुष्यन्तस्य चरित्रमुल्लेखनीयम् । —२०

अथवा

चतुर्थाङ्कस्य रम्यत्वमुपपादनीयम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्लोकव्याख्या-भागः

अक्लिष्टबालतरु०	११९	चूतानां चिरनिर्गताऽपि	११४
अधरः किसलयरागः	७८	जाने तपसो वीर्यं	९१
अध्याक्रान्ता वसति०	८९	तपति तनुगात्रि	९५
अनवरतधनुर्ज्या	८४	तव कुसुमशरत्वं	९१
अनाघ्रातं पुष्पं	८८	तस्याः पुष्पमयी	९९
अन्तर्हिते शशिनि	१००	तीव्राघातादभिमुख०	८२
अभिजनवतो भर्तुः	१०६	तुरगखुरहतस्तथाहि	८१
अयं स ते तिष्ठति	९४	दर्भाङ्कुरेण चरणः	८८
अर्थो हि कन्या	१०७	न खलु न खलु	७३
अस्मात् परं बत यथा	१२०	नियमयसि विमार्ग०	११०
अस्मान्साधु विचिन्त्य	१०४	नीवाराः शुककोटरा०	७४
आपरितोषाद् विदुषां	६९	नैतच्चित्रं यदयमुदधि	९०
इतः प्रत्यादिष्टा स्वजन०	११७	पातुं न प्रथमं	१०२
इदमुपनतमेवं रूप०	११२	पुत्रस्य ते रणशिरसि	१२५
इदमुपहितसूक्ष्म०	७६	पृष्टा जनेन समदुःख०	९४
इदं किलाव्याज०	७५	प्रत्यादिष्टविशेषमण्डन०	११६
उदेति पूर्वं कुसुमं	१२५	प्राणानामनिलेन वृत्ति०	१२३
औत्सुक्यमात्रमवसादयति	१०९	भूत्वा चिराय सदिगन्त०	१०७
कार्या सैकतलीनहंस०	११८	मय्येवस्मरणदारुण०	११३
किं शीकरैः क्लम०	९६	महाभागः कामं नरपति	१११
कुल्याम्भोभिः पवन०	७५	मुक्तेषु रश्मिषु	७१
क्षामक्षामकपोल०	९३	मेदश्छेदकृशोदरं	८५
क्षौमं केनचिदिन्दु०	१०१	मोहान्मया सुतनु पूर्वं०	१२४
गाहन्तां महिषा निपान०	८६	यदालोके सूक्ष्मं	७२
ग्रीवाभङ्गाभिरामं	७०	यस्य त्वया व्रण०	१०४
चलापाङ्गां दृष्टिं	७८	यात्येकतोऽस्तशिखरं	९९
चित्ते निवेश्य परि०	८७	यास्यत्यद्य शकुन्तलेति	१०१

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

रम्यं द्वेष्टि यथा पुरा १९५
रम्याणि वीक्ष्य मधुराश्च १०८
रम्यान्तरः कमलिनी० १०३
वल्मीकार्द्धनिमग्नमूर्ति० १२२
वाचं न मिश्रयति ८१
विचिन्तयन्ती यम० ९८
वैखानसं किमनया ७९
शमप्रधानेषु तपोधनेषु ८६
शुश्रूषस्व गुरून् कुरु १०५
शैलानामवरोहतीव १२१
सतीमपि ज्ञातिकुलैक० १११
सरसिजमनुविद्धं
साक्षात्प्रियामुपगतां०
सायन्तने सवन०
सिद्धयन्ति कर्मसु महत्स्वपि
सुतनु हृदयात् प्रत्यादेश०
सुभगसलिलावगाहाः
स्तनन्यस्तोशीरं
स्त्रीणामशिक्षितपटुत्व०
स्निग्धं वीक्षितमन्यतो०
स्रस्तांशावतिमात्र०
स्वसुखनिरभिलाषः

सूक्तिव्याख्या-भागः

अचेतनं नाम गुणं १३६
अतः परीक्ष कर्तव्यं १३५
अतः समीपे प्ररिणेतु० १३४
अर्थो हि कन्या १३३
उपपन्नुर्हि दारेषु १३५
कस्तावदुष्णोदकेन १३१
कामी स्वतां पश्यति १२९
किमिव हि मधुराणां १२७
कोऽन्यो हुतवहात् १३१
ग्लपयति हि शशाङ्कं १३०
चक्रवाकवधु आमन्त्रयस्व १३१
न कदापि सत्पुरुषाः १३६
ननु प्रवातेऽपि
न प्रभातरलं ज्योति०
पीड्यन्ते ग्रहिणः
बलवदपि शिक्षितानां०
भवितव्यानां द्वाराणि
भाग्याधीनमतः परं
मिथ्या हि व्यसनं
मूर्च्छन्त्यमी विकाराः
लभेत वा प्रार्थयिता
वत्से ! दिष्टचा धूमो०
वशिनां हि परपरिग्रह०
सतां हि सन्देह०

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalg

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalg

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jaipur.